Shri Raghunath Temple MSS. Library,
JAMMU

No. २६१८ (महाभारते)

Title भगवद्गीता १८ टीका सहिता (अष्टमोऽध्यायः)

Author श्रीसूर्य पण्डितः

Extent ~~[illegible]~~ 148 Age ८

Subject वेदान्त शास्त्रं

ॐ २७१८

1+148 — 149
complete.

अष्टमाध्याय

शंकरभाष्य
आनंदगिरि टीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच किंतद्ब्रह्म किमध्यात्मं किंकर्म पुरुषोत्तम अधिभूतञ्च किंप्रोक्तमधिदैवं किमुच्यते १

शाङ्करभाष्यं टीका

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजानि उपदिष्टानि अतस्तत्प्रश्नार्थं अर्जुन उवाच १

आनन्दगिरिकृतटीका

सप्तमाध्यायान्ते येषामन्तगतं पापमित्यादिना येषां ब्रह्मादीनामनुसन्धानमुक्तं यच्च प्रयाणकाले भगवतः स्मरणं दर्शितं तदिदं जिज्ञासमानः सन् पृच्छतीति प्रश्नसमुदायमवतारयति ते ब्रह्मेति प्रश्नबीजानि तद्विषयभूतानि ब्रह्मादीनि वस्तूनीति यावत् उपक्षिप्तविषयप्रतिलम्भानन्तरं तेषां प्रश्न [illegible] द्वारा निर्णयार्थमाह अत इति यदुक्तं ते ब्रह्म तद्विदुरिति तत् किं सोपाधिकं निरुपाधिकं वा ब्रह्मशब्दस्योभयत्रापि सम्भवादिति मत्वाह किं तदिति यच्चोक्तं कृत्स्नमध्यात्ममिति तत्रात्मानं देहमधिकृत्य तस्मिन्नधिष्ठाने तिष्ठतीत्यध्यात्मशब्देन श्रोत्रादिकरणग्रामो वा प्रत्यग्भूतं ब्रह्मैव वा विवक्षितमित्याह किमध्यात्ममिति विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति श्रुतौ कर्मणो द्वैविध्यनिर्धारणात् कर्म चाखिलमित्यत्र कर्म गृहीतमिति पृच्छति किमिति तत्रावान्तरभेदाकार्यकारणभेदो अतीतस्य भगवतो न किञ्चिद्देयमस्तीति सूचयति पुरुषोत्तमेति साधिभूताधिदैवमित्यत्राधिभूतशब्देन पृथिव्यादिषु भूतेषु वर्तमानं किञ्चिदेव गृह्यते किम्वा समस्तमेव कार्यमिति निर्धारयिषया पृच्छति अधि

गी॰
टी॰ अ॰

भूतमिति अधिदैवमितिच दैवतविषयमनुध्यानं वा दैवते
ष्वादित्यमण्डलादिषु वर्तमानं चैतन्यं वा निरूपितमितिप्रश्ना
न्तरं प्रश्नोति अधि दैवमिति १

स्वामिकृतटीका

ब्रह्मकर्माधिभूतादिविदुः कृष्णैकचेतसः इत्युक्तं ब्रह्मकर्मादिस्वरूपमष्टमे
स्फुटं पूर्वाध्यायांते भगवतोपक्षिप्तानां ब्रह्माध्यात्मादिसप्तानां पदार्था
नां तत्त्वं जिज्ञासुरर्जुन उवाच किं तद्ब्रह्मेति द्वाभ्यां १ स्पष्टोऽर्थः

शंकरभाष्यम् टीका

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवता अर्जुनेन प्रश्नबीजान्युपा
क्षिप्तानि अतस्तत्प्रश्नार्थमर्जुन उवाच किं तद्ब्रह्मेत्यादिना १ ॥

रामानुजभाष्यटीका

सप्तमे परस्य ब्रह्मणो वासुदेवस्य सर्वेशस्य निखिलचेतनाचेतनव
स्तुशेषित्वं कारणत्वमाधारत्वं सर्वशरीरतया सर्वप्रकारत्वेन सर्व
शब्दवाच्यत्वं सर्वनियन्तृत्वं सर्वैश्च कल्याणगुणैरेकाश्रयत्वं च सत्त्वर
जस्तमोमयैर्देहेन्द्रियत्वेन भोग्यत्वेन चावस्थितैर्भावैरनादिकालप्र
वृत्तदुष्कृतप्रवाहहेतुकैस्तस्य तिरोधानमत्युत्कृष्टसुकृतहेतुकभ
गवत्प्रपत्त्या च तन्निवर्तनं सुकृततारतम्येन च प्रपत्तिवैशेष्यादैश्व
र्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्षयोपासकभेदं भगवत्प्रेप्सो पासना
र्नित्ययुक्ततयैकभक्तितया चात्यर्थं परमपुरुषप्रियत्वेन च श्रैष्ठ्यं।
दुर्लभत्वं च प्रतिपाद्योपासकत्रयाणां ज्ञातव्योपादेयभेदांश्च प्रस्तौति १

श्रीमद्वल्लभकृतटीका स्पष्टार्थः १

पद्मनाभपादटीका

एवं पूर्वाध्यायांते भगवदुपक्रांतमनुध्यानप्रसंगवशप्रकाराणां स्वरू
पं जिज्ञासुरर्जुनः पृच्छति किं तदिति द्वाभ्यां तत्र पूर्वपद्यं स्पष्टार्थं १

वनमालीटीका

मुमुक्षूणां सतां ज्ञेयं सकर्म प्राप्यमैश्वर्यं स्वस्वरूपं चेतीदृक्कामुकपैविः स यौदृ
समोतेसमप्यर्था ज्ञेयत्वेन भगवतो कालात्तु तत्तमर्जुनः पृच्छति तद्ब्रह्म कि
परं ब्रह्म वेदादिकं वा यद्यपि वा सदेव प्रव ब्रह्मेति ज्ञातास्य व त
थापि मो विदुरिमुक्तो तेब्रह्म तद्विदुरिति पारोक्ष्या तया प्रकृते परब्रह्म वस्ता
त्मकं भगवतोक्तमन्यदेति भवति संदेहः आत्मानं देहमपि कृत्स्नमेवेन मानि
श्रोत्रादि जीवो वा कर्म किं ज्योतिष्टोमादिकं परेशकर्तृकं जगत्सर्जनादि वृ
पं वा अधिभूतं मृतयं किं विकार्यं समस्तमेव वा कार्यजातं अधिदैव
हिरण्यगर्भो वृद्धायरं ब्रह्म प्राप्यतया मुमुक्षुज्ञेयं अध्यात्मं जीवतत्त्वमपि
विवेचनाय ज्ञेयं कर्म जगत्सर्जनाख्यं ज्ञेयं तज्ज्ञानस्य भक्तिवर्द्धकत्वात् अ
धिभूतं च प्राप्यतया ज्ञेयं अधिदैवं हिरण्यगर्भो मोक्षप्रापकत्वाद्गुरुत्वे
न ज्ञेयः स पताम् ब्रह्म गमयतीति श्रुतेरिति तत्त्वार्थः १ ॥

अथ समवैजयन्ती टीका ॥

एवं तावत्सप्तमेऽध्याये सर्वेश्वर परब्रह्मणो वासुदेवस्य पार्थसारथेर्भग
वतः कृत्स्नस्य प्रकृतिद्वयात्मकस्य सर्वकारणत्वं सर्वनियंतृत्वं सर्वेशरण्यत्वं सर्व
शक्तिवाच्यत्वमनंतमंगलगुणगणाश्रयत्वं चतुर्विधानां मध्ये ज्ञानिनो नि
ष्कामत्वेन श्रेष्ठत्वं तस्य दुर्लभत्वं च त्रयाणामप्यन्येकजन्मकृत पुण्यपुंज
लभ्यत्वं माया मत्प्रपत्त्यैव प्राकृत विषयकामनिहत्तित्वं ज्ञानप्राप्तिश्च प्रतिपा
दितानीमष्टमेऽध्याये ज्ञात्वाऽध्यायान्ते जरामरणमोक्षायेति श्लोकद्वये ना
नाविधत्रयाणामुपादेयान् ब्रह्मादीन् सप्तप्रश्नान् जिज्ञासुरर्जुनो भगवंत
पृच्छति स्म किं तद्ब्रह्मेति द्वाभ्यां किं तद्ब्रह्म जरामरणमोक्षाय सर्वेश्वरं त्वा
मपयनमानानां ज्ञातव्यत्वेन यदुक्तं तद्ब्रह्म किं परमात्मरूपं वा जीवा
त्मरूपं वा किमध्यात्मं स्वर्गप्राप्तिकामानां ज्ञातव्यतया यदुक्तं तदध्या
त्मं किं श्रोत्रादीन्द्रियगणो वा सत्त्वमतं गणो वा किं कर्म जरादिमोक्षाय
यतमानानां कर्तव्यं यत्कर्म किं लौकिकं वैदिकं वा चपुनः अधिभूतं किं
प्रोक्तं ऐश्वर्यार्थिनां ज्ञातव्यं तदधिभूतं किं भूतानां पिकृत्स्नं वर्तते इ
ति शुमते घटादिकार्यं वा स्थूलशरीरं वा प्रोक्तं कथितं तया च पुनः अ
धिदैवं किमुच्यते ऐश्वर्यार्थिनां ज्ञातव्यं यदधिदैवं किं देवताविषय
कमनुध्यानं वा समष्टिविराड्वाऽउच्यते कथ्यते पुरुषोत्तमेति सम्बोधनेन
वयोवयः कुलधर्माचाराद्यधिकरूपदेवहृद्धसेवादीनां ज्ञानोत्पत्तिकार

सप्तमाध्यायान्ते ते ब्रह्म तद्विदुः कृत्स्नमध्यात्ममित्यादिना सार्द्धश्लोकेन सप्तपदार्था ज्ञेयत्वेन भगवता सूचिताः तेषां वृत्तिस्थानीयोऽयमष्टमोऽध्याय आरभ्यते तत्र सूचितानि सप्त वस्तूनि विशेषतो बुभुत्समानः श्लोकाभ्याम्

गी॰ एतानां समानत्वेऽपि सर्वेषु रस्य तत्व सर्वं तत्वात्मवेवस्य ज्ञातं विदितमस्ति जीव
टी॰ अ॰ स्यममतत्स्वल्पतत्वात्किं विद्धि दिनमतत्त्वमावेदनिस्तवितम् ।

[illegible]सूदनी टीका ॥

तत्तज्ज्ञेयत्वेनोक्तं ब्रह्म किं सोपाधिकं निरुपाधिकं वा एवमात्मानं देहमधि कृत्य तस्मिन्नधिष्ठानेतिष्ठतीत्यध्यात्मं किं श्रोत्रादिकरणग्रामो वा प्रत्यक् चैतन्यं वा तथा कर्म चाखिलमित्यत्र किं कर्म यज्ञरूपमन्यद्वा विज्ञातेन यज्ञेन तन्वते कर्माणि तन्वतेपि चेतिश्रुतेर्देवि यज्ञ श्रवणात्तत्र यज्ञमत्वात्क यं तमांश्च बसीतिशंकामपनुदन्सर्वपुरुषेभ्यः उत्तमस्य सर्वज्ञस्य तव न किं विदज्ञेयमिति संबोधयन्नेनम्पचयति देपुरुषोत्तमेति अधिभूतं च किं श्रोत्रं स्थित्यादिभूतमधिकृत्य यत्किंचित्कार्यमधिभूतपदेन विव क्षितं किं वा समस्तमेव कार्यजातं चकारः सर्वेषां प्रश्नानां समुच्चयार्थः अ धिदैवं किमुच्यते देवताविषयमनुध्यानं वा सर्वदेवनेष्वादित्यमण्डलादि षु वस्तु तेचैतन्यं वा । १ ॥

[illegible]टी टीका ॥

यशोभूतिर्धर्मो विषयविरतिः श्रीः श्रुतिमतिर्गुणाः साकलेन प्रभवति सदा यत्र विमलाः प्रतिष्ठाः सप्ताः सा भगवति यन्निरूपमं श्रयेहं संलभ्याधि तममरवन्द्यैस्मनुनिभिः सप्त मोते पदार्था यद् इरिणा सप्त सूचिता उत्तिता यप्रतेषामध्युतारभ्यते सप्तमः तत्पलभ्याजेनः प्रश्नबीजं स्त्रोपदेशनः अष्टवृत्तिस्मदरि समपदार्थज्ञानसिद्धये ज्ञेयत्वेनेरितं ब्रह्म किं तत्सोपा धिकं त्वया किं निरुपाधिकं वोक्तं तथाध्यात्मं किमुच्यते श्रोत्रादिक रणग्रामः प्रत्यक्चैतन्यमेव वा तथा कर्म किमत्रोक्तं यज्ञरूपमथाय वाक्येपि देविध्यं कर्मणः स्मृते किं ते सर्वो तमस्मा [illegible] ज्ञातं वा पुरुषोत्तम श्रुतिभूतपदेनोक्तं किं कार्यं पांचभौतिकं किं वा समस्तमेवोक्तं कार्यजा तं दिमायिके अधिदैवमनुध्यानं देवताविषयं च किं किं वा तत्स्थतचैत न्यं सर्वेषां दर्मण्डलादिषु । १ ॥

नीलकंठी टीका ॥

पूर्वस्मिन्नध्याये मायोपहितं ब्रह्म जगत्कारणमुक्तं तच्चोत्तमानामन्त्रा·
पाधिब्रह्मप्रतिपत्तावुपलक्षणमध्यमानामुपास्यं चेति मत्वा प्रतिपत्तव्यं ब्र
ह्म तद्विषयपकः उपासनाविषयाश्च षट्पदं सप्तमप्रश्नविषयास्ते ब्रह्म तद्वि
दुरित्यध्यायान्ते सार्धश्लोकेन भगवता सूचितास्तन्निरूपणायमध्यायआर
भ्यते तत्र सूचितानां ब्रह्मादिशब्दानामर्थं बुभुत्सुरर्जुन उवाच किं तद्ब्र·
ह्मेति प्रथमः प्रश्नः शेषः स्पष्टार्थः श्लोकः १

[illegible]टीका

गेतदेवं परमेश्वरस्याराधनाद्विशेषवान् तत्स्पलक्ष्यपितः प्रथमं सर्वाधिष्ठा
नतयाशामं परमेश्वरस्वरूपलक्षणा निरूप्यप्राप्यमावसरं अन्तकालस्वरूप
लक्षणीयं तत्रातीताध्यायान्ते योगिनां देहोत्क्रान्त्युपक्रमे साधिभूता
दयो ये पदार्था उपन्यस्तास्तांस्तत्त्वतो ज्ञातुमर्जुन उवाच किं तद्ब्रह्म कि
मध्यात्ममिति [illegible] प्रश्नार्थः सुगमः १

रामकंठीटीका

अथ सप्तमेऽध्याये प्रतिपादितज्ञानविदो भक्तिलक्षणविज्ञानविशारदा र
ब्रह्मादीन्प्रकारान्विदुरितियदुक्तं ततस्तेषां प्रकाराणां संजातस्वरूप·
२४ जिज्ञासुरर्जुन उवाच प्रश्नवाक्यान्येतानि गतार्थानि किं तत्किं तदिति न
श्चद्वयस्यायमभिप्रायः यद्भगवतोक्तमध्याये ब्रह्मेतेषु प्रकारेषु किं तद्ब्रह्म·
कः प्रकारो ब्रह्मस्वरूपः कश्चाध्यात्मस्वरूप इति विभागजिज्ञासारूपः १

[illegible]मतीटीका

गते पूर्वाध्याये उद्दिष्टानां ब्रह्माध्यात्मादिपदार्थानां लक्षणं बुभुत्सयार्जु
न उवाच किं तद्ब्रह्मेत्यादि स्पष्टार्थं १

पंचोलीटीका

सप्तमाध्यायान्ते ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य
प्रश्नबीजानि उपन्यस्तानि अतः तत्स्पष्टार्थं किं तद्ब्रह्मेति द्वाभ्यां हे पुरु
षोत्तम तद्ब्रह्म किं तदध्यात्मं किं किं कर्म अधिभूतं किं प्रोक्तं अधिदैवं किं
उच्यते १

3

॰वीरसमिद्धोधिनी

श्रीकार्तवीर्यार्जुनाय नमः ॥ अथ सप्तमाध्याय प्रतिपादित
स्वज्ञानात्सुवितकर्मकर्तव्यताविषयकनिश्चयलक्षणज्ञान
तत्वज्ञानभगवद्भक्तिलक्षणविज्ञानविषयकं ब्रह्मादीन्प्रका
रान्विदुरिति यद्भगवतोक्तं तत्र तेषां प्रकाराणां संज्ञातत्स्वरूप
जिज्ञासोर्जुन उवाच किं तद्ब्रह्मेति सप्तार्थीयं श्लोकः किं तद्ब्र
ह्मेत्युपदिष्टं किं तत् कतमो ब्रह्मस्वरूपः प्रकार इति यच्छब्दा
ध्याहारेण समन्वयः अयं भावः किं ब्रह्मेत्येतावन्मात्रेणैव ब्रह्म
स्वरूपजिज्ञासात्मकप्रश्नसिद्धे तच्छब्देनैतदुच्यते यदवृत्ता
वतामस्मोद्धरपनुत्तये स्वज्ञातिविहितकर्मणि प्रवृत्तये वानेके
तत्वज्ञानप्रकारा उपदिष्टास्तेष्वेकः प्रकारो ब्रह्मस्वरूपः
कश्चाध्यात्मस्वरूप इति एवमग्रेऽग्रवाक्येष्वपि बोध्यं
मीतिमां कामपनुदन्सर्वभूतेभ्य उत्तमस्य सर्वज्ञस्य तत्त्वं न
किंचिदस्तेयमस्तीत्यभिप्रायेण संबोधयति पुरुषोत्तमेति
॥१॥

अथ भाष्यम्

मप्राकालकर्मव्यगत्यायस्मिन्नध्याये उपदिशति परमम
क्षरं ब्रह्म वेदान्तिका व्याहृत्यर्थमेतत् आत्मन्यधिपत्तद्ध्या
त्मं आत्मात्मिकारेयतदिति वा तथाहि मेव स्वभावः स्वा
ध्यो भाव इति श्रुत्यन्त्याजीवो वा स्वभावः सर्वदास्त्येवैकप्र
कारेणेति भावः अंतःकरणादिव्याहृत्यर्थो भावपदं नत्ये
कप्रकारेणास्थितिरं तःकरणादेः विकारित्वात् स्वभावो हृदय
रव्याहृत्यर्थः भूतानां जीवानां भावानां जडपदार्थानां चोद्भव
करेश्वरक्रियाविसर्गः विशेषेण सर्जनं विसर्ग इत्यर्थः भूतानि

समष्टीकान् जीवानधिकृत्य यत्तदधिभूतं क्षरो भावः वि
नाशिकार्यपदार्थः अव्यक्तांतर्भावेपि तस्याप्यन्यथाभा
वाद्व्याविनाशोस्त्येव तथोक्तं अव्यक्तं परमे व्योम्नि निष्क्रि
ये संप्रलीयत इति तस्मादव्यक्तमप्युत्पन्नं विगुणं हि जनन्मे
ति च विकारोव्यक्तजन्मादीति च स्कांदे भूदिप्रायन्नात्त्रकोसो
जीवः स च संकर्षणो ब्रह्मा वा समष्टिदेवानधिकृत्य पतिरि
त्यधिदैवतं देवाधिकारस्य इति वा सर्वयज्ञभोक्तृत्वादेवाधि
यज्ञः अन्योधियज्ञो स्यादिः प्रसिद्ध इति देह विशेषणं भो
क्तारं यज्ञतपसां भैविधानां येप्यन्यदेवताभक्ताः एतस्यवा
अवतारस्य प्रकाशकानुगामि इद ततो मनुष्याः प्रभासंति यज्ञमा
नं देवा इत्यादेः अतो भस्य भुवःस्वर्गः अतो नैश्रेयसं पदमि
त्यादिपरिहारार्थं मोदयमैं भगवांश्चैवत्र ज्ञोक्त्वादेवाधि
यज्ञत्वं सिद्धमिति कथमित्यस्य परिहारार्थः पृथक्प्रोक्तः सर्व
भाणि देहस्य रूपेणाधियज्ञः अत्रेति स्वदेहनिर्देशार्थं न हि
तत्रेश्वरस्य नियंतृत्वं पृथगस्ति नामोक्तं ब्रह्म भगवतो न्यत्
ते ब्रह्मेत्युक्ता साधिभूताधिदैवं मां साधियज्ञं च ये विदुरिति
प्रकरणात् तस्यैव ब्रह्मत्वात् साधियज्ञमिति भेदप्रतीतेः त
न्निर्देशार्थमधियज्ञोहमित्युक्तं मामित्यभेदसिद्धेश्चेश्वरमि
त्येवोक्तं आह च गीताकल्पे देहस्थाविष्णुरूपाणि अधियज्ञ
इतीरितः कर्मेश्वरस्य स्पष्टस्य तत्रापीक्षा प्रयुज्यते अधि
भूतं जडं प्रोक्तमध्यात्मं जीव उच्यते हिरण्यगर्भोधिदैवं देवः
संकर्षणो पिवा ब्रह्मा नारायणो देवः सर्वदेवेश्वरेश्वर इति
यथा प्रतीतं वा सर्वमत्रैव निषिध्यत इति स्कांदे च आत्माभि
मानाधिकारस्थितमध्यात्ममुच्यते देहस्थः खं विना जीव वा
सत्वमधिदैवतं देवाधिकारगं सर्वमहाभूताधिकारगं तत्का

रणं तथाकार्यमधिभूतं तदंतिकात् इति मदर्पकोर्मैव अध्या
त्मं देहपर्यंतं केवलात्मोपकारकं सदेहजीवा भूतानि यते
षामुपकारकत्वात् अधिभूतं तु मायां तदेवानामधिदैवतमि
ति तद्रूपमपि मत्तो निडःस्वनिरति मायानंदात्मिकां तद्बोधकं
मुक्तानां वगति श्रमन् तेवेनत इति कल्पितं इति मोत्तय मैं स
रन्नुरुष त्यजतीति भिन्नकालीनत्वेप्यविरोध इति मंदमतेः
शंकामाभूदिति अंते इति विशेषणं तमते नैव शंकावकाशः
स्मरन् त्यजतीत्येककालीनत्वप्रतीतेः इष्टतेडःस्वान्तस्य सं
जतीति न भविष्यति शंका त्यजन्देहं कश्चिद्गमो हमामोत्य
संशयमिति चक्कारं तस्य हैतस्य हृदयस्य प्रयोजनं ते तेन
प्रयोजनतेत्नैव आत्मानिष्क्रमतीति हि श्रुतिः सदा तद्भावभा
वित इति अंतकालस्मरणोपायमाह भावोंतरगतं मतं तथा
भिधानात् भावितत्वमस्ति वासितत्वम् भावनात्वति वा सते
त्यभिधानात् सदा तद्भावभावितत्वं स्फुटयति १॥

भाषा अनुवाद टीका ॥

सप्तम अध्याय मे जो संक्षेप से कहा कि भगवद्भक्त मे एकचित्त भ
क्तजन ब्रह्म कर्म औ अधिभूत आदि सात पदार्थ जानि सकै है सोई
जो सप्तम अध्याय मे कहा ब्रह्मकर्मादि तिस को भगवान अष्टम अ
ध्याय मे प्रकाशरूप से कहैगे सोयह कि सतयें अध्याय के अन्त
मे प्रसङ्गवश भगवान नेकहा जोब्रह्म औ अध्यात्म सात पदार्थ ति
नके जानेकूं अर्जुन दोश्लोक से प्रश्न करते हैं किहे पुरुषोत्तम
आपने कहा जो ब्रह्म सो किस रूप कैहै और अध्यात्म ही वा कि
स प्रकार का जानें तथा कर्म ही वाक्याहै और अधिभूत या अ
धिदैव किस को कहते है यह प्रश्नकिया १ ॥

दोहा॥

कोपुरुषोत्तम ब्रह्म सो कोअध्यात्महोय अधीभूतसोकोकसो-
कोअधिदेवहुंसोय १॥

5

अधियज्ञः कथं कोत्र देहेस्मिन्मधुसूदन प्र
याणकाले च कथं ज्ञेयोसि नियतात्मभिः २

शाङ्करभाष्यटीका उपक्रमे २ नास्ति

आनन्दगिरिकृतटीका

साधियज्ञं चेत्यत्राधियज्ञशब्देन यज्ञमधिकृतो विज्ञानात्मा वा परदेवता वेति प्रश्नान्तरं धृतकरोति अधियज्ञ इति स च कथं केन प्रकारेण ब्रह्मत्वेन चिन्तनीयः किं तादात्म्येन किं वा अत्यन्ताभेदेनेत्याह

कथमिति सर्वथापि स किमस्मिन् देहे वर्त्तते ततो वहिर्वा देहे
वेन स कोत्र बुद्ध्यादिस्तद्व्यतिरिक्तो वेति जिज्ञासया पृष्टे कोत्रेति
अधियज्ञः कथं कोत्रेति न प्रश्नभेदकः कथमिति किन्तु प्रका
रभेदविवक्षयेति द्रष्टव्यं यत्तु समाहितचित्तानामन्तक्रमणका
लेपि भगवदनुसन्धाने सिध्यतीति तदयुक्तमन्तक्रमणदशायां
करणग्रामस्यैवयग्राच्चित्तसमाधानानुपपत्तेरित्यभिप्रेत्याह प्रया
णेति २

स्वामिकृतटीका

अत्र देहे यो यज्ञो वर्त्तते तस्मिन् कोधियज्ञः अधिष्ठाता प्रयोजकः
फलदाता च कः स्वरूपं पृष्ट्वा अधिष्ठानप्रकारं पृच्छति कथं के
न प्रकारेणासावस्मिन् देहे स्थितो यज्ञमधितिष्ठतीत्यर्थः यज्ञग्रह
णं सर्वकर्मणामुपलक्षणार्थं अन्तकाले च नियतचित्तैः पुरुषैः क
थं केनोपायेन ज्ञेयोसि त्वमक्रमेणे वा तत्र २॥

पिशाचभाष्यटीका उपक्रमे २ नास्ति

रामानुजभाष्यटीका

इदानीमष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान्निर्दिशति जरामरण
मोक्षाय भगवन्तमाश्रित्य यतमानानां ज्ञातव्यं तद्ब्रह्माध्यात्म
कर्म च किमिति वक्तव्यं ऐश्वर्यार्थिना ज्ञातव्यमधिभूतमधिदैवं च
किं त्रयाणां ज्ञातव्योधियज्ञशब्दनिर्दिष्टः कः तस्य चाधियज्ञभावः

कथंप्रयाणकालेचैभिस्त्रिभिर्नियतात्मभिःकथंज्ञेयोसि २॥

अभिनवगुप्तकृतटीका

तेब्रह्मतद्विदुरित्यादिनायद्भगवतोपदिष्टंतेनतस्मअनवकएवंनिर्णीय
ति अधियज्ञःकथंकोत्रदेहेनिश्चीतोनिशेषः २

परमार्थप्रपाटीका

[illegible] अधियज्ञइति अत्रदेहेयोयज्ञोवर्ततेतस्मिन्को
धियज्ञअधिष्ठाताप्रयोजकस्तत्फलदाताचकइतिप्रश्नोनतंभ
गवानाह २॥

वनमालीटीका

अत्रब्रह्मादिषट्केअधियज्ञोयज्ञमधिगतोदेवतात्मापरंब्रह्मवा
तयोर्विविच्यतेयत्वात्मप्रश्नः सचकथंकेनप्रकारेणचिंतनीयः
किमस्मिन्देहेवर्तमानतयोत्ततोवहिर्भावेनवादेहेचेत्तर्हिकोत्रपरमे
श्वरोजीवोवा अधियज्ञःकथंकोत्रेतिनप्रश्नद्वये किंतुसप्रकार
कएककएवप्रयाणकालेचसर्वकरणवैकल्यात्तिनसमाधा
नानुपपत्तेःकथंकेनप्रकारेणनियतात्मभिःसमाहितचित्तै
र्ज्ञेयोसि इत्याशंकाद्वयनाद्यप्रकारः एतत्सर्वंतत्वात्परमकारु
णिकत्वाच्चशरणागतेभ्योप्रतिकथयेत्यभिप्रायः २

अथमैवजयन्तीटीका

किंचअधियज्ञइति हे मधुसूदन मधुदैत्यहंतः अस्मिन्देहे ऽधियज्ञः आनोदि
ग्धपाणंज्ञातअत्वेनस्थितस्तकः अधियज्ञसंज्ञकोयज्ञमधिगत इन्द्रादि
र्वा विष्णुर्वा तस्य वा अत्रदेहे ऽधियज्ञभावः कथं केन प्रकारेण भवति अत्रैकप
वश्लो भवति न तु प्रश्नद्वयस्य शंकारोपस्यादित्यर्थः चपुनर्नियतात्म
भिः निशेषेण एतः शब्दादिविषयादुपरमिति आत्मा मनो येस्तैर्नयानेण
तोदिभिस्त्रिभिर्भक्तैः प्रयाणकाले प्राणोत्क्रमणसमये कथं केन प्रका
रेण ज्ञेयो ज्ञातुं योग्यस्त्वमसि भवसि यतो मुमूर्षोर्जनस्य तस्मिन्समये निर
तिशयरोगादिपीडया सकलदेहेंद्रियादिव्याकुलत्वेन चित्तसमाधा
नासंभवः यथा मधुदैत्यं हत्वा सर्वेषां जगतां त्वं सुखमदास्तथा ममापि
संदेहरूपासुरं निहत्य सुखं देहीति संबोधनाशयः २ ॥

मधुसूदनी टीका ॥

अधियज्ञो यज्ञमधिगतो देवतात्मा वा परब्रह्म वा स च कथं केन प्रकारेण
चिंत्यः किं तादात्म्येन किं वात्यंताभेदेन सर्वथापि स किमस्मिन्देहे व
र्ततेततो वहिर्वा देहे चेत् स कोऽत्र बुद्ध्यादिस्तद्व्यतिरिक्तो वा अधियज्ञः क
थंकोऽत्रेति न प्रश्नद्वयं किंतु सप्रकारकएक एव प्रश्न इति द्रष्टव्यं परम
कारुणिकत्वादनायासेनापि सर्वोपद्रवनिवारकस्य भगवतो नायासेन
मत्संदेहापद्रवनिवारणमीषत्करमुचितमेवेति सूचयन्संबोधय
ति मधुसूदनेति प्रयाणकाले च सर्वकरणग्रामवैयग्र्याच्चित्तसमाधा
नानुपपत्तेः कथं केन प्रकारेण नियतात्मभिः समाहितचित्तैर्ज्ञेयो
सीति उक्तशंकासूचनार्थः चकारः एतत्सर्वं सर्वज्ञत्वात्परमकारु
णिकत्वाच्च शरणागतं मां कथयेत्यभिप्रायः [illegible]
[illegible] २॥ प्रति॰

सदानंदी टीका ॥

देवतात्माधियज्ञो वा परब्रह्मा यथैवेरितं स च केन प्रकारेण चिंतनीयोऽधि
यज्ञकः किं तादात्म्येन किं वा सोऽत्यंताभेदेन चित्यते सर्वथापि स देहेस्मि
न्वर्ततेवाततो वहिः देहे चेत्किं स बुद्ध्यादिस्तद्भिन्नो वा स उच्यते करा
णग्रामवैयग्र्यान्नरस्तुकाले तिउ: सदेहकथं ज्ञेयोऽसि चित्तस्य समाधेरस
संभवात् एतत्कथय सर्वज्ञत्वात्कृपालुत्वाच्च मां प्रति जुहमेनशाय

गी॰
टी॰ग्र॰

स्यास्यहृदनंत्वमधोरिव[illegible]भगवान्मनेरीशिमिः २ ॥

नीलकंठी टीका ॥

अधियज्ञः कथंकोत्र कइतिस्वरूपप्रश्नः कथंज्ञेयइतिपदापकर्षेण ततदुपासनाप्रकारप्रश्नश्चेतिद्वयंमिलित्वापकपवप्रश्नः शेषंस्पष्टं

आनंदीटीका अत्रापिप्रश्नार्थःसुगमः २

[illegible] २ ॥

रामकंठीटीका

प्रयाणकालेकथंज्ञेयोसीतिपूर्वमनुक्तार्थविषयःपृथक्प्रश्नः २

लासिकी [illegible]टीका

अत्रदेहेकथमस्मिन्देहेकइतिपरिच्छेदः प्रयाणकालेसर्वेंद्रियाधिष्ठानेदेहादुत्क्रान्तिसमये नियतात्मभिर्नियतः प्रणवमहाशांतामापादितआत्मायैस्तैः आत्मनिनित्यमवहितैः कथंकेनप्रकारेणज्ञातंप्रत्यभिज्ञातंशक्योसि अन्यत्स्पष्टं २

पंचोलीटीका

हेमधुसूदनअत्रदेहेकः अस्मिन्कथमधियज्ञःवअपरंप्रयाणकालेनियतात्मभिःकथंज्ञेयोसि २

रसवीरसमिद्धोधिनी ॥

अधियज्ञइति यज्ञेपुरुहयज्ञेषधिकृतोदेवताविशेषकः उक्तमार्षेपुतेपुकतमः कथंकेनस्वरूपेणचध्येय अत्रैकएवायंप्रश्नः अत्र देहइति हे इति अस्मिन्निति पदत्रयच्छेदः हे मधुसूदनसंबोधनं हेमधुसूदनेति संबोधनस्यायमभिप्रायः सर्गादौकिलसर्वप्रवर्तकयब्रह्मणः महतीनिरोधकं मोहजनकंचमधुंयथानोयाम

नसूदितवानसि एवंमत्संदेहोपितवत्वयनोद्यएवेति भावः आ
रव्हातहिपर्ययोत्रं हिंसेतियावत् अव्ययंविभक्तीतिसमासः अ
त्रं हिंसां ददातीति अत्रदोहिंसानिमित्तभूतः अस्मिन्नत्यन्तदेनोप
लभ्यमानेत्रदेहिंसाजनकेसमरेइत्यर्थः तथाप्रयाणकालेसं
मुखमरणसमयेनियतात्मभिः नियतोनिगृहीतः स्वजात्युचि
तानुष्ठीयमानकर्मणः सकाशादन्यस्माद्विषयात्सकाशाद
त्मामनोबुद्ध्यात्मकमंतःकरणंयैस्तैः अथच नियतोनियम
विषयतामापादितआत्मायत्नोयैस्तैरेकतत्परैरित्यर्थः कथं
केनप्रकारेणज्ञेयोसि इदमत्रतात्पर्यं अतिप्रचंडशस्त्रापातेपि
युद्धतावीरेणनप्रकंप्यंमयामंतव्यमिति किंतुयावत्प्राणनि
र्गमंप्रयत्नपरेणैवभाव्यमितिराजन्यधर्मसिद्धांतः एवंचसं
ति तस्यातिदारुणप्रहारेणप्राणनिर्गमेसतिमरणशंकाव
हितत्वेनतावत्प्रयाणकालविवेकएवनास्ति कुतःपुनस्तत्
कालोचिताभवदनुस्मृतिरित्यतस्तमुपायंब्रूहि येनभवदनु
स्मृतिःस्यादिति २॥

मधुभाष्य

२॥

भाषा अनवाद टीका ॥

और शरीरके द्वारा जो यज्ञादि कर्म्म किये जाय है उनका अधियज्ञ कहे अधिष्ठाता और कर्मफलदाता कोहै अधियज्ञ का स्वरूप पूछिकरके अब उसका अधिष्ठान भूत वस्तु पूछते हैं कि हे मधुसूदन यह अधियज्ञ पुरुष इस देहमें किस प्रकारसे स्थितहोके यज्ञादि कर्म्मों का नियोगकरे अवधारण और यज्ञ फल प्रदान करते हैं और अन्तकाल में संयत चित्त पुरुष तुमकोकिस उपाय से जानते है यहां यज्ञ शब्द से सब कर्मों का ग्रहण है यह जानो २ ॥

दोहा

कोमधुसूदन देहमें अधीयज्ञ सोहोय मृत्युसमें तो हि जानहिं कैसें जितेंद्रिय सोय २॥

9

श्रीभगवानुवाच अक्षरं परमं ब्रह्म स्वभावोऽध्या-
त्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३

शांकरभाष्यटीका

एषां प्रश्नानां यथाक्रमं निर्णयाय अक्षरमिति अक्षरं न क्षरतीति परा-
त्मा एतस्य वा अक्षरस्य प्रशासने गार्गीतिश्रुतेः ओंकारस्य चोमित्ये-
काक्षरं ब्रह्मेति परेण विशेषणादग्रहणं परममिति च निरतिशये
ब्रह्मण्यक्षरे उपपन्नतरं विशेषणं तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्य-
गात्मभावः स्वभावो इति स्वोभावः स्वभावोऽध्यात्म उच्यते आत्मानं दे-
हमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तुस्वभावो
ऽध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरः भूतानां
भावो भूतभावस्तस्योद्भवो भूत भावोद्भवस्तं करोतीति भूतभावोद्भवक-
रो भूतवस्तूत्पत्तिकर इत्यर्थः विसर्गो विसर्जनं देवतोद्देशेन चरुपुरो-
डाशादेः स्वस्य द्रव्यस्य वितरणं परित्यागः स एष विसर्गलक्षणो य-
ज्ञः कर्मसंज्ञितः कर्मशब्दित इत्यर्थः एतस्माद्धि बीजभूतात् वृष्ट्यादि-
क्रमेण स्थावरजङ्गमानि भूतानि उद्भवन्ति ३ ॥

आनन्दगिरिकृतटीका

आख्यातप्रश्नसप्तकस्य प्रतिवचनं भगवानवतारयति एषामिति क्र-
मेण कृतानां प्रश्नानां क्रमेणैव प्रतिवचने प्रष्टुरभीष्टं प्रतिपत्तिसौकर्या-
न्नु सिध्यतीति बुद्ध्यमानो विशिनष्टि यथाक्रममिति तत्र प्रश्नत्रयं नि-
र्णेतुं भगवद्वचनमुदाहरति अक्षरमिति किं तद्ब्रह्मेति प्रश्नस्य प्रतिवच-
नमक्षरं ब्रह्म परममिति तत्राक्षरशब्दस्य निरुपाधिके परस्मिन्नात्मन्य-
विनाशित्वमाभिमत्वसम्बन्धात्प्रवृत्तिं व्युत्पादयति अक्षरमित्यादिना
कथं पुनरक्षरशब्दस्य यथोक्ते परमात्मनि वृद्धप्रयोगमन्तरेण व्युत्पत्त्या
प्रवृत्तिराश्रीयते व्युत्पत्तेरर्थान्तरेऽपि सम्भवादित्याशंक्य द्यावापृथिव्या-
दिविषयनियन्तृप्रशासनस्य परस्मादन्यस्मिन्नसम्भवात्तथाविधप्रशास-
नकर्तृत्वेन श्रौतमक्षरं ब्रह्मेत्याह एतस्येति श्रुतियोगमपहरतीति न्या

गी० टी० अ०

यदोंकारे वर्णसमुदायात्मन्यक्षरशब्दस्य रूढत्वा प्रवृत्तिराश्रयितव्य
वितेत्याशंक्याह ओंकारस्येति प्रतिवचनोपक्रमे प्रक्रान्तमोङ्काराख्य
मक्षरमेवोत्तरत्र विशेषितं भविष्यतीत्याशंक्य परमविशेषणविरोधा
त् न तस्य प्रक्रमः सम्भवतीत्याह परममिति चेति विभज्याध्यात्ममिति प्र
श्नोत्तरं स्वभावोऽध्यात्ममित्यादि तद्व्याचष्टे तस्यैवेति स्वकीयो भावः
स्वभावः श्रोत्रादिकरणग्रामः सचात्मनि देहेऽहं प्रत्ययवेद्ये वर्तत
इति भ्रमं प्रतिभासे व्यावर्त्य स्वभावपदं गृह्णाति स्वोभाव इति एवं
विग्रहपरिग्रहे स्वभावोऽध्यात्ममुच्यते इत्यस्यायमर्थो निष्पन्नो भवा
तीत्यनुवादपूर्वकं कथयति स्वभाव इति तस्यैव परस्येत्यादिनोक्त
न विस्मर्तव्यमिति विशिनष्टि परमार्थेति परमेव हि ब्रह्म देहादौ प्र
विश्य प्रत्यगात्मभावमनुभवति तत् सृष्ट्वा तदेवानुप्राविशदिति
श्रुतेरित्यर्थः किं कर्मेति प्रश्नस्योत्तरमुपादत्ते भूतेति भूतान्येव भा
वास्तेषामुद्भवः समुत्पत्तिस्तां करोतीति निष्पत्तिं सिद्धवत्कृत्य विधान्त
रेण व्युत्पादयति भूतानामिति भावः सद्भावो वस्तुभावो भूतभा
ऽत एव भूतवस्तुकर इति वक्ष्यति वैदिकं कर्मेत्योक्तविशेषणं क
र्मशब्दितमिति विसर्गशब्दार्थं दर्शयन् विशदयति विसर्ग इत्यादिना
कथं पुनर्यथोक्तस्य यज्ञस्य सर्वेषु भूतेषु सृष्टिस्थितिप्रलयहेतुत्वेन
तदुद्भवकरत्वमित्याशंक्याग्नौ प्रास्ताहुतिरित्यादिस्मृतिमनुसृत्याह
एतस्माद्धीति ३ ॥

नतु जीवोप्यक्षरस्ततआह

स्वामिकृतटीका

प्रश्नक्रमेणैवोत्तरं श्रीभगवानुवाच अक्षरमिति त्रिभिः

नक्षरति न चलतीत्यक्षरं परमं यत्तत्त्वं जगतो मूलकारणं तद्ब्रह्म एतद्वै
तदक्षरं गार्गि ब्राह्मणा अभिवदन्तीति श्रुतेः स्वस्यैव ब्रह्मण एवांशतो जी
वरूपेण भवनं स्वभावः स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्तमा
नोऽध्यात्मशब्देनोच्यत इत्यर्थः भूतानां जरायुजादीनां भावमुत्पत्तिः उ
द्भवश्च आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्युक्तक्रमेण विहृद्धि
तौ भावोद्भवौ करोति यो विसर्गः देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः सर्व
कर्माणामुपलक्षणमेतत् सर्वकर्मशब्दवाच्यः ३ ॥

पैशाचभाष्यं

एवंप्रश्नानांनिर्णयार्थंभगवानुवाच अक्षरंनक्षरतीत्यक्षरंपरमात्मस्व
रूपंतद्ब्रह्मेत्युच्यते एतस्यैवाक्षरस्यप्रशासनेगार्गीत्याद्याश्रुतिः तस्यैवास्य
ब्रह्मणः प्रतिदेहंप्रत्यगात्मत्वभावोध्यात्ममुच्यते आत्मानंदेहमधिकृ
त्यप्रत्यगात्मतयाप्रवृत्तमध्यात्मशब्देनोच्यतइत्यर्थः भूतानांप्राणिनां
भावोभूतभावस्तस्योद्भवमुत्पत्तिंकरोतीतिभूतभावोद्भवकरः विसर्गो
यागः देवतोद्देशेनद्रव्यत्यागोऽसौपुरोडाशादित्यागः कर्मसंज्ञितः
तस्यभूतभावोद्भवकरत्वं अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठतइ
त्यादिस्मृतेः ३ ॥

रामानुजभाष्यटी॰

ब्रह्मेतिनिर्दिष्टंपरममक्षरंतत्रक्षेत्रसमष्टिरूपं तथाचश्रुतिः अव्यक्तम
क्षरेलीयतेअक्षरंतमसिलीयतइत्यादिका परमक्षरंप्रकृतिविनिर्मु
क्तात्मस्वरूपंस्वभावःप्रकृतिः अनात्मभूतमात्मनिसंबध्यमानंभूत॰
सूक्ष्मंतद्वासनादिकंचपंचाग्निविद्यायांज्ञातव्यतयोदितं तदुभयमा
प्यतयात्याज्यतयाचमुमुक्षुभिर्ज्ञातव्यं भूतेति भूतभावोमनुष्यादिभा
वः तदुद्भवकरोयोविसर्गः पंचम्यामाहुतावापः पुरुषवचसोभवंती
तिश्रुतिसिद्धोयोषित्संबंधजःसकर्मसंज्ञितः तच्चाखिलंसानुबंधउ
द्वेजनीयतयापरिहरणीयतयाचमुमुक्षुभिर्ज्ञातव्यं परिहरणीयता
चानंतरमेववक्ष्यते यदिच्छंतोब्रह्मचर्यंचरंतीति ३ ॥

अभिनवगुप्तकृतटी॰ ॥

इहत्वाद्ब्रह्मसकलत्वात्परंब्रह्मातएवाध्यात्मशब्दवाच्यं यतःस्वोनिजस्त॰
धर्मोचैतन्याख्योभावः तस्यचचैतन्यस्वभावस्यब्रह्मणोपरिच्छिन्नत्वात्स्व
लक्षणतयाक्रोडीकृतविश्वशक्तैश्वर्यलक्षणात्स्वातंत्र्याद्बहिर्भावा
वभासनात्मबहिर्भूतभावांतरभासनात्मायोविसर्गः क्रमेणभूतानां
ब्रह्मादिप्रमातॄणांजडानामुद्भवकारीजडाजडवैचित्र्यनिर्भासकत्व
याभूतभावस्यविगलितसकलवितथप्रपंचस्यसत्यत्वस्योद्भवकरो
तीति ३ ॥

परमार्थप्रपाटी॰ ॥

प्रश्नोत्तरंभगवानाह अक्षरमिति नक्षरतीत्यक्षरंपरमंजगतोमूलका
रणंयत्राकाशादिकमोतंप्रोतं श्रुतिरपिश्रूयतेयथा सहोवाचैतद्वै
तदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहित
मच्छायमतमोवाय्वनाकाशमसंगमस्पर्शमगंधमरसमचक्षुष्कमश्रो

गी. टी. १६.

यमवागमनोतेजस्कमप्राणमनामागोत्रमजरममरमभयममृत
मरजोशब्दमविहृतमित्यादिस्पष्टार्थं अथाध्यात्मस्वरूपमाह स्वभाव
इति स्वस्यैवब्रह्मणएवांशतोजीवरूपेण भवनं स्वभावः सएवात्मानं दे
हमधिकृत्यभोक्तृत्वेनवर्तमानोध्यात्मशब्देनोच्यते यद्वाइंदतिजाना
तीज्ञेतरात्मानमधिकृत्यवर्ततइतींद्रियमध्यात्ममित्यध्यात्ममित्यात्म
विदः भूतानांजरायुजादीनांभावोवर्तमानत्वस्थितिः उद्भवउत्पत्ति
स्तांकरोतियः विसर्गः देवतोद्देशेन द्रव्यत्यागरूपोयज्ञः कर्मशब्देनो
च्यते ३ ॥

वनमाली टी. ॥

अथक्रमेणोत्तरदानेप्रष्टुरभीष्टसिद्धिरनायासेनस्यादित्यभिप्रायवा
न्क्रमेणैवोत्तरमाह अक्षरमिति नक्षरतीत्यक्षरं परमेदेहतः स्वरू
पतोगुणतश्चोत्पत्त्यादिरहितः परमउत्कृष्टं जगदुदयादिकारणं यतो
वाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंतीति त
द्विजिज्ञासस्व तद्ब्रह्मेतिश्रुत्या एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृ
थिव्यौविधृतेतिष्ठतः सूर्याचंद्रमसौविधृतौतिष्ठतइतिश्रुत्याद्युवाद्या
यतनत्वेनोक्तमक्षरं अव्यक्तोक्षरइत्युक्तस्तमाहुः परमांगतिमितिव
क्ष्यमाणस्वस्वरूपमक्षरमत्रब्रह्मपदेनोक्तं नान्यत्किंचिद्वेदादीत्यर्थः
नेब्रसतद्विदुरित्यत्रवेदितव्यत्वेनप्रत्यक्तोजीवः स्वइत्युच्यते भावः सदे
काकारतयेश्वरोपिविद्यमानोस्ति परंसनस्वभेदग्राहकप्रत्यक्त्वादिविरो
धात् नापिस्वीयः तस्यप्रधानत्वात्प्रधानस्यलोकेस्वीयपदेनबोधना
त् जडवर्गस्तुदेहादिः स्वीयोपिनसदैकाकारतयाविद्यमानः आत्मानं दे
हमधिकृत्यवर्तमानमध्यात्मं उत्पत्त्याद्यवस्थाशून्योनिर्विकारतया
तोजीवोध्यात्मपदवाच्यइत्यर्थः भूतानांप्राणिनांजीवानांभावा
नांचजडपदार्थानांउद्भवकरः विशेषेणसर्जनं विसर्गः ईश्वरक
र्तृकः सृष्ट्यादिरूपोव्यापारइत्यर्थः यद्वा भूतानांभवनधर्मका
णांसर्वेषांस्थावरजंगमानांभावमुत्पत्तिमुद्भवंवृद्धिंकरोतियो
विसर्गस्त्यागस्तनशास्त्रविहितोयागदानहोमात्म १

कः स इह कर्मसंज्ञितः कर्मशब्देनोक्त इति यावत् अग्नौ प्रास्ताहुतिः
सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाइ
ति स्मृतेः तेवा एते आहुती हुते उत्क्रामत इत्यादिश्रुतेश्च यद्वा भू
तभावो मनुष्यादिभावस्तदुद्भवकरो यो विसर्गः पंचम्यामाहुतावापः
नि॰ पुरुषवचसो भवंतीति श्रुतिप्रसिद्धो योषित्स्वेपजः स कर्मसंज्ञित इ
त्यर्थः ३ ॥

क्रमवैजयन्तीटीका

इत्येवमर्जुनेन पृष्टोऽर्जुनसारथिर्भगवान् प्रश्नानुक्रमेणैव ब्रह्मादी
नां सप्तप्रश्नानामुत्तरमाह अक्षरं ब्रह्मेति परमं देहेन्द्रियादिभ्यो चेत
नवर्गेभ्यो विलक्षणं अक्षरं न क्षरति परिणामं प्राप्नोतीत्यक्षरं समष्टि
रूपेण जीवात्मस्वरूपं अमक्रमत्वेन लीयते क्षरं तत्समष्टि लीयते
न मम एको भवति परस्मिन्निति श्रुतेः कूटस्थोऽक्षर उच्यते इति वक्ष्य
माणत्वात् ब्रह्म ब्रह्मशब्देन भगवता मयोच्यते कथ्यते विज्ञानं ब्र
ह्म चेद्वेदेति श्रुतिरपि ब्रह्मशब्देन विज्ञानरूपं जीवात्मानं वदति
जीवात्मनोऽणुस्वरूपत्वेपि ज्ञानस्वरूपमहद्गुणाश्रयत्वाद्ब्रह्म
शब्दनिर्देशो घटते एवं तद्गुणसारत्वात्तद्व्यपदेश इति सूत्रात् स्वभा
वः स्वस्य जीवात्मनो भावः प्रकृतिः स्वभावः यस्य वा ग्निविद्यायां जा
नश्रुतेर्वेनोदितं मनात्मरूपमात्मनि संवेद्यमानं भूतसूक्ष्मं तद्वा
सनादिरूपं च मुमुक्षुभिः प्राप्यत्वेन त्याज्यत्वेन चायं तदुभयं तात्त्वम
स्ति तदध्यात्ममेवोच्यते कथ्यते भूतभावोद्भवकरः भूतानाम
नुष्यादीनां यो भावः स्थितस्तदाकारविशेषस्तस्योद्भवमुत्पत्तिं करो
तीति तथा सः ईदृशो योषित्पुरुषसंसर्गजन्यः पञ्चम्यामाहुता
वापः पुरुषवचसो भवंतीति श्रुतिप्रतिपाद्यो यो विसर्गः स दृष्टिरू
पः स कर्मसंज्ञितः अयमभावः छान्दोग्ये पंचलोकपर्जन्यपृथिवी
पुरुषयोषिद्रूपेषु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पा
ञ्चाहुतयः क्रमात्पठ्यंते तत्रास्मिल्लोके वैदिको जीवोऽमुष्यानि

गी
टी॰ अ

दृष्यादीनिग्रहयान्नह्येनितादृष्यादिमय्यः पञ्चीकृतत्वात्संवभूतस्थमाः
श्रायः श्रद्धयाहुतत्वात् श्रद्धाख्याहुतित्वरूपेणातस्मिञ्जीवे संवद्धास्तिष्ठे
ति अथतस्मिन्नरतेनतदिंद्रियाधिष्ठातारोदेवास्ताद्युलोकाग्नौजुह्वतिनद्दे
तेजीवं दिवं नयन्तीत्यर्थः इत्तास्सोमराजाख्यदिव्यदेहस्तनयापरिणमन्ते
तेनतद्देहेनसतत्रकर्मफलानिभुङ्क्तेनद्रोगावसानेऽस्मयोजीवस्सेट
ह्स्तैर्देवैः पर्जन्याग्नौहूतोवृष्टिर्भवतिवृष्टिभूतास्तास्सजीवाः पृथिव्या
गौतेहूताब्रीह्याद्यन्नभावंलभन्ते अन्नभूताः सजीवाः पुरुषाग्नौतेहू
तारेतोभावंलभन्तेरेतोभूताः सजीवाः स्त्र्याख्येऽग्नौतेहूतागर्भा
स्समासृष्टानामन्नरूपादिभावस्थयातीतिक्रमेणज्योतिहोमास्समेथा
दियज्ञादिकर्मणास्वर्गमासाद्यतत्रदेवदेहेनतत्कर्मोपभुज्यमानएड
लग्नहृतादिहश्यशेषवद्धोवैरिनोयः कर्मशेषोऽनुविमन्तुष्याद्दिदेह
लाभायविस्टव्हलन्मयानुशयशब्दवाच्यस्तन्नावेहतः कर्मशेषः
कर्मेत्युच्यतेइति ३ ॥

एवं सप्तानां प्रश्नानां क्र- मेणोत्तरं त्रिभिः ॥

मधुसूदनीटीका

अधिभूतादिनिर्णये प्रवृत्तः श्रीहरिसिद्धिरनायासेनस्यादित्यभिप्राय
वान्भगवानेकश्लोकेनत्रयंक्रमेणनिर्णयितवान् एवंद्वितीयश्लो
केपित्रयमप्यतःतीयश्लोकेत्वेकमितिविभागः तत्राधिभूतमेवा
श्रप्रावल्लिवविवक्षितंभवतिवलशीहेननसोपाधिकमितिप्रथम
मेवमाह अक्षरंब्रह्मपरमंत्विविनाशिअक्षरंतेवासर्वमितिस
र्वव्यापकंएतदेवतदक्षरंगार्गिब्राह्मणाअभिवदंतिअस्थूलम
नोविनाशुपकर्मस्यपनस्यवाप्रत्येरस्यप्रशासनेगार्गिद्युभ्याचंद्रम
सौविधृतौतिष्ठतः नान्यदतोस्तिद्रष्टृत्यादिमध्येएतस्मिन्नुखल्वक्षरेगार्गीयाआकाशओतः प्रोतश्चेत्युपसंहृतेन
पृथिव्यादिसर्वस्यप्रशासितृत्वात्याकृताकाशान्तस्य
कृतस्यप्रयवस्थापयितृत्वप्रतिभावशरीरेन्द्रियसंघातेविज्ञानात्निरुपाधि
कंचैतन्यतत्परं ब्रह्मेतिविवक्षितं एतदेवविद्वांसोमितिपरमं

स्वप्रकाशपरमानन्दरूपं प्रशासनस्य कृतस्य जडवर्गधारणस्य चालिंग
स्यतत्रैवोपपत्तेः अक्षरमम्बरान्तधृतेरिति न्यायात् न त्विहाक्षरशब्द
स्य वर्णमात्रे रूढित्वात् श्रुतिलिंगाधिकरणन्यायमवलंव्य रूढिर्यो
गमपहरतीति न्यायेन रथकारशब्दं न जातिविशेषवत् प्रणवाख्य
मक्षरमेव ग्राह्यं तत्रोक्तलिंगासंभवात् ओमित्येकाक्षरं ब्रह्मेति
वपरेण विशेषणात् आनर्थक्यप्रतिहतानां विपरीतं बलाबलमि
ति न्यायात् वर्षासु रथकार आदधीतेत्यत्र तु जातिविशेषेनासंभ
व इति विशेषः अनन्यथासिद्धेन तु लिंगेन श्रुतेर्वाधः आकाशस्त
ल्लिंगादित्यादौ विहतः एतावांस्त्विह विशेषः अनन्यथासिद्धेन तु लिं
गेन श्रुतेर्वाधे यत्र योगः संभवति तत्र स एव गृह्यते मुख्यत्वात्
यथा ज्योतिःस्तवने ऽष्टिःस्तुवने इत्यादौ यथा वात्रैवाक्षरशब्दे यत्र तु
योगोपि न संभवति तत्र योगरूढिः यथाकाशप्राणादिशब्देषु आ
काशशब्दस्यापि ब्रह्मणि आसमंतात् काशत इति योगः संभवतीति
चेत् स एव गृह्यतामिति पक्षः परिकृतः तथा च पारमर्षं सूत्रं प्र
सिद्धमिति कृतमत्र तद्विस्तरेण तदेवं किं तद्ब्रह्मेति निर्णीतं अधुना
किमध्यात्ममिति निर्णीयते यदक्षरं ब्रह्मोक्तं तस्यैव स्वभावः स्व
भावः स्वरूपं प्रत्यक्चैतन्यं न तु स्वस्य भाव इति षष्ठी समासः ल
क्षणाप्रसंगात् षष्ठीतत्पुरुषवाधेन कर्मधारयपरिग्रहस्य श्रुतप
दार्थान्वयेन निषादस्थपत्यधिकरणसिद्धत्वात् तस्मान्न ब्रह्म
णः संबंधि किं तु स्वरूपमेव आत्मानं देहमधिकृत्य भोक्तृतया
वर्तमानमध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते तत्करणग्रा
म इत्यर्थः यागदानहोमात्मकं वैदिकं कर्मैवात्र कर्मशब्देन वि
वक्षितमिति तृतीयप्रश्नोत्तरमाह भूतानां भवनधर्मकाणां सर्वे
षां स्थावरजंगमानां भावमुत्पत्तिमुद्भवं वृद्धिं च करोति यो विसर्गः
त्यागस्तद्वाक्यविहितो यागदानहोमात्मकः स इह कर्मसं
ज्ञितः कर्मशब्देनोक्त इति यावत् तत्र देवतोद्देशेन द्रव्यत्यागो यागः

गी
टी· अ·

इति एतैर्होमो वषट्कारप्रयोगांतः सदर्होपविष्टहोमः स्वाहाकारप्रयो
गांतः आसेचनपर्यंतो होमः परस्वत्वापत्तिपर्यंतः स्वस्वत्वत्यागो दानं
सर्वत्र च त्यागांशोनुगतः तस्य च भूतभावोद्भवकरत्वं अग्नौ प्रास्ताहु
तिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति
स्मृतेः तेवा एते आहुती हुते उत्क्रामत इत्यादिश्रुतेश्च [illegible]
[illegible] ॥

सदानंदीटीका ॥

प्रश्नक्रमानुसारेण भगवानुत्तरं त्रिभिः

अनायासेन बोधार्थमुवाच हरिरीश्वरः निरुपाधिकमेवात्र ब्रह्मता
लि विवक्षितं अविनाशपरत्वं ब्रह्म सर्वव्यापकमुच्यते सर्वस्याव्या
कृतांतस्य जगतो धारकं परं शरीरेंद्रियसंघाते विज्ञानं निरुपाधि
कं चैतन्यं स्वप्रकाशयत् तद्वलितमयेदिति प्रतिदेहं वतस्यैव प्रत्य
गात्मतया स्थितिः स्वोभावः स्वस्वरूपं यत्तत्प्रज्ञैचैतन्यमेव हि
उच्यते ध्यात्मशब्देन नेंद्रियग्राम इत्ययं यागहोमादिकैर्मेव प्रा
क्तं तत्कर्मशब्दतः विसर्गो देवतोद्देशात्पुरोडाशादिवस्तुनः स
र्वभूतसमुत्पत्तिकरो यागादिकर्म तत् यज्ञादेः कर्मणो वीजभूता
न्नादृष्टादिकक्रमात् चराचराणि भूतानि जायंते तत्तदुच्यते

नीलकंठी टीका ॥

क्रमेणोक्तानां प्रश्नानामुत्तरमाह अक्षरमित्यादिभिस्त्रिभिः तत्र किं तद्ब्रह्मे
त्यस्योत्तरमक्षरं परमं ब्रह्मेति यत्परमं अक्षरं तद्ब्रह्मेति योजना अक्षरश
ब्दस्य वर्णेषु रूढत्वात् ओमित्येतदक्षरमिमादिश्रुतौ ओमित्येकाक्षरं ब्रह्मे
तिस्मृतौ च दर्शनेनात्रापि प्रणवस्याक्षरशब्देन ग्रहणप्रसक्तौ परममिति।
विशेषणं प्रणवस्य परमत्वासंभवात् अनश्वरत्वेन एतद्वै तदक्षरं गार्गि ब्रा
ह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमिति श्रुतिप्रसिद्धमक्षरं वैके
रमेवात्र अक्षरशब्दितं तद्ब्रह्मेति शेषः यदा अक्षरशब्देन जीवः कूटस्थो
ऽक्षर उच्यते तत्त्वम: ... गीतासु तत्त्वं प्रधानममृताक्षरं हरः त

शात्मानावीशतेदेवएकइतिश्रुतौचकूटस्थपदेनाम्नातपदेनचविशेषि
तस्याक्षरपदस्यजीववाचिनिदर्शनात् अमृतोक्षरमिमपेहेतेउत्क्रामा
वष्कंदस: तथाचात्तत्रंजीवात्वंपरमंब्रह्म परममितिविशेषणे
नसोपाधिकस्यपूर्वाध्यायोक्तस्यव्यावृत्ति: नहिजीवस्यसोपाधिक
स्यब्रह्मभाव:संभवति व्यावर्तकोपाधेर्मायादर्पणोजायतित्वेनयोरभे
दायोगात् किंतद्ब्रह्मेतिप्रश्नेपरममितिविशेषणाभावेपितद्ब्रह्मन
हि:कृत्स्नमितिप्रश्नोत्तरकेसत्वेपरमत्ववाविनाकृत्स्नपदेनब्रह्म
णोविशेषितत्वादन्तरेपिब्रह्मणएवपरममितिविशेषणंशक्यतएव
प्रश्नेपितत्कृत्स्नेनकृत्स्नत्वमेवगृह्यतात् ततश्चकिंतत्कृत्स्नंब्रह्मेतिप्र।
श्नेपदक्षरंजीवात्मेनदेवग्रपेतोपाधिमेवंयंमतत्कृत्स्नंब्रह्मेतितत्व।
मसीतिमहावाक्यार्थ:प्रतीचोब्रह्मभाव:प्रतिपादितोभवतीतिद्र
ष्टं तथाच्छो:नागतकोभाव:स्वरूपंस्वभाव:शुद्धत्वंपदार्थ:सोध्यात्म
मुच्यते भाष्येनतस्यैवपरस्यब्रह्मण: प्रतिदेहंप्रत्यगात्मभाव:स्वोभा
व:स्वभावोध्यात्ममुच्यतेअध्यात्मशब्देनाभिधीयतइति विसर्गोदेव
तोद्देशेनद्रव्यत्यागात्मकोयाग:सकर्मसंज्ञित: तमेवविशिनष्टि भू
तेति भूतानांभाव:सात्विकादिस्वभाव:उद्भवस्तयो:करणात्भूत
भावोद्भवकर: तथाहि वृद्धि:कर्मानुसारिणीतिकर्मानुसारित्वंभा
वस्यस्मर्यते तथाउद्भवोपिकर्मतएवस्मर्यते अग्नौप्रास्ताहुति:सम्य
गादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंतत:प्रजाइति ३

एषांप्रश्नानांक्रमेणोत्तरलक्षणं॥ आनंदीटीका

अक्षरंनित्यस्वभावान्मत्स्वत्वंयत्तन्निर्विकारंअक्षरंतेसर्वंनतज्जानामि
महत्वंसर्वव्यापकत्वा परमंब्रह्मपरमात्मसंज्ञम् स्व:स्वकीय:परा
ब्रह्मणोभाव:अंश:जीवादिप्रकृतिवर्ग: अध्यात्ममुच्यतेआत्मानमधि
कृत्योयत्रवर्ततिक्रियाविशेषणत्वादात्माधीनप्रवृत्तिरित्यर्थ: भू
तानांभावस्तस्यानस्योद्भव:सत्तात्न:स्थितानामेवबहिरवभासनंतं
करोतीतीदृश:विसर्ग:विविधसृष्टिरूप:कालापेक्ष:पारमेश्वरोव्या
पार:कर्मसंज्ञित: ३ ॥

रामकंठीटीका

गी॰
टी॰
अ॰

15

यथोक्तप्रश्नव्याकरणार्थं भगवानुत्तरमाह तद्ब्रह्मकिमुच्यते इति
प्रश्नेनावगतेरे परममक्षरंब्रह्म नक्षरति नसंचलयति नस्वरूपाच्च्यवती
त्यक्षरंद्विरूपमुच्यते तच्चद्विप्रकारंसंभवति ब्रह्मरूपंजीवरूपंच यद्ब्रह्म
रूपंतत्परमेतस्य नकदाचित्स्वरूपाच्चलनंभवति यतस्तस्यप्रपञ्चतः
स्वरूपंजन्मविनाशादिभावविकाराःसंस्पृष्टैकचिन्मात्रलक्षणेसहजा।
निमानवैकधर्मकैःसकलविश्वभावावभासकत्वादिस्वरूपमपिवि
स्वभाववरवलेशघलेनकथंचिदप्यसंगतत्वात्तेभ्योव्यावृत्तिरितिकेप्रतिपा
दितमेव जीवरूपंनकूटस्थत्वेसमस्तंभवति किंत्वपरंपरंब्रह्मैवमस्याव
नावस्थितंयततस्यमायावशात्तत्स्वभाववशात्कृतनभावाहं यस्याल।
स्वेमतिदेहादिशाकृतभावचवमनयोजन्ममरणादिकेवातत्स्वरूपम
तुविद्याधानस्यस्वरूपप्रवृत्तिसंबद्धेसमपरमक्षरंवे यदहयति हावि
मोऽप्रकृष्टोलोकेइमादि इमंब्रह्मापेक्षयाजीवानांनिमग्नत्वेपिप्रतिपादि
तोपपमानिकृष्टमक्षरंवेपरमंक्षरंवसमेति प्रथमप्रश्नस्योत्तरमध्या
त्मंकिमुच्यतेइत्यस्योत्तरम् स्वभावोऽध्यात्ममिति स्वभावशब्देनभूमि
रापइत्यादिना ययेदंधार्यतेजगदित्यन्तेनग्रन्थेन परापराचप्रकृ।
तिर्भगवताप्राक्प्रतिपादितेहोच्यते एवंप्रकृत्यात्मकः स्वभावः परम
कारणरूपस्तमात्मावभासितनानात्माधीनत्वादध्यात्ममित्यर्थः आ
त्माहिपरमेश्वरोऽजडत्वेननविभागेनस्वेच्छयात्मानमेवावभासयति
तेउक्तं कल्पयमानात्मनात्मानमात्मात्मा इवः स्वमायया सएवकृत्स्नेनभे
दानितिवेदान्तनिश्चयः एवंद्विप्रकारप्रकृतिलक्षणस्वभावस्यात्माधी
नत्वादध्यात्ममुच्यतइतिद्वितीयप्रश्नस्योत्तरम् अथकिंकर्मेत्योत्तरं
विसर्गः कर्मसंज्ञितइति विसर्गोविशिष्टापराब्रह्मव्यतिरिक्ताः सृष्टिः
कर्मेतिसंज्ञितः तस्यहेतुगर्भंविशेषणमाह भूतभावोद्भवकरः भू
तानांजडाजडप्रकृत्यात्मकानांयोभावः सत्ता जडाजडानांप्रवाहइतिसता
रूपा येननानामनोयविभक्तेपिकूटस्थनिमतानारूपानस्यभावस्यो
द्भवंतयावभासनरूपामभिव्यक्तिंयःकरोतिसन्तर्यामी ईश्वरेच्छया
नादिनाप्रवर्तनेनजडत्वेनतत्प्रकृत्योर्यः संयोगास्तेनकृतायः स्वपंचः।
मयः सर्गः सततयोः कर्मेत्युच्यते यतउक्तंप्राक् एतद्योनीनिभूतानि

सर्वाणीन्द्रपथारयेति एवंतु ख्यादिष्ट्वी पर्यन्तप्रपंचलक्षणो जडा
याः प्रकृतेर्यो विविधः सर्गस्तथा चन्द्रशविधगाणिप्रपंचलक्षणो
जीवभूतायाः प्रकृतेर्विविधः सर्गः स तयोः संयोगजत्वात् योऽकु
र्मणः कर्मत्वेन विसर्ग उक्तः इति लक्ष्मीयपश्रद्धेयो नरम् [illegible]
[illegible] १ ॥

लातिकी [illegible]टीका

अत्रोत्तरं श्रीभगवानुवाच नदति नचलति निस्तरंगमहोद-
धिवन्न स्पन्दते इति अक्षरं तत्त्वपरमं पूर्णं नतकूटस्थात्मवद्देहा
वच्छिन्नं तदेव परममक्षरं ब्रह्मोच्यते बृहत्त्वाद्बृंहकत्वाच्च यस्य
हि पूर्णानन्दघनतया सतोऽपि पूर्णाहम्भावस्यात्मगततयानन्त-
त्याप्रतीतिस्तत्त्वं तत्त्वं शैवैः परमशिव इत्युपदिष्टं तदुक्तं सर्वथा-
त्वन्तरालीनानन्ततत्त्वौघनिर्भरः शिवश्चिदानन्दघनः परमाक्षर
विग्रह इति अत्र श्रीमदभिनवगुप्तपादैर्विहृतं यथा नखलु भग-
वति श्रीपरमशिवे प्रमेयकथाकाचिदस्ति तत्त्वौघस्य सर्वथा त-
त्रचिद्रूपतामात्रविश्रान्तत्वेन लीनत्वादित्यादिनेति तस्यैव चिद्रू-
पस्य ब्रह्मणः स्वभावः स्वोऽनिहृतधर्मो वै तस्मात् स्वो भावस्तत्त्वत्वेवा
यप्रकारो ध्यात्ममुच्यते आत्मानं पूर्णस्वस्वरूपं विग्रहत्वेनाधिकृ
त्य वर्तमानत्वात् अत्र पूर्णाहम्भावस्यात्मगततया प्रतीयमानत्वा
च्छैवैः शिव इति तत्त्वेनिर्दिष्टं तदुक्तं यदयमनुत्तरमूर्तिर्निजेच्छ-
याखिलमिदं जगत्स्रष्टुं पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्य-
ते तज्ज्ञैरिति तस्यैवाध्यात्मात्मस्य क्रोडीकृतविश्वशक्तेः सात्मा
भूतानां जडाजडरूपाणां भावबहिर्भावावभासनात्मकं बहिर्भूत
भावान्तरावभासनात्मकं तयोद्भवमवस्थानं करोतीति भूतभावो
द्भवकरो यो विसर्गो विविधत्वेन तत्तद्रूपतया सर्गः तदैत्ततवउक्तस्या
प्रजायेयेत्यादि श्रुतिसिद्धं वितर्जनं कर्मसंज्ञितः यस्य शक्त्यादा-
यः सत्ता विहिताः तदुक्तं स एव विश्वमीशितुं स्याततं कर्तुं च उन्मु-
खो भवन् शक्तिस्वभावः कथितो हृदयत्रिकोणमधुमांसलोल्ला
सः कर्मणः सदाशिवत्वरूपो वशो पर ईश्वररूपानतत्वात् किं चिन्मा

गी॰ अ॰ टी॰

अमुद्देकान्तरहस्यद्भिः कथितः किन्त्वान्तरदृशोद्देकान्तादाख्येतत्त्वमा
दितः बहिर्भावपरत्वेन परतः परमेश्वरं [illegible] ऐव
[illegible] जातमाह ३

पंचोलीटीका

15

एषां प्रश्नानां यथाक्रमं निर्णयाय भगवानुवाच अक्षरमिति ।
हे अर्जुन परमं अक्षरं परमात्मब्रह्मस्वभावस्तस्य ब्रह्मणः प्रतिदे
हे स्वकीय आत्मभाव अध्यात्म उच्यते आत्मानं देहमधिकृत्य स्वा
त्मतया प्रवृत्तं चैतन्यम् अध्यात्मं भूतभावोद्भवकरो विसर्गः प्राणि
देहोत्पत्तिकरः सर्गः देवतोद्देशेन पशुपुरोडाशादेर्द्रव्यस्य उत्स
र्गः कर्मसंज्ञितः ३

अमावीरसमिद्धोधिनी॥

अथात्र यथाक्रमेण प्रश्नसप्तकं व्याकुर्वन्नुत्तरं भगवानुवाचाक्षर
मित्यादिना श्लोकत्रयेण तत्र किं तद्ब्रह्मेत्युच्यते इति प्रथमप्रश्नस्याव
उत्तरयति अक्षरं ब्रह्म परममिति अक्षरं परममिति द्विविधं ब्रह्म
व्यतन इति संबंधः अस्यार्थः वेदस्तत्त्वं तपो ब्रह्मेत्यनुशासनाद्ब्रह्म
वेदः तस्मात्तदुद्दृष्टस्तावान्न क्रियाधिकृतं हि प्रकारं यथा अक्षरं
अक्षरः पाषाकैः रमन्ते येन प्रमाणभूतेनेत्यक्षरं स्तुतकीडविधायकं
तथा परमं परं प्रधानभूतमीनतिहिंसतिये न प्रवर्तकभूतेनोपायज्ञाप
कभूतेन चेति परमं त्रिवर्गे प्रवृत्तिजनकमुपायज्ञापकं च अथ
वाक्षरं अक्षरमिति क्रियेनापूतं तेषां कर्मचक्रे व्यवहारेकलिङ्गम इतिना
मानुशासनादेवं प्रजाव्यवहारे रतेति येन प्रवर्तकेनोपायज्ञापके
नचेत्यक्षरं प्रजापालनधर्मात्मिद्रूपं तथा परमं श्रेष्ठहूरानात्मोत
गः परः इत्यनुशासनात्परां श्रेष्ठां ब्राह्मणादीन्मानयति पूजयति
येन तत्परमं गोब्राह्मणरक्षाशुश्रूषादौ प्रवर्तकमिति वा तद्वर्ल्य
प्रतिपरमेश्वरेण वेदरूपधारस्य धर्मस्य तिकर्तव्यता बोधितेति बो
दनात्मकत्वं च नित्यनैमित्तिके काम्ये प्रकृतस्य प्रवर्तकं उपाय
ज्ञापकं काम्यधर्मशीयं वचनं विधिरिति विधिश्चोदनेति पर्यायो

अथिहतस्य ब्राह्मणादिवर्णत्रयस्येत्यर्थः तथाचक्षत्रियाधिकृ
तः प्रतिपादितहिप्रकाशेवेदो ब्रह्मस्वरूप प्रकारइतिफलितोर्थः
तथाचव्यासः आहूतोननिवर्तेतद्यूतायचरणायचेति परावाप
स्य क्षत्रियोहिप्रजारक्षांप्राप्य शस्त्रपाणिःप्रदंडयन् निर्जित्यपरसै
न्यानिक्षितिंधर्मेणपालयेदिति मनुरपि समोत्तमाधमैराजा
त्वाहूतःपालयन्प्रजाः ननिवर्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरन्नि
ति तथा संग्रामेष्वनिवर्तित्वंप्रजानांचैवपालनं शुश्रूषाब्राह्म
णानांचराज्ञःश्रेयस्करंपरमिति राजावात्रसमान्यतः क्षत्रिय
जातिरुच्यते श्रेयस्करमिति ऐहिकामुष्मिकभोगापवर्गलक्ष
णोभयफलंप्रयोजकमुक्तं तथैवाह सर्वाध्यायांते ब्रह्मादिस
मपदार्थज्ञानेसत्येवप्रयतनस्यजरामरणमोक्षायेतिप्रयोजनं
फलितिप्रहृतये आदावेवकथितं तथाचैषामासनासत्फलेवे
तिभावः ननुवराहमिहिरादिभिराप्तैः मघांगनावादितन्त्र
गीतानृत्त्राहृष्याद्यामृगयाद्युनिष्ठ परोक्तानिंदेवकामजानि
दशैव विषयव्यसनानिदुःसहानीतिपरिभाषितेषुदशसंख्येषुव्य
सनेषु मद्यादिदमनयानामास्पदं मद्यमाहुः ननुयतमतिसत्व
श्रेयसांकर्षणायसमुपद्वतमतिः संस्तत्रयानेंद्रियत्वाद्गणयति
नहिमद्याभक्ष्यमन्यानिचैव अन्यानिगम्यागम्यादीनि तथा
पत्नीयद्यपिमातरंमदवशात्पत्नीवमाचीयतिस्वश्रीयत्यपिमं
दिरंक्षयथापिलेहूपंचगेहीयति स्वल्पंवाप्युदधीयतीश्वरमपांमो
दात्स्यलीयत्यपि मित्रीयत्यपिपार्थिवं किमपरंक्रुयाद्युयन्मय
पः तथा भूयोपिदीव्यतिजितोजयलिप्सयैवप्राप्नोतितत्सवि
प्रोषतरंकदाचित् हृत्वाप्रियाणिमद्धतः परितप्यचांतेभूयः पि
वेत्किमपिदोषविशेषकांक्षी तथा योगाचारविवर्जितः साधव
त्यक्तः सहिहंतुयवैनिः शंकोनिरपत्रपोगतघृणः क्रुद्धाद्दवामा
मानः वंधुनांस्यनिवंधनंनपापपथ्योलोकद्वयेनेक्षते मायावीकृ
लपांसनश्चकितवोदोषार्णवोनिः स्मरइत्यादिनातद्दोषाविष्कार

१८

ग्गेन विजिगीषुं राजानं प्रति निषिद्धेषु अभ्यागमोत्सवभिषववा-
मोपदेशो: कामं पिबेदमति लोपहृदप्रकामं द्यूतं विनेन्द्रियसत्वा
निहितानि धुनयास्यन्यस्य जीवितफलं विषयैर्विना किमित्यादि
ना व्याख्याद्विविषयेवैयायन्तुमत्यासौ आमरण्याहेच यागे मयस्य
मिश्रायभ्यागमे विवादोत्सवासेच वादित्रनृत्यगीतादेः अतोचस्व
कामित्याः अन्येषां च यथाकालानतिक्रमेणात्यासक्तिं हिंसाक
थं वित्तं भावितेपि सेव्यत्वे द्यूतं विनेति साक्षाडक्तेरन्येभ्यः सकृपा
देषाति पापावहत्वाद्यूतं सर्वथैव निषिद्धमिति कथं तस्य वेदप्र
तिपादितत्वं संघटते श्रुतिविरुद्धे वद्धि स्मृतिरिति चेत्सत्यं किंतु
स्वातन्त्र्येण मृगयांगनादिवत्स्वविधियथाकालविनोदार्थं वा संसेवनं
व्यसनापरपर्यायमेव निषिद्धं न तु नः प्राग्भिराहृतस्य राज्ञस्तद्धि
नादिजयपूर्वकं तज्जयरूपं कं धर्म्यमिदमिति बुद्ध्या च वितमपीति
पनदभिप्रायेणैव परिभावणपथे कामजानीत्युक्तं कामात्स्वैव
षणार्थं लोभविनोदादिरूपात्स्यहति विषयीभूतानीति तदर्थः त
नष्वघुहप्रतिनिधिभूताद्यूतक्रीडापि चेन्द्रियं प्रति वेदेनैव प्रतिपा
दितात्लीभ्यत्वं प्रसेति तितथैव व्याख्याते अतएव प्राहृतोन नि
वर्तितेत्यादिव्यासोक्तिरप्यन्वर्था यद्वा परमं उक्तनयेन रिपुवधे
गोब्राह्मणत्वेदाम्भूपादेव प्रवर्तकस्तदुपायस्तापकश्च द्क्रिया
थिकृतो वेदो ब्रह्मस्वरूपः प्रकार इति कीदृशात् तद्भगवत्त्वं प्राप्त
विस्ताः परमेश्वरात् ह्वरति स्रवति प्रकटीभवतीत्यत्र यस्य निः
श्वसितं वेदा इति श्रुतिरत्र प्रमाणं तथा च परमेश्वरस्य श्वासरूपेण
प्रकटीभूतो वैरिव्यातादिप्रवर्तको वेदो ब्रह्म पाहार्थ इति फलितो
र्थः इति प्रथमः प्रश्नो निर्णीतः अथ किमध्यात्ममुच्यते इति द्विती
यमपि निर्णाययति स्वभावोध्यात्ममुच्यते इति भावः समासस्वभा
वाभिप्रायचेष्टात्मनन्तमस्विति नामानुशासनात् अस्य विसर्गो भावोद्भ
भिप्रायः तत्रादिरूपकन्जनगदुपलवनिमित्तीभूतास्वरवयादि
लक्षणः अभावः हपूर्णसर्वजगद्धितानुविधायितावाच्छोभनोभावः

स्वभावः सौष्टवंच यदायदाहिधर्मस्येत्यादिनाश्लोकद्वयेनप्रागेव
प्रतिपादितेसतादृशः परमेश्वरस्वभावः अध्यात्ममित्यध्यात्मश
ब्देनोच्यते आत्मनोयत्नप्रतिबुद्धिजीवात्मनस्तद्गोचरयिकत्यवर्तमा
नत्वात् अयंभावः परमेश्वरोऽक्षरनिग्रहायधर्मं तत्तद्धीरधुरूपरूपेण
स्वयमभिनवेनमूर्तिविशेषेणावावतरति अव्यभिचारिणीचन
दिक्षाअतोवमपंभाविनिमहावीरअथानेनतदंशानुप्राणितोदंस
मर्थस्तदनुगृहीतश्चयमोविस्तार्येहिकंराज्यसुखादिकंपारत्रि
कंस्वर्गादिलोकसुखंचभुक्त्वांतेपवर्गमपिप्राप्स्यामितिकोति
भावेनिमित्तमात्रभूतस्य कष्टपापसंबंधस्तादिक्षाप्रेरितस्यास्वतं
त्रस्यस्वोचितकर्मप्रवृत्तस्य पुण्यराशिसंविन्नानस्यममेतिनिश्च
येनप्रवृत्तिरध्यात्मशब्दार्थस्तानमपुक्तेत्यवंद्वितीयोनिर्णीतः
अधुनाकिंकर्मेतितृतीयप्रश्नंनयति भूतभावोद्भवकरोविसर्गः
कर्मसंज्ञितइतिपुक्तं स्मादाहृतेभूतंप्राणिनीतेसमेविधिषिति
कोधाराभूतानांसमानांविद्याविनयेत्यत्रप्रतिपादितसाम्ययोगा
रूढानांभावः येनदेहेनापदार्थेषाहृज्ञानेप्रवर्तितेसम्यकप्रव
त्तिनिमित्तीभूतोजातिगुणक्रियाद्यन्यतमरूपोधर्मः सचासक्रि
यात्मकस्तस्योद्भवः प्राकट्यंतंकरोतीतितादृशोविसर्गः सर्ग
विपर्ययः संहारोरिपुव्रातलक्षणः विसर्गोविसर्जनंबाणादीनां
मोक्षोवासकर्मसंज्ञितः कर्मशब्दाभिधेयइत्यर्थः येनविधी
मानेनपतेभूताः सर्वत्रपुत्रमित्ररिपवादिषुसमदर्शिनइतिक्ष
त्रेषुव्यपदेशः अयुज्यतेसरिपुव्रातबाणमोक्षादिलक्षणक्रि
यारूपोधर्मः कर्मशब्दार्थइतिभावः इतितृतीयोनिर्णीतः ३

मधुभाष्य

भाषा अनुवाद टीका ॥

श्रीकृष्णभगवान इस श्लोकसे लेकर तीन श्लोक के द्वारा अर्जुन
की प्रथमक प्रश्न का सिद्धान्तरूपउत्तर कहते हैं कि नक्षरति गच्छ
ति इति अक्षरं अर्थात् जिसका गमन औ आगमन नहीं है सोई
अक्षर ब्रह्म है जो कहो कि जीव चैतन्य भी अक्षर होय न कोई
तो कहते हैं किनही जो परम अक्षर कहे जगत का मूल कार
ण है सोईब्रह्म जानोक्यो कि श्रुतिमे भीकहा है कि हे गार्गि वद
इसी ब्रह्माण्ड ही को सोई ब्रह्म कहते हैं यह बात प्रसिद्ध है और
उसी ब्रह्म का अंश जो जीव रूप होनेसे नाम स्वभाव और देह
आदि अङ्गीकारकरिके भोक्तारूप से वर्तमान है वह जीवही अ
ध्यात्म कहा है और भूत कहे जरायुज आदिकोंकी उत्पत्ति और
उद्भव शब्दका यह अर्थ है कि सूर्यसे वर्षा वर्षासे अन्न औ अन्न
से प्रजा ऐसे क्रमसे उत्तमरूपजो वृद्धिसोभूतोंका भाव और उद्भ
वकारीजो विसर्ग अर्थात् सर्व कर्म का उपलक्षणरूप देवतों
को उद्देश करि द्रव्य त्यागरूप जो यज्ञ सोइ कर्म है ३ ॥

दोहा ॥

अक्षरपरमस्वभावहि ब्रह्मअध्यात्मसोय भूतस्थिति उत्पतिक
रें हरेंकर्मसो होय ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽ
हमेवात्र देहे देहभृतांवर ४ ॥

शाङ्करभाष्यटीका

अधिभूतमिति अधिभूतं प्राणिजातमधिकृत्य भवतीति कोसौ क्षरः
क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्त्वित्यर्थः पुरुषः
पूर्णमनेन सर्वमिति पुरि शयनाद्वा पुरुषः आदित्यान्तर्गतो हिरण्य
गर्भः सर्वप्राणिकरणानामनुग्राहकः सोधिदैवतं अधियज्ञः सर्वय
ज्ञाभिमानिनी देवता विष्णवाख्या यज्ञो वै विष्णुरिति श्रुतेः स हि विष्णु
रहमेवात्रास्मिन्देहे यो यज्ञस्तस्याहमधियज्ञः यज्ञो हि देहनिर्वर्तत्वेन
देहसमवायीति देहाधिकरणो भवति देहभृतांवर ४ ॥

आनन्दगिरिकृतटीका

संप्रति प्रश्नत्रयस्योत्तरमाह अधिभूतमिति अधिभूतं च किं प्रोक्तमि
त्यस्य प्रतिवचनमधिभूतं क्षरो भाव इति तत्राधिभूतपदमनूद्य पूर्वोक्त
मर्थं कथयति अधिभूतमित्यादिना तस्य निर्देशमन्तरेण निर्ज्ञातुमश
क्यत्वात् प्रश्नद्वारा तन्निर्दिशति कोसाविति कार्यमात्रमत्र संगृहीतमि
ति वक्तुमुक्तमेव व्यनक्ति यत्किंचिदिति अधिदैवं किमिति प्रश्ने पुरु
षश्चेत्यादिप्रतिवचने तत्र पुरुषशब्दमनूद्य मुख्यमर्थं तस्योपन्यस्यति
पुरुष इति तस्यैव सम्भावितमर्थान्तरमाह पुरिशयनाद्वेति वैराजे देहमा
साद्य आदित्यमण्डलादिषु देवेषु योन्तरवस्थितो लिङ्गात्मा व्यष्टिकर
णानुग्राहकोत्र पुरुषशब्दार्थः स चाधिदैवतमिति स्फुटयति आदित्येत्या
ति अधियज्ञः कथमित्यादि प्रश्ने परिहरन्नधियज्ञशब्दार्थमाह अधिय
ज्ञ इति कथमुक्तायां देवतायामधियज्ञशब्दः स्यादित्याशंक्य श्रुतिमनु
सरन्नाह यज्ञो वै इति सैव देवताधियज्ञशब्देनोच्यते सा च ब्रह्मणः प्र
काशादत्यन्ताभेदेन प्रतिपत्तव्येत्याह स हि विष्णुरिति शास्त्रीयव्य
वहारभूमिरत्रेत्युक्ता देहसामानाधिकरण्याद्वात्रेत्यस्य व्याख्यानं अ
स्मिन्निति किमधियज्ञो बहिरन्तर्वा देहादिति सन्देहो माभूदित्याह
देह इति ननु यज्ञस्य देहाधिकरणत्वाभावात् कथं तथाधियज्ञत्वमिति

देवतात्वं भगवतो विवक्ष्यते नत्वाह यज्ञो हीति एतेन तस्य बुद्ध्यादिव्यतिरि क्तत्वमुक्तमवधेयं न हि परा देवता दर्शितरीत्याधियज्ञशब्दिता बुद्ध्यादि ष्वन्तर्भावमनुभावयितुमलं देहान् बिभ्रतीति देहभृतः सर्वे प्राणिनस्ते षामेव वरः श्रेष्ठः युक्तं हि भगवता सार्वदेव प्रतिक्षणं सम्वादं विदधा नस्यार्जुनस्य सर्वेभ्यः श्रेष्ठत्वम् ४ ॥

अधिभूतमिति

स्वामिकृतटीका

किंच क्षरो भावः विनश्वरो देहादिः पदार्थो भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते पुरुषो वैराजः सूर्यमण्डलमध्यवर्ती स्वांशभूतसर्वदेवतानामधिपतिरधिदैवतमुच्यते स वै शारीरी प्रथमः स वै पुरुष उच्यते आदिकर्ता स भूतानां ब्रह्माग्रे समवर्ततेति श्रुतेः अत्रास्मिन् देहेऽन्तर्यामित्वेन स्थितोऽहमधियज्ञः [redacted] । यज्ञादिकर्मप्रवर्तकस्तत्फलदाता च कथंभूतस्यापि स्तत्र स्थूतेनैवोक्तं इत्यहमन्तर्यामिनो संगत्वादिभिर्गुणैर्जीववैलक्षण्येन देहान्तर्व र्तित्वप्रसिद्धत्वात् तथा च श्रुतिः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचा कशीति देहभृतां मध्ये श्रेष्ठेति संबोधयन् त्वमप्येवंभूतमन्तर्यामिनं पराधीनस्वस्वरूपं तिनिः व्यतिरेकाभ्यां बोद्धुमर्हसीति सूचयति ॥४॥

पिशाचभाष्यटीका

अधिभूतं प्राणिजातमधिकृत्य भवतीति तत्तदेव दर्शयति क्षरो भावः क्षरति विनश्यतीति क्षरो भावो वस्तु विनाशि वस्त्वित्यर्थः पुरुषः पूर्णमनेन सर्वमिति पुरि शयानाद्वा इति वा हिरण्यगर्भः सर्वप्राणिकरणानुग्राहकः स एवंभूतः पुरुषोऽधिदैवतमित्युच्यते अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्णवाख्या यज्ञो वै विष्णुरिति श्रुतेः अत्र देहे कर्ममये शरीरे देहभृतां वर ४ ॥

रामानुजभाष्यटीका

अधिभूतमिति ऐश्वर्यार्थिनां ज्ञातव्यतया निर्दिष्टमधिभूतं क्षरो भावः वियदादिभूतेषु वर्तमानस्तत्परिणामविशेषः क्षरस्वभावः विलक्षणाश्च शब्दस्पर्शादिः साश्रयविलक्षणाः अथाः शब्दस्पर्शरूपरसगन्धाः ऐश्वर्यार्थिभिः प्राप्यास्तैरनुसंधेयाः पुरुषश्चाधिदैवतं अधिदैवतशब्दनिर्दिष्टः पुरुषः अधिदैवतोपरिवर्तमानं इन्द्रप्रजापतिप्रभृतिकृत्स्नदेवतोपरिवर्तमानं इन्द्रप्रजापतिप्रभृतीनां भोग्यजातविलक्षणशब्दादेर्भो क्ता पुरुषः स च भोक्तृत्वावस्था ऐश्वर्यार्थिभिः प्राप्यतयानुसंधेया अ १८
धियज्ञोऽहमेव अधियज्ञशब्दनिर्दिष्टोऽहमेव अधियज्ञः यज्ञैः आराध्य

तथा वर्तमानः अत्रैवाहं मम देहस्थेनात्मतयावस्थितोऽहमेव यज्ञेशोराध्य इति महायज्ञादिनित्यनैमित्तिकानुष्ठानवेलायां त्रयाणामधिकारिणामनुसंधेयमेतत् ४ ॥

अभिनवगुप्तकृतटी·

क्षरति स्रवति परिणामादिधर्मेणेति घटादिः पदार्थग्राम उच्यते पुरुष आत्मा सचाधिदैवतं तत्र सर्वदेवतानां परिनिष्ठितत्वात् अत एवाशेषयज्ञभोक्तृत्वेन यज्ञानवशुणकार्याणि कर्माण्यधिकृत्य यः स्थितः पुरुषोत्तमः सोऽहमेव अहमेव च देहे स्थित इति प्रश्नद्वयमेकेन यत्नेन निर्णीतम् ४ ॥

परमार्थप्रपाटी·

अधिभूतमिति क्षरो नश्वरो भावो देहादिपदार्थो भूतं प्राणिनमधिकृत्य वर्तते तदधिभूतं इष्टव्यश्रातत्रादिवा पुरुषो वैराजः सूर्यमंडलवर्ती यदेतन्मंडलं तपति यश्चास्मिन्मंडले पुरुष इति श्रुतेः स चांशभूतसर्वदेवतानामधिपतिरधिदैवमुच्यते अत्रास्मिन्देहेऽन्तर्यामित्वेनास्थितोऽहमेवाधियज्ञः देहिकयज्ञादिकर्मप्रवर्तकस्तत्फलदाता ननु तर्हि अध्यात्माधियज्ञयोः को भेद इति चेन्न अन्तर्यामिनोऽसंगत्वादिगुणैर्जीवैर्विलक्षणत्वेन तादात्म्येनेति श्रुतिनादिदं तत्श्रुतिश्च द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति रावणभाष्ये अत्र त्रैलोक्यपत्तद्वयदृष्टान्तेन जीवपरात्मानौ स्तूयेते यथा लोके द्वौ सुपर्णौ सुतपनौ शोभनगमनौ सयुजा समानयोगौ सखायौ सखायौ समानख्यानौ समानं वृक्षमेकं देहाकारवृक्षं परिषस्वजाते आश्रयः तयोरन्य एकः पिप्पलं फलं स्वाद्वत्तरमत्ति अपरः अनश्नन् अभिचाकशीति अभिपश्यति तद्वत् द्वौ सुपर्णस्थानीयौ जीवपरमात्मानौ सयुजा समानयोगौ योगो नाम संबंधः स च तादात्म्यलक्षणः स एवात्मा जीवात्मनः स्वरूपमेव मन्यस्यापि इत्येकात्म्य अत एव समानख्यानौ यस्य यादृशं ख्यानं स्फुरणं परमात्मनस्तदेवेतरस्यापि अत एव सखायौ एकरूपप्रकाशावित्यर्थः ४ ॥

वनमालीटी·

अथ क्रमप्राप्तत्रयस्योत्तरमाह अधिभूतमिति भूतान्सशरीरान्जीवान् अधिकृत्य तदुपकारित्वेन यद्वर्तते तदधिभूतं क्षरं नीतिक्षरः विनाशी कार्यरूपो भावो वियदादिः सशरीरजीवोपकारकत्वेनाधिभूतपदेनोच्यत इत्यर्थः पुरुषो जीवो विशेषो हिरण्यगर्भः हिरण्यगर्भः समवर्तताग्र

गी. तिश्रुत्या आदिकर्त्तासभूतानांब्रह्माग्रेसमवर्त्ततेत्यादिस्मृत्याचप्रतिपा
टी. दितः अधिदैवतंसर्वजीवाधिपतित्वेनजीवविशेषानधिदैवतानींद्रादी
अ. नधिकृत्याधिपतित्वेनवर्त्ततइत्यधिदैवतंपुरिशेतेइतिपुरुषः यद्यपि
जीवसामान्यमध्यात्मपदेनोक्तंतथापिहिरण्यगर्भस्यसर्वजीवगुरु
त्वाद्विशेषतोज्ञानायपृथगुक्तिः संकर्षणोवापुरुषः सर्वदेवकप्रे
रकत्वादधिदैवतं देवकप्रेरकत्वादियमविशिष्टस्यविशेषतोज्ञा
नायस्वीयरूपविशेषस्यसंकर्षणस्योक्तिः अधिगतोयज्ञमित्यधि
यज्ञ अधिगतोयज्ञोयेनइतिवा अत्रदेहेप्रत्यक्षसिद्धयज्ञादेःक
र्तृभोक्तृत्वफलदातृणांसर्वप्राणिनांदेहप्रेरकत्वेनयज्ञादिप्रवर्त्त
कत्वेनवांतर्यामितयास्थितोहमेवमांसाधियज्ञंचयेविदुरित्य
त्राधियज्ञसाहित्यस्योक्तत्वात् अक्षरंब्रह्मपरममिति परंब्रह्मत्वोक्त्या
धियज्ञस्यस्वस्मादभेदश्चेतीतितन्निरासायाधियज्ञोहमेवेत्येवका
रः तथाचदेहहृत्पुण्डरीकत्वजगदुदयादिकर्तृत्वव्यापकत्वादिना
हं ब्रह्मपदवाच्योंतर्यामितयायज्ञादिप्रवर्त्तकत्वेनाधियज्ञादि
पदवाच्यः साहित्यंचाभेदेपिमत्स्वामिवाचिंत्यशक्त्यारूपभेदे
नोपपन्नंभोक्तारंयज्ञतपसांइत्यादिना भगवतःसर्वयज्ञभोक्तृ
त्वादिनाधियज्ञत्वंप्रसिद्धमेवेति कथमिति प्रश्नस्यपरिहारःपृ
थक्नोक्तः ४ ॥

अथमैवैजयंतीटीका

एवंप्रश्नत्रयस्योत्तरमुक्त्वेदानीमन्यांस्त्रीन्प्रश्नानाह अधिभूत
मिति क्षरः प्रतिक्षणंक्षरतिपरिणमतीतिक्षरःपरिणामस्वभावो
भावःप्रकृतिकार्यरूपःस्थूलदेहादिपदार्थः अधिभूतंभूतंप्रा
णिनमधिकृत्यभवतीत्यधिभूतमितिमयोच्यते पुरुषश्चाधिदैव
तंचपुनःपुरुषःसमस्तभोगपमात्राणांप्रजापतींद्रादीनांविल
क्षणशब्दादिविषयभोक्तासमष्टिविराड्रूपोऽधिदैवतंसर्वा
णिप्रजापतींद्रादीनिदेवता ६

न्यधिकृत्यवर्त्तमानंसमाधिदैवतमित्युच्यते देहेह्यस्मिन्तावदग्रश्रेष्ठेतिस्वो
पेनमयतत्स्वसर्वेषांदेहमस्तानांश्रेष्ठेऽस्मा तोहेयाप्पोटयवस्तुतानेनवद्दले स्व.
भेनभवतीतिसूचितम् अत्रास्मिन्नाकृतिकेदेहेऽधियज्ञः यज्ञमधिकृत्य
स्व. वर्त्ततइत्यधियज्ञोयज्ञाध्यक्षत्वेनअन्तर्यामिनेश्रुमटात्मीयमूर्तेषुप्रा
जापतीन्द्रादिदेवतात्मनतयावस्थितस्तत्तद्रूपेणसर्वयज्ञैराराध्योऽहमे
वनत्वमत्तोभिन्नः प्रजापतीन्द्रादिः आत्मादित्रयाणामधिकारिणांयज्ञा
दिकर्मानुष्ठानकालेहीत्रत्वात्मधियत्तोप्राप्यतयानुसंधेयोऽपिचाध्यात्मा
दीनितत्सार्ज्ञतयाऽनुसंधेयानीतिभावः ४ ॥

४ [illegible]त्वग्रिमप्रश्न **मधुसूदनीटीका** त्रयस्योत्तरमाह ॥

क्षरतीतिक्षरोविनाशीभावोयत्किंचिज्जनिमद्वस्तुभूतंप्राणिजातमा
धिकृत्यभवतीत्यधिभूतमुच्यते पुरुषोहिरण्यगर्भःसमष्टिलिंगात्मा
व्यष्टिसर्वकरणानुग्राहकः आत्मैवेदमग्रआसीत्पुरुषविधःसयत्पूर्वो
सर्वस्मात् स्मात्सर्वस्मात्सर्वान्पाप्मनऔषत्तस्मात्पुरुषइत्यादिश्रुत्याप्रति
पादितः चकारात्सवैशरीरीप्रथमःसवैपुरुषउच्यते आदिकर्तासभू
तानांब्रह्माग्रेसमवर्त्ततेत्यादिस्मृत्याचप्रतिपादितः अधिदैवतंदेवता
न्यादित्यादीन्यधिकृत्यचक्षुरादिकरणान्यनुगृह्णातीतितिनिरुक्त्याचेत
अधियज्ञः सर्वयज्ञाधिष्ठातासर्वयज्ञफलदायकश्चसर्वयज्ञाभिमानि ^क
नीविष्ण्वाख्यादेवतायज्ञोवैविष्णुरितिश्रुतेः सचविष्णुरधियज्ञोऽहंवा
सुदेवएवनमद्भिन्नःकश्चित्अतएवपरब्रह्मणः सकाशादत्यन्ता
भेदेनैवप्रतिपत्तव्यइतिकथमितिव्याख्यातं सचात्रास्मिन्मनुष्यदे
हेयज्ञरूपेणावर्त्ततेबुद्ध्यादिव्यतिरिक्तोविष्णुरूपत्वात् एतेनसकि
मस्मिन्देहेततोवहिर्वादेहेचेत्कोऽत्रबुद्ध्यादिस्तद्व्यतिरिक्तोवेतिसं
देहोनिरस्तः मनुष्यदेहेचयज्ञस्यावस्थानंयज्ञस्यमनुष्यदेहनिर्वर्त्य
त्वात् [illegible] देहेहस्मि
तावत् सर्वप्राणिनांश्रेष्ठेऽस्मिसेवोपयन्प्रतिस्त्रणांमत्स्याभ्याणात्

गी॰ कृत कृत्यत्वमेतद्बोधय योगेयोसीति श्रोत्साहयत्यर्जुनं भगवान् अर्जुनस्य सर्व
टी॰ अ प्राणिश्रेष्ठत्वं भगवदनुग्रहातिशयभाजनत्वात्प्रसिद्धमेव [illegible]
[illegible] ४ ॥

सदानंदी टीका

प्राणिजातेंद्रियत् किं विजनिमहत्सत्माधिकं अधिभूतपदेनोक्तं विना
शीभावपवच सर्वमेतेनतिशयनात्पुरुषेवेतिवा सूर्यमंडलमध्या
स्थः पुरुषश्चाधिदैवत सर्वप्राणींद्रियाणां यः स्यादनुग्राहकः पुमान्
हिरण्यगर्भएवासावादित्यान्तर्गतः स्मृतः स वै शरीरी प्रथमः स वै पुरुष
उच्यते आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत विस्ताव्यदेवताश्रोती
सर्वयज्ञाभिमानिनी सविस्तश्चाधियज्ञोहेवा मद्देवोन मत्परः अनेन व
लाद्ध्यानेदादसंतामेदद्वोहरेः प्रतिपन्नव्यपवासिन्नदेहेयज्ञरूपतः
वुद्ध्यादिव्यतिरिक्तोस्मि विस्तरूपतयास्थितः मनुष्यदेहेयज्ञस्यावस्था
नंहरिणोरिते यतोमनुष्यदेहेनतिवर्तत्वदिकर्मणः त्वं सर्वदेहिनां
श्रेष्ठामत्त्वाविध्यात्मतितत्वं मयास्मभावणेदेतद्बोधययायोगेयोसिसर्व
या सर्वदेहिवरत्वंतप्रसिद्धं न्त्समरादिषु अर्जुनस्यैवभगवत्प्रसाद
तिशयेनैव ४ ॥

नीलकंठी टीका

तरोभावोजनिमदस्त्वकर्मफलभूतं तन्साधनभूतं वानदधिभूतमित्यु
च्यते अधिदैवतं पुरुषः सर्वासमष्टवसतीति सर्वकरणानुग्राहकः सक
लदेवतात्मा हिरण्यगर्भः अधियज्ञोयज्ञाभिमानीविस्तरेनयामी सोहमे
वेदेहेस्मिन्नत्रास्मिन्देहेदहभृतांवर ४ ॥

ज्ञानेश्वरी टीका

तरतिम्नभावान्त्यवतिविकारमामोतीतित्तरः देहेंद्रियविषयल
तणोभावोयः कस्मनपरार्थः भूतानामधिकृत्यापिवर्ततइत्यधिभूतमधि
भूतेभूताधीनलयोत्पत्तिरिमर्षः पुरिशेतेइतिपुरुषः नानावेकवव

नम् सर्वे देवताः अधिदैवतं दैवतं परमेश्वरो ऽधिकृतो यत्रतत्त्वेति वृ
भस्मानन्तकर्मफलभोगार्थं तान्स्वतान्स्वयोनिषु परमेश्वराधीनजन्मस
र्थः अत्रास्मिन्मनुष्यदेहे ऽहमेवाधियज्ञः यज्ञेषु इन्द्रयज्ञादिषु हेय
रमेश्वर एवाधिकृतस्तत्तद्यज्ञफलप्रदः यज्ञभोक्ता वेत्यर्थः ४ ॥

अध्याधिभूतं किमुच्यत इत्यत्रोत्तरं ॥ रामकंठी टीका

अधिभूतं क्षरो भाव इति क्षरः परिणामस्वरूपतया स्वरूपसंबलनपरो यो
भावः प्रतिपुरुषं विभक्तकार्यकारणकलापात्मकः पदार्थः सोऽधि
भूतमुच्यते तस्य भूताधीनत्वात् भूतरूपा प्रकृतिः कार्यकारणात्म
नाऽविपरिणमत इति क्षरो भावोऽधिभूतमिति चतुर्थप्रश्नस्योत्तरम्
अध्यात्मे दैवं किमुच्यत इत्यस्योत्तरम् पुरुषोऽधिदैवतमिति पुरुषः दे
वत इति जानाविकवचनं अतस्तेन पुरुषास्तत्तद्वासनानुगुण्येन प
रिणतप्रविभक्ततत्तत्कार्यकारणात्मकक्षरभावरूपेष्वधिष्ठाय त
यावतिष्ठमानाश्चाधिदैवतं भजन्त इति पुरुषोऽधिदैवतमिति पं
चमप्रश्नस्योत्तरम् अथा वदेहे कथं केन प्रकारेण कश्चाधियज्ञ इ
त्यस्मै प्रश्नद्वयस्योत्तरमाह अधियज्ञोऽहमेवात्रेति परस्परविभक्तक्षराभिमानावि
ष्टतानादेवतासिद्धितेस्मिन्देहे यद्यपि देवता एवाधियज्ञत्वमर्हन्ति
तन्तत्फलाभिसंधिनां तं तं यागविधिमनुतिष्ठन्तस्ताः स्वामवष्टि
तमात्मानं कर्तृत्वेनाभिमन्यमानेन पापिपारमार्थिकस्य कर्तृत्वस्या
नन्यसाधारणत्वादहमेव मुख्यः कर्ता सर्वयज्ञानामित्यहमेवाधि
यज्ञो नाम कथमिति प्रकारप्रश्ने पृष्टे तदेवाह नरसहमेवाहमित्य
नेनैव प्रकारेणाहमधियज्ञः इदमत्र तात्पर्यम् योऽपि देवतानां श
रीरग्राम्याणां नतिमितिनाहंकारो योऽधिपरस्वरूपनिष्ठाम मतयोरहं
कारत्वेनास्तिकश्चिद्भेदः केवलं मायावशात्तेषां देवतानां भवच्छेद्याद्या
नित्यभा दन॰ लम्बनतिष्ठत्वादवच्छिन्नत्वं वच्छिन्नस्य त्वहमेव नामयो ऽस्य अहंकारनिष्ठत
याधियज्ञो न प्रकारान्तरेणेति सर्वयज्ञेष्वधिकृतः प्रभुरहमेव यत्कं।
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति षष्ठस्य प्रश्नस्योत्तरम् अन्तेने

गी॰
टी॰
अ॰ ८

२२

वस्थायेनाधिभूतमहमेवेति बोद्धव्यम् भूतभावेन परमार्थेनाहमेवास्थि
तइत्यर्थः तथैवाधिदैवतत्वेन पुरुषाख्यो यः प्रकारउक्तस्तदाहमेवाधि
कृतइतिप्रश्नषट्कस्यसंक्षेपतो व्याकरणमेवं वेदितव्यम् यदुतब्रह्मात्म
ककर्मसंज्ञं परमात्मतेजस्तत्प्रकृतिपरिणामरूपं मममेतत्त्वत्रयं निर्णी
तं तत्रयथाक्रममध्यात्माधिदैवताधिभूतभावेनाहमेवतत्त्वेनाव
स्थितोनमत्तोतिरिक्तं किंचित्संभवति तथा मममेतेब्रह्मतद्विदुः
कृत्स्नमित्यादिनातत्त्वत्रयमेतदुक्तासाधिदैवं मां साधियज्ञं च ये विदु
रिति तथापकत्वेनात्मानं भगवान्निर्दिष्टवानिति प्रयाणका
लेदेहाद्देहान्तरसंक्रान्तिसमये नियतात्मभिर्निगृहीतान्तःकरणैः
कथं ज्ञेयोसीत्यत्रोत्तरम् ८ ॥

लासिकी ~~[illegible]~~टीका

एवंजीवन्मुक्तस्यज्ञेयंवस्तुजातमाख्याय विदेहमुक्तस्यापेक्षणीयमर्थजातमाह ॥
क्षरति चलति तत्तदवस्थाभेदेनेति क्षरो भावः भवनधर्मको जी
वाख्योधिभूतमुच्यते पंचभूतानिस्थूलसूक्ष्मरूपाण्यात्माध्यासे
नाधिकृत्यवर्तमानत्वात् तथा पुरुषः पुरि देहे तात्त्विकपरामर्शा
नवलम्बनेनशेते इति पुरुष आत्मा सांख्याभिमतः वेदान्ताभिम
तः साक्षीकूटस्थ इति अन्यतन्त्राभिमतः परमात्मेति सोधिदैव
तमुच्यते देवतानांकरणेश्वरीणां खेचरीगोचरीदिक्चरीभूचरी
रूपाणां चतत्रैवप्रतिनिष्ठितत्वात् तदुक्तं यतः करणवर्गोयं विमू
ढोमूढवत्स्वयं सहान्तरेणचक्रेणप्रवृत्तिस्थितिसंहृतीः लभ
तेइत्यादि तथात्रदेहेन्तर्यामित्वेनस्थितोहमीश्वरएवाधियज्ञो
॰त्ता यज्ञादिकर्मप्रवर्तकात्तत्फलदातृत्वाच्च यदस्याति ईश्वरः सर्वभू
तानांहृद्देशेर्जुनतिष्ठतीति प्रकारप्रश्नेप्येतदेवोत्तरं तथाहि अ
हमेवाहन्तयापरामृश्यपरइत्यनेनप्रकारेणाहमीश्वरोधियज्ञोना॰
मयमेवकारेणाधुनितं तदुक्तं चिद्रूपात्पञ्चाशिकायां स्वपरा॰
वभासनक्षम आत्मा विश्वमयः प्रकाशोसौ अहमिति सपक्व॰

क्तोहन्नास्यितिरीहृशीतस्येति तथा चोक्तमुत्पलदेवैः प्रकाशस्यात्म
विश्रान्तिरहम्भावो हि कीर्तितः उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरोध स्य
तः स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरताथ चेति जीवत्ववच्छिन्नदेहा
लेवनो हंकारः ममत्वानवच्छिन्नस्वस्वभावनिष्ठाहन्तेति भवति तद्भेदः
[illegible]
[illegible] ४

पंचोलीटीका

किंच अधिभूतमिति हे देहभृतां वर क्षरो भावः विनाशी भावः अ
धिभूतं प्राणिजातमधिकृत्य भवतीत्यधिभूतं च पुनः पुरुषः पु
रि शयनात्पुरुषः उच्यते आदित्यान्तर्गतो हिरण्यगर्भः सर्वव्यापक
आधिदैवतानामत्रास्मिन्देहे अधियज्ञः सोधियज्ञोहं सर्वयज्ञाभिमानी
विष्ण्वाख्या देवता सोधियज्ञोहम् ४

रसगावीरसमिद्धोधिनी॥

अथाधिभूतं च किं प्रोक्तमित्यस्योत्तरमाह अधिभूतं क्षरो भाव इति क्ष
रश्चंचलो विसंवादिफलः स विनाशफलो वा भावो भक्तिः श्रद्धालक्षणो
धिभूतशब्दवाच्यः भूतान्देवताविशेषानधिकृत्य वर्तमानत्वात् अयं
चात्राभिप्रायः मद्व्यतिरिक्तदेवताभक्तानां ताभ्यस्ताभ्यो देवताभ्यो वर
लाभादाभिचारिककर्मसिद्धावपि फलं पापगतिप्रदमेवेति प्रतिपादि
तं चैतत्कामैस्तैस्तैर्हृतज्ञानाः इत्यादिवचःश्लोकाभ्याम् अश्रद्धभावेना
न्यदेवताराधनाभिचारिकं कर्म निरयगतिप्रदं विज्ञायमामेव विशु
द्धया भक्त्या धारणीकृत्य स्वकर्मणि प्रवर्तन्ते इति भावः इत्थं चतुर्थोपि नि
र्णीतः अथाधिदैवं किमुच्यते इति पंचमं विवृणोति पुरुषश्चाधिदैव
तमिति पुरुषा वात्स्यमानवा वि ति कोपाप्तपुरुषपदेनात्र मनुष्यजातिरु
च्यते जातौ चैकवचनं तथा च पुरुषाः पौरुषलक्षणविशिष्टाः क्षत्रिया
अधिदैवतशब्दवाच्याः देवतान्यस्यादिदेवतानि वह्न्यादीन्यधिकृत्य
वर्तमानत्वात् एतदुक्तं भवति अत्र देवताधिकारिणः क्षत्रियाः यदर्थं

व तासामानाथनंसपुरुहविषयेरिपुत्वात्तद्रूपोर्थः क्षत्रियेणावश्यंसंपाद
नीयइत्यपिदैवतत्वानप्रयोजनमिति अयंपंचमोनिर्णीतः ५ अथा
धियज्ञःकथंकोत्र देहेस्मिन्मधुसूदनेत्यत्रोत्तरं अधियज्ञोहमेवात्रदेहे
देहभृतांवरेति देहेदेहभृतांवर देहंविभ्रतिपोषयंतिनिःसपत्नता
वियानेनस्वस्वरूपापन्नादितिदेहभृतः क्षत्रियजातिकास्तेषांवरश्रे
ष्ठ यद्वादेहंविभ्रतिधारयंति इत्युनिरुक्त्यायथैयेते देहभृतोमदंशांश
वतास्तेषांवरश्रेष्ठमदंशावतारत्वात् अनेनसंबोधनेन तवेदृशो
व्यामोहोनयुक्तइति दर्शयति अत्रदेहे प्रश्नवाक्यव्याख्यानसारेणास
मरेदहमेवाधियज्ञोयज्ञाधिकृतोदैवाद्यनेकभेदभिन्नयुद्धयज्ञाधीश्व
रोस्मि किमुक्तंभवति मयैवदैवादिप्रकारभिन्नयुद्धयज्ञाधिकारि
ण्यः प्रजाःसृष्टाः अतोहमेवतेषांसाध्यसिद्धौसहायःफलप्रापक
इतिसमरे मद्ध्यानमेवविधीयमिति कथंध्येयइतिप्रकारप्रश्नेवा
हमेवेतिसावधारणवचनेनोत्तरंज्ञेयं अयमाशयः अहमेवैतादृ
गाहृस्यायाहृतिमांध्येयइति एतदुक्तंभवति यथामयानतदेव
तारेदेहमंगीकृत्यतेतेदुःसाधाअपिनारदग्रामहवीरदानवप्रति
योगिकयुद्धयज्ञाः संपादितास्तथैवतांतांमन्मूर्तिंमनसासंचिं
त्यसमरयज्ञःसंपाद्यइति एवंषष्ठोनिर्णीतः ६ ॥ ४ ॥

मधुभाष्य

४ ॥

23

भाषा अनुवाद टीका ॥

और क्षर कहे विनश्वर जो देह आदिमे प्राणी मात्रको अधिकार।
करके स्थिति करै है इस सेअधिभूत कहावै है और पुरुष कहते
है सूर्य मण्डलवर्ती विराट को जो अपने अंशरूप समस्त देवतो
के अधिपति है वह अधिदेव है अधिदेव कहते अधिष्ठात्री देवता
को यह श्रुति से कहा है किसोई विराट पुरुष प्रथम शरीरधा
री सकल भूतोंके आदि कर्ता औ ब्रह्माके भी पूर्व वर्तमानथे औ
र इस शरीर मे अन्तर्यामी रूप से वर्तमान हम को अधि यज्ञ
कहे यज्ञ की अधिष्ठात्री देवता तथा कर्मफल दाता जानो इस से अधियज्ञ किस रूप स्थि करते इस ^
^ प्रश्नका उत्तर भयाक्यौंकि यही अन्तर्यामी की असङ्ग आदि गुण
के द्वारा जीव के साथ भिन्नता पूर्वक देह के बीच वर्तमान।
ता लोकमे प्रसिद्ध है सोश्रुतिभी कहती है कि मित्रभावसे एक।
स्थानमे रहने वाले जो जीव औ अन्तर्यामीरूप ये दोनोसुन्दर
पक्षयुक्त शरीर रूप एक वृक्षपर स्थिति किये हैं तिन के म
ध्य एक फल भोगी औ दूसरा साक्षीमात्र कहे देखने वाला है
और हे देहभृता वर नरश्रेष्ठ अर्जुन इस सम्बोधनसे यह जना
या कि तमभी अपनी प्रवृत्तिरूप कर्मो की अन्वयव्यतिरेकान
रूपसिद्धि असिद्धिमे वही अन्तर्यामीके अधीन हो तोसुतरां अ
न्वयव्यतिरेक केद्वारा इस अन्तर्यामीकोतम आप जानने योग्य
हो ४ ॥

दोहा

क्षरोभाव अधिदेवहै पुरुष कह्यो अधिदेव मे अधिप जंहि देह
मे हे जीवनवरपव ४॥

94

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः
प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५

शांकरभाष्यं

अंतकाल इति अन्तकाले च मरणकाले मामेव परमेश्वरं विष्णुं
स्मरन्मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स मद्भा
वं वैष्णवं तत्त्वं याति नास्ति न विद्यते अत्रास्मिन्नर्थे संशयो याति वा
नवेति ५ ॥

आनंदगिरिकृतटी·

यत्तु प्रयाणकाले चेत्यादि चोदितं तत्राह अन्तकाले चेति मामे
वेत्यवधारणेन अध्यात्मादिविशिष्टत्वेन स्मरणमावर्त्यते वि
शिष्टस्मरणे हि विक्षेपात्प्रधानस्मरणमपि स्यादत्र च मरण
काले कार्यकरणपारवश्याद्भगवदनुस्मरणासिद्धिः सर्वदैव नै
रन्तर्येणादरधिया भगवति समर्पितचेतसः तत्कालेपि कार्य
करणजातमगणयतो भगवदनुसन्धानसिद्धेः शरीरे तस्मिन्नहं
ममाभिमानाभावादिति यावत् प्रयातीत्यस्य प्रकृतशरीरमपादा
ने ब्रह्मवेद ब्रह्मैव भवतीत्यादिश्रुतिमाश्रित्याह नास्तीति व्यासे
धं संशयमेवाभिनयति याति वेति ५ ॥

स्वामिकृतटीका

प्रयाणकाले च कथं ज्ञेयोसीत्यनेन पृष्टमन्तकाले ज्ञानोपायं तत्
फलं च दर्शयति मामेवोक्तलक्षणमन्तर्यामिरूपं परमेश्वरं स्मरन्
देहं त्यक्त्वा यः प्रकर्षेणार्चिरादिमार्गेणोत्तरायणपथा याति स
मद्भावं मम स्वरूपतां याति अत्र च संशयो नास्ति स्मरणं ज्ञानोपा
यो मद्भावापत्तिश्च फलमित्यर्थः ५ ॥

पिशाचभाष्यं

अंतकाले मरणकाले च मामेव विष्णुं स्मरन्मुक्त्वा परित्यज्य क
लेवरं शरीरं यः प्रयाति म्रियते मद्भावं विष्णुभावं वैष्णवं पदं याती
त्यत्र संशयो नास्ति ५ ॥

रामानुजभाष्यंटी· ॥

अंतकाल इति इदमपि त्रयाणां साधारणं अंतकाले मामेव स्मरन्
कलेवरं त्यक्त्वा यः प्रयाति स मद्भावं याति ममयो भावस्तं तदा
नीं यथा मामनुसंधत्ते तथाविधाकारो भवतीत्यर्थः यथा भ्रम
रकीटादयः तदानीं स्मर्यमाणभृंगसजातीयाकाराः संभूताः ५

अभिनवगुप्तकृतटीका

अथ योऽवशिष्टः प्रश्नः कथं प्रयाणकाले ज्ञेयोऽसीति तं निर्णा
यति उत्तरश्लोकगम्यार्थः ५ ॥

परमार्थप्रपाटीका

अंतकाले इत्यनेन तत्कालज्ञानोपायं दर्शयति मामेवोक्तल
क्षणं अंतर्यामिरूपं परमेश्वरं यः स्मरन् देहं त्यक्त्वार्चिमार्गेण
याति समद्भावं मद्रूपतां प्राप्नोति अत्र च संशयो नास्ति ५

वनमालीटीका

प्रयाणकाले च कथं ज्ञेयोऽसीति प्रश्नस्योत्तरमाह अंतेति
स्मर्तव्यः सततं विस्मर्तव्यो न जातुचिदित्युक्तनित्यस्मर
णस्य स्तुत्या कथ्य श्लाघः सदनंतगुणालयं जगदुदयादिली
लं सच्चिदानंदघनविग्रहं सर्वेश्वरं सर्वांतर्यामिनं वासुदेवं मा
मेव स्मरन् सदा चिंतयन् तत्संस्कारपाटवात्समस्तकरणवै
कल्यवत्यंतकालेऽपि स्मरन् कलेवरं मुक्त्वा देहाभिमानं त्यक्त्वा
प्राणवियोगकाले यः प्रयाति सोऽर्चिरादिमार्गेण मद्भावं स्व
णात्वनिर्भेकत्वादिरूपं मत्साम्यं याति निरंजनः परमं साम्य
मुपैतीति श्रुतेः इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इति
वक्ष्यते अर्चिरादिमार्गस्तु अथ यदु चैवास्मिन् शव्यं कुर्वंति य
दु च नार्चिषमेवाभिसंविशंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमा

पूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्स
रंसंवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पु
रुषोऽमानवः स एनान् ब्रह्म गमयतीति श्रुतिसिद्धः ब्रह्मज्ञा
निनोऽस्मिंल्लोके श्रव्यं समीचीनं कुर्वंति न वा सर्वथा विषमेः
वाभिसंभवंति तन्मार्गेण ब्रह्मैव प्राप्नुवंतीत्यर्थः अत्रार्चिरा
दिपदेन तत्तन्मार्गाधिष्ठातारो देवा उच्यंते तन्मार्गगतानां प्र
तीकोपासकानां व्यापकोपासकानामप्यधिकृतं नारदा
दीनां ब्रह्मणा सह मोक्षः सोऽश्नुते सर्वान्कामानिति श्रुतेः
ये वानधिकारिणो व्यापकानंतगुणालयब्रह्मोपासनया
जाततदपरोक्षाः शुकादयस्तेषां तन्मार्गेण स्वयं स्वस्वरूपा
विर्भावरूपो मोक्षः यद्यपि ब्रह्म व्यापकं सर्वत्रैवास्ति स्वयोग्यगुणाशे
षविशेषविशिष्टं ब्रह्मापरोक्षं पूर्णं प्रमादश्च तस्य जातमेवेति।
कर्तव्यं प्राप्यं च किंचिन्नास्त्येव तथाप्यस्माच्छरीरात्समुत्थाय
परंज्योतिरूपं संपद्यते स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति
जक्षत् क्रीडन् रममाण इत्यादिश्रुत्यनुसारात् प्राकृतांशस्य
लिंगदेहादेर्निःशेषतया नाशो लोकस्य भगवन्मूर्तिविशे
षं प्राप्येव न च तस्य प्राणा उत्क्रामंतीत्यनुत्क्रमणश्रुतिवि
रोध इति वाच्यं तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमाय
न्नमृतत्वमेति स एव विद्वानस्माच्छरीरभेदादूर्ध्वमुत्
क्रम्यामुष्मिन् स्वर्गे लोके सर्वान्कामानवाप्यामृतः समभव
दिति श्रुत्या ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमंडलं ब्र
ह्मलोकमतिक्रम्यते न यांति परां गतिमिति स्मृत्या चोत्क्र
मणोक्तेः न तस्य प्राणा उत्क्रामंतीत्यनुयायुत्क्रमसंबंधिप्रा

णानामुत्क्रमणमुक्तं नतु तस्याप्युत्क्रमणं जन्माभा
वात्तस्य प्राणोत्क्रमणरूपं मरणं न भवतीत्यर्थः प्राणादी
नामिहैवांशेन स्वस्वकारणेषु पृथिव्यादिषु लयो न तु स्व
र्गादिगामिनः इवांशेन तेन सह गच्छतीत्यर्थः अत्र सदा चिं
तनाद्भगवदपरोक्षे ततो भगवंतं प्राप्य स्वस्वरूपाविर्भावरू
पमोक्षे संदेहो नास्तीत्यर्थः ५ ॥

अथ मेवैजयन्ती टीका

नियतात्मभिः प्रयाणकाले कथं ज्ञेयोसीति प्रश्नस्योत्तरं व
दन् तेषां प्रयाणं साधारणं प्राप्यमाह अंतकाले चेति (
अन्तकाले मृत्युसमये योगिध्येयपदांबुजे सर्वकारणे स
र्वेश्वरे वसुदेवनंदने मामेव न तु मदन्यं देवं स्मरन् चिंतय
न् सन् यः कोपि मद्भक्तः कलेवरं स्थूलदेहं मुक्त्वा परित्यज्य
प्रयाति स्वाधिकारयोग्येन मार्गेण गच्छति स भक्तो मद्भावं
मम यो भावः स्वभावः सोऽपहतपाप्मा विजरो विमृत्यु
र्विजित्सोपिपासः सत्यकामः सत्य
संकल्प इत्यादिश्रुतिसि
द्धः स्वभावः सम
द्भावस्तं याति
प्राप्नोति अत्रा
स्मिन्मद्वचने संशयः
यथा ॥

कारंस्मरन्तिनमाकारंभवेन्नेवेत्येवंस्वरूपःसंदेहोनास्तिवाशाहेनपद्य
न्नकालएवमांस्मरन्मद्भावंयातितेषांजन्ममरणमध्यातेयोमामाराध
यन्स्मरतिसमद्भावंप्राप्नोतीतिकिमुवक्तव्यमितिसूचितम् ५ ॥

मधुसूदनी टीका

इदानींप्रयाणका लेचकथंज्ञेयोसीतिसप्तमस्यप्रश्नस्योत्तरमाह ॥
मामेवभगवंतंवासुदेवमपियंतेसगुणंनिर्गुणंचपरममत्वंब्रह्मन्नता
ध्यात्मादिकंस्मरन्सदाचिंतयन्नन्तत्संस्कारपाटवात्समस्तकरणा
ग्रामैवयप्रवसंतकालेपिस्मरन्कलेवरंमुक्त्वाशरीरेहंममाभिमा
नंत्यक्त्वाप्राणवियोगकालेयःप्रयातिसगुणध्यानपक्षेऽग्निर्ज्योति
रहःशुक्लइत्यादिवक्ष्यमाणेनदेवयानमार्गेणपितृयानमार्गात्प्र
कर्षेणयातिसउपासकोमद्भावंमद्रूपतांनिर्गुणंब्रह्मभावंहिरं
ण्यगर्भलोकभोगांतेयातिप्राप्नोतिनिर्गुणब्रह्मस्मरणपक्षेतुक
लेवरंमुक्त्वाप्रयातीतिलोकदृष्ट्यभिप्रायंनतस्यप्राणाउत्क्रामं
त्यत्रैवसमवलीयंतेइतिश्रुतेस्तस्यप्राणोत्क्रमणाभावेनगत्यभावा
त्समद्भावंसाक्षादेवयातिब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः नास्त्यत्र ते
देहव्यतिरिक्तआत्मनिमद्भावप्राप्तौवासंशयःआत्मादेहाद्व्यतिरि
क्तोनवादेहव्यतिरेकेपीश्वराद्भिन्नोनवेतिसंदेहोनविद्यतेछिद्यं
तेसर्वसंशयाइतिश्रुतेः अत्रचकलेवरंमुक्त्वाप्रयातीतिदेहाद्भिन्नत्वं
मद्भावंयातीतिचेश्वरादभिन्नत्वंजीवस्योक्तमितिद्रष्टव्यं अंतका
लेभगवंतमनुध्यायतोभगवत्प्राप्तिर्नियतेतिवदंस्त्वन्यसमयेपियंकं
चित्कालेध्यायतोदेहान्त्यसमयेतत्स्मरणमवश्यंभावीतिदर्शयति ५

सदानंदीटीका ॥

सप्तमस्योत्तरमाहप्रश्नस्यभगवान्हरिः मामेववासुदेवंयःसगुणं
वाथनिर्गुणंचिंतयन्सन्तेनुभ्यासात्तत्संस्कारपाटवात्समस्तक
रणग्रामैवश्यअन्त्यसमयेस्मृतौस्मरन्कलेवरंमुक्त्वाहंममेतित्यक्त
त्वा स्वकाप्राणवियोगेयःसगुणध्यानवान्यदितदासदेवया
नेनप्रयातिसउपासकःमद्भावंनिर्गुणंब्रह्मब्रह्मलोकेविविदिना

गी॰
टी॰अ॰

सहभोगावसानेमोक्षमाप्नोतीत्यतोनलाभतः निर्गुणध्यानपरस्तुप्रया
णीत्यन्त्यहंस्थितः नतस्यप्राणाउत्क्रामन्त्यत्रैतोब्रह्मविदोमुनेःप्राणास्यो
त्क्रमणाभावेनत्वभावमहीरितं समासादेवमद्भावंयातिब्रह्मैवसन्
न्नवयं नास्त्यत्रसंशयःकश्चिद्ब्रह्मैवब्रह्मविद्यतः अत्रायमाशयोविस्मृतेः
प्रयाणसमयेप्यदृणाकफवातादिदोषेणसत्वअगुप्तियामपिस्वस्वरू
पेस्वयंसाक्षात्स्मारयत्यात्मनिस्थितः हरिस्तच्चविदोभक्तस्तथाम्यत्रह
रेर्वचः स्वस्थचेतसःस्मयेमर्त्याःस्मरंतिममनारद काष्ठपाषाणसंस्मा
नेतत्कालेस्मरास्यहं स्थिरचेतसिस्वस्थेशरीरेसतियोनरः धातुसा
म्येस्थितेस्मर्ताविश्वरूपंचमामजं ततस्तंम्रियमाणंतुकाष्ठपाषाण
सन्निभं अहंस्मरामिमद्भक्तंनयामिपरमांगतिं ५ ॥

नीलकंठीका ॥

अत्रषट्सुप्रश्नोत्तरेषु प्रथमेजीवस्यब्रह्मभावउक्तः तेज्ञानतोपृथगाणमे
वनास्ति नतस्यप्राणाउत्क्रामन्त्यत्रैवसमवनीयन्ते ब्रह्मैवसन्ब्रह्माप्ये
तीतिश्रुतेः द्वितीयेशुद्धत्वंपदार्थउक्तस्तज्ज्ञानस्यापिवस्तुतन्त्रविषय
त्वान्नतत्रभावनापेक्षास्तीतिनभावनाफलभूतकालेतत्स्मरणापेक्षास्तते
तृतीयचतुर्थयोस्तुकर्मतत्साधनभूतंचजन्यमवस्थितं तत्रापिनभावना
पेक्षास्ति अंतकालेप्रबलेनैवकर्मणाचित्तस्यावरोधात्तत्साधनफल
भूतस्यैवस्मरणावश्यंभावेन तत्रभावनापावैयर्थ्यात् परिशेषात्तद्
स्मयोरेवकार्यकारणब्रह्मणोःसोपाधिकनिरुपाधिकयोरन्यतरस्य
भावनासहस्राद्वेन्तकालेतत्स्मरणावश्यंभावीतितयोरन्यतरंरूपंय
रमात्मानंस्मरन्यःकलेवरंमुक्त्वार्चिरादिमार्गेणप्रयाति सब्रह्मलोक
प्राप्तिद्वाराक्रमेणमद्भावंमोक्षंयातीत्याह अंतकालेचेति सप्रयोजना
नास्त्यत्रसंशयइति सोपाधिकब्रह्मोपास्तिमहत्त्वप्रशंसनेनैकाग्र्यदयस्य
नाप्त्वासांशुद्धेनमभिनितिःस्तनैका नयोर्धमायन्नस्ततनमेतिद्विगम्याउ
त्क्रमणोभवतीतितदुपासकस्यगतिस्वर्वकस्यामस्ततनतस्यश्रवणात् यस्तु
शुद्धत्वंपदार्थरूपमध्यात्मवस्तुमात्रैवेदद्यसोब्रह्मात्मैकात्म्यनाभावात्
नस्यप्राणाउत्क्रामन्तीत्येतदाकाविषयानभवतिकिंतशनैवैकाचेयेत

स्येव विषयः ननु तस्यानुपासकत्वात्कथमेतदिति चेन्न नहिक
स्यापि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति न्यायेन न तस्योभयभ्रष्टत्वा
संभवात् कठवल्लीषु निष्कलब्रह्मगात्मविदं केवलयोगिनं प्रकृ
त्यशाने वैकावेन्द्राम्नानाच्च वेदान्तविज्ञानसुनिश्चितार्थाः संन्यास
योगाद्यतयः शुद्धसत्वाः तेब्रह्मलोके तु परान्तकाले परामृतात्परि
मुच्यन्ति सर्वे इति श्रुतेर्निश्चितार्थानां शोधितत्वंपदार्थानामेव
क्रममुक्तिरवगम्यते न चात्र सुनिश्चितार्था इत्यनेन ब्रह्मात्मैकत्वनि
श्चयवन्तो ग्रहीतुं शक्याः तेषां गमनाभावस्य प्रोक्तत्वात् नाप्युपासकाः
ब्रह्मसंभवात् उपासनादिना मध्रत्वसिद्धबुद्धिः यथा शालग्रामे
विष्णुबुद्धिर्वैरूप्यविराडुपासनायां मिथ्यात्वबुद्धिरिति तेन तदन्तः सुनि
श्चितार्था इति वक्तुं शक्यं तस्मात् ध्यानात्मविदो ब्रह्मात्मैक्यानवगमा
दनुपासकत्वेनोभयभ्रष्टताभावेप्यर्चिरादिगतिशालित्वमितिसि
द्धमनवद्यं ५ ॥

आनन्दीटीका

प्रयाणकाले वत्समाणोत्क्रान्तिसमये मामेव परब्रह्मस्वरूपं नी
रूपं वनर्भुजादिकं साकारं वा स्मरन् धारणाभिसंयमविषयीकु
र्वन्यो जीवात्मा प्रयाति बाह्लोशिकं देहं मत्कोत्क्रामति सोयं मद्भाव
याति मम परब्रह्मणो भावमैक्यं याति नात्र संशयः तथा श्री
लक्ष्मीवासुदेवकल्पो भगवान् कृत्स्नशरीरस्थक्रमः प्राणवा
रणेन स्थानेषु स्थानेष्वनुभवविच्छित्तिलाभसंप्रवीक्तान्तेः सर्वसुक्
मणे तावत्र विरमत्वभयविरामेपि परिणतिमपवयल दणोपे
वमीमवस्थामात्मेमत्वा ज्ञात्वा चोत्क्रमेत् इति महावाक्यार्थः नहि
संपिण्डं परिणतेन तात्वा जरया जर्जरीकृतम् प्रसक्तः सर्वकार्येषु
स्वलित्वा कम्पते प्रियः रमास्वादविनिर्मुक्त इन्द्रियार्थेन विरतिन
दातेन मकतेयाम निरुत्क्रमणं प्रति श्रादौ तस्य कले भावं समातो वै
वमाश्रयेत् सोपानपर्वैणैनतस्याभ्यासानन्तपदमितिम् चहिंशतिप
दापानां प्रकाश्य पुंब्रुजेदथ ॐकाररथारूढेन रत्नपुत्रमपानं समाहरे
त् नासाग्रेणानिलं प्रकारः रयपूरयेत्ततः प्रतिनं प्रजेदास्येन ह

गी॰ टी॰ प्र॰

९८

प्रेरितनियोजयेन् योऽस्मिन्नोत्र्यर्कजाजीवोव्रजन्त्वादिपर्यायंपरम् नाल
हारमथासाध्यब्रह्मद्वारंविभेद्येन ऊर्ध्वानेहिभिस्सेवस्थिरधीः
पिंगलाश्रयः मनःशान्तं समाहृत्य बोधशक्तिपरात्मिकाम् तथा
विबोधितंकृत्यांत्वणांब्रह्मगृहाशयम् विमलत्वस्थितेनतस्मेलीनेशान्तेपदे
कृत्वासमनवरंवैनविनिर्गमपरान्तरात् शतकोटि
सहस्रांशुशीनचिद्रगभस्तिरुक् समवेद्ब्रह्मपरमेयद्धिसोऽःपरमं
परम् तत्रविष्णोनिराभासःपरिचिन्मात्रलक्षणः स्वेस्वेमन
मापत्रःतीरेतीरान्तरेयथा सजीवःपरमानन्दैकीभावमुपा
गतः तत्रसायुज्यमाप्नोतियत्रनस्यात्पुनर्भवः [illegible]
[illegible] ॥

रामकंठटीका

नत्वब्रह्म किमुच्यते इतिप्रश्नेनावरुत्तरं [illegible] ब्रह्मनत्वरति
संचलयतिनस्वरूपाच्च्यवतीत्यक्षरंचिद्रूपमुच्यते नचहिप्रकारं
भवति [illegible] जीवरूपंवयद्बहुलरूपंतेनापरमतस्यनकदाचि
दितिविविक्त[illegible]स्पष्टकचिन्मात्रलक्षणं सहजनित्यानंदैकस्व
रूपमेवब्रह्माकंठविदस्यसंगतत्वान्नित्यो[illegible]सिद्ध्यादि
[illegible]स्थितेनाव[illegible]विषभावव
[illegible]
वीकृतस्य[illegible]
सारूपा[illegible]
सकलात्मस्वरूपम[illegible]वेदयोगस
[illegible]विधविद्यानन्तस्वरूपमद्भुतितसंवन्धे
[illegible]मौडरूबोलोकइत्यादि स्यंब्र
[illegible]
वोनां स्वभावोध्यात्ममिति स्वभावश्चैनन्तं[illegible]द्वदत्य
[illegible]स्वभावपरिहैनभूमिरापइत्यादिका

अंतकालेपि तत्त्वकमेव त्यागात्स्य शरीरस्य प्रत्ययसमये मां यथोक
विशेषणं परमात्मानं स्मरत्वा मे चिंतयन् तत्त्वरूपप्रत्यवमर्शपूर्वकं कले
वरं शरीरं त्यक्त्वा स्वातंत्र्येण विमुच्य यः प्रयाति ततो देहादुत्क्रामति स
मद्भावं मदीयां सत्तां याति अहमेव संपद्यत इत्यत्र संदेहो नास्ति तथा उ
क्तिं प्रदर्शयितुमाह ५

लासिकी टीका

अथ प्रयाणकाले च कथं ज्ञेयोसि इति प्रश्नस्य फलभूतया विदेहमुक्तेः रूपाय पूर्वमुत्तरमाह ॥
यो अंतकाले मरणकाले च कारात्स्वस्थावस्थायामपि मामेवाहन्ता
ममतेयमधियज्ञं परमात्मानं स्मरन्नात्मवमृशन् तत्त्वयिभूताधिकं
कलेवरं देहं मुक्त्वा त्यक्त्वा प्रयाति आत्यप्रवेशवन्मूर्धसीमां विदा
रण पूर्वं निर्गच्छति स मद्भावं मद्रूपां सत्तां याति प्राप्नोति अहमेव संप
द्यते इत्यर्थः तथा च श्रुतिः एष संप्रसादोस्माच्छरीरात्समुत्थाय प
रं ज्योतिरुपसंपद्य स्वेन रूपेणाभिसंपद्यत इति स्मरणं चात्र नित्यसन्निहि
तस्य परमात्मनः प्रत्यवमर्शः न त्वसन्निहितस्य चरादेरिव विकल्पमात्रे
ण स्वीकारः अत्रांतकाले मत्तत्त्वरूपस्मरणेन मद्भावापत्तौ नास्ति संश
यः फलभूतया विदेहमुक्तिरूपायां मद्भावापत्तौ मदनुस्मरणमुपा
यः न केवलं मद्विषय एवायं नियमः किं तर्हि ५

पंचोलीटीका

अंतकाले च कथं ज्ञेयोसि इति प्रश्नस्योत्तरं तत्कालज्ञानोपायं च
दर्शयन्नाह अंतकाले इति च पुनः यो अंतकाले मामेव स्मरन् कलेव
रं मुक्त्वा प्रयाति स मद्भावं वैष्णवं तत्त्वं याति अत्र संशयो नास्ति ५

रणवीरसमिद्धोधिनी ॥

अथ प्रयाणकाले च कथं ज्ञेयोसि नियतात्मभिरित्यत्रोत्तरं सफलमाह
अंतकाले चेति च शब्दो न क्रमं तेतरं जीवनकालं समुच्चिनोति तथा
च जीवदवस्थायां मरणासन्नकाले च मामेव सर्वेश्वरं नत्वन्यं कंचित्
स्मरन्सन् कलेवरं संमुखं विमुच्य हृत्प्रसृते देहं मुक्त्वा तस्मादुत्क्रा
म्य प्रयाति लोकांतरमिति शेषः स मद्भावं मत्सायुज्यं याति निःसंशयमे

तदित्यर्थः ३ इदमत्रतात्पर्यं आरंभात्प्रभृति मत्स्मृतिरविच्छिन्नप्रवाह
त्वेन प्रवर्त्तमानां तत्काले पि सा स्वयमेव सिद्धेति नांतकाल प्रतियो
गिकत्वानेमदनुस्मृतिसाधनमिति न तत्त्वानेउपायांतरमन्वेष्य
मिति एषोर्थश्च चमाहोनत्तापितः अन्यथांतकाले मामेव स्मरन्नि
त्युक्ताविवक्षितार्थसिद्धौ कथं त्वेयोसीति पर्यनुयोगोनोत्तरितः
स्यादिति ५॥

मधुभाष्य

५॥

भाषा अनुवाद टीका ॥

और तुम अन्तकाल मे कैसे जाने जाते हो इस विषय मे अन्त समय ज्ञानकी उपाय औ इसका फल देखावतेहैं कि उक्त जो अन्तर्यामि स्वरूप जो परमेश्वर मै सोमेरे कोस्मरण पूर्वक देह त्याग करिके जो प्रकृष्ट रूपेम अर्चिरादि कहे सूर्य मण्डल मे होय के उत्तरायणराह से गमन करते हैं वे मेरे स्वरूप को प्राप्त होते हैं इसमे संशय नंहीहै मेरा समरण ही तत्वज्ञान की उपाय है औ मेरे रूपता की प्रतिहीफल है ५ ॥

दोहा

सतुसमें जो मोहिकों करें स्मरण तजें देह सो सम भावहिं पावहैं या मे नाहि संदेह ५॥

30

यंयंवापिस्मरन्भावं त्यजत्यन्तेकलेवरं तंत
मेवैतिकौन्तेय सदातद्भावभावितः ६ ॥

शाङ्करभाष्य टीका

नमद्विषय एवायं नियमः किंतर्हि यं यमिति यंयंवापि यंयंभावं देव
ताविशेषंस्मरंश्चिन्तयन् त्यजति परित्यजति अन्तेप्राणवियोगकालेक
लेवरं तंतमेवस्मृतं भाव मेवैति नान्यंकौन्तेय सदासर्वदा तद्भावभा
विततस्मिन् भावस्तद्भावः सभावितःस्मर्यमाण तयाभ्यस्तोयेन सत
द्भावभावितः सन् ६ ॥

आनन्दगिरिकृत टीका ॥

अन्तकाले भगवन्तमनुध्यायतोभगवत् प्राप्तिनियमवदन्यमपि न
न्तकाले देवादिविशेषंध्यायतोदेहं त्यजतस्तत्प्राप्तिरवश्यंभाविनीति द
र्शयति नेत्यादिना कथं पुनरन्तकालेपरवशस्य नियतविषयस्मृतिर्भ
वित मतस्सहते तत्राहसदेति देवादिविशेषस्तस्मिन्नितिसप्तम्यर्थः भा
वो भावना वासना स भावोभावितः सेषादितोयेन पुंसास तथाविधः
त सन् यंयंभावंस्मरति तंतमेव देहत्यागादूर्ध्वंगच्छतीति सम्बन्धः ६ ॥

स्वमिकृत टीका ॥

यंयंभावंदेवतांतरंवान्यमपिवाअंतकाले स्मरन् देहंत्यजतितंतमे
वस्मर्यमाणंभावंप्राप्नोति अंतकालेभावविशेषस्मरणेहेतुः सर्वदात सदातद्भावभावितइति
स्यभावोभावनाअनुचिंतनंतेनभावितोवासितचित्तः

पिशाचभाष्यटीका ॥

यंयंवापिस्मरन्भावंपदार्थंतेनभावेनभावितः ६ ॥

रामानुजभाष्य टीका ॥

स्मर्तुः स्वविषयसजातीयाकारतापादनमेतत्प्रत्ययस्यस्वभावइतिस

गी॰
टी॰अ॰

स्पष्टमाह यंयमिति अन्तेऽन्तकाले यंयं वापि भावं स्मरन् कलेवरं
त्यजति तं भावमेव मरणानन्तरमेव [illegible] एति अन्तप्रत्या
यस्पृष्टभावितविषयएव जायते ६ ॥

31

अभिनवगुप्तकृतटीका ॥

न केवलं स्वस्थावस्थायां यावदन्तकालेऽपि योऽपि मामेव व्यवच्छिन्नसक
लोपाधिकम् कश्चन स्वस्थावस्थायां विनिहतसकलेन्द्रियवृत्तिः सम
गवां स्मरति पश्चमुपायादित्युपायमनुपदिशति सर्वावस्थास्वा वा
दाविकास्वपि य स भगवत्तत्त्वेन स्पृष्टया तत्पर्यालीन स भगवत्स्वेव तो
कलकर्मसंन्यासिनः सततभगवन्मयस्यावश्यमेव भगवन्न तं
स्मरति विषयतो यातीति सदा तद्भावभावितत्वं वा चेद्धेतुः अतएवा
हृदयेनैव वस्तुना सदा भावितेनान्तःकरणभावः तेदेव मरणसमये
स्मर्यते तद्भावमेव च प्राप्यते इति सर्वेषामन्तरमेवमन्त्रेण स्मा
सति ज्ञानिनोऽपि यावच्छरीरभावि यात्तदोषविकलितविग्रहत्वे जे उ
नां प्राप्तस्यतामसस्यैवगतिः स्यात् न चाप्युपमातृत्वकः प्रमाण
भत्वकृतिविरोधात् अस्तिहि तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि
त्यजेदेहम् ज्ञानसमकालमुक्तः कैवल्ययातिहतशोक इति त
स्मादेवं विप्रनुवादो सदा येन भावितमेतः करणं तदेवान्ते प्रया
णानन्तरं प्राप्यते न च स्मर्यतेन वेति ना न्वनिर्वचः अन्वाचयन्याय स
विशेषेन सूचितः स्मरणस्य सर्वथाभावे वा शङ्कः स्फुटयति सदा
चमत्परमो जनः सर्वथास्यादिति तान्यं मुनिरेव प्रकटयति ।
यदाह ८ ॥

परमार्थप्रपा टीका ॥

नकेवलं मां स्मरन्मद्भावं प्राप्नोतीति नियमः किं तर्हि इत्याह यंयमि
ति यंयं भावं देवतांतरं वान्यमपि अंतकाले स्मरन्देहं त्यजति
तंतमेव स्मर्यमाणं भावं प्राप्नोति यथा जाड्यति स्मरणान्मृगदेहपदा
र्थं निद्रायामनुभवति किंभूतः सदा निरंतरं तद्भावेन स्मरणा
दूदपदार्थेन भावितः वासितचित्तः ६ ॥

वनमालीटीका ॥

अंतकाले भगवंतमनुध्यायतो भगवत्प्राप्तिर्नियतेति वक्तुमन्यमपि
यं कंचित्काले ध्यायतो देहं त्यजतस्तत्प्राप्तिरवश्यं भवतीत्याह
यंयमिति न केवलं मां स्मरन्मद्भावं यातीति नियमः किंतु यंयं भा
वं देवताविशेषं वर्वकारादन्यदपि यत्किंचिद्वा स्मरन्त्यजं ते प्राण
वियोगकाले कलेवरं त्यजति स तंतमेव स्मर्यमाणं भावमेवेति
नान्यं प्राप्नोति अंतकाले स्मरणोद्यमात्मेभवेपि पूर्वाभ्यासजनि
तात्वासनैव स्मृतिहेतुरित्याह सदा सर्वदा तस्मिन्देवताविशे
षादौ भावो भावना वासना तद्भावः स भावितः संपादितो
येन सततया आहितो प्यादेराकृतिगणत्वाद्भावितपदस्य प
रनिपातः ६ ॥

उत्तमवैजयन्तीटीका

ननु यथा त्वत्स्मरणकर्ता त्वद्भावं याति तथान्यस्मर्तान्यभावं याति
नवेत्याशंक्याह मनेयंयं भावं स्मरति तंतमेव स्मर्ता यातीत्याह यंयं वा
पीति [illegible] हे कौंतेय कुंतीपुत्र सदा सर्वस्मिन्काले तद्भावभावित
स्तस्य सर्वचिंतनविषयं कृत्वैव कलेवरं शरीरं त्यजति जहाति
हे कौंतेय कुंतीपुत्र सदा सर्वस्मिन्काले तद्भावभावितस्तस्य सर्वचिं
तनविषयस्य पदार्थस्य यो भावः सानुरागचिंतनविशेषस्तेन भावि
तश्चिंतितः सन् तंतमेव भावं पदार्थं याति गच्छति यथा भरतो मर

गी०
टी०ग्र०

णकाले स्मरणं चिंतयन् मनुष्यदेहस्यागोचरकाले स्वगशरीरमेवश्रा
स्रवान् तथाश्राप्यति मत्स्मरणेन एवं स्मृतिविषयतया यं यमेव पदार्थं
स्मरति स तं तमेव प्राप्नोतीत्यर्थः ८

32

अंतकाले भगवं **मधुसूदनी टीका** तं स्मरन् ध्यायन्तो भगवत्प्राप्तिनियतेति वदितुमन्यम

पि यं कं चिन्नन्त्यकाले ध्यायतो देहं त्यजतस्तत्प्राप्तिरवश्यंभाविनीति दर्शयति ॥+

न केवलं मां स्मरन् मद्भावं यातीति नियमः किंतर्हि यं यं भावं देवतादि
विशेषं वा कालान्तरं स्मरन् किं विशेषं स्मरन् चिंतयन्नन्ते प्राणवियो
कले गकाले कलेवरं त्यजति स तं तमेव स्मर्यमाणं भावमेव नान्यमेति प्राप्नोति
हे कौंतेयेति पितृष्वसृपुत्रत्वेन स्नेहातिशयं सूचयति तेन चावश्यानु
ग्राह्यत्वं तेन च प्रतारणाशंकाशून्यत्वमिति अंतकाले स्मरणो मम
ना पायमासन्नेव पूर्वाभ्यासजनितां वासनैव कारणमिति हेतुरित्याह सदास
वदा तस्मिन् देवताविशेषादौ भावो भावना वासना तद्भावः
स भावितः संपादितो येन स तथा भावितत् तद्भावः इत्यर्थः
आहिताग्न्यादेराकृतिगणत्वात् भावितपदस्य परनिपातः तद्भावेन तच्चिंत
नेन भावितो वासितः चित्त इति वा [illegible]
[illegible] ८ ॥

सदानंदी टीका

न मत्स्मरणस्यैवायं नियमः किंतु सर्वतः यं यं देवविशेषं वान्यत् किं
चिद्वस्तुमात्रं वा चिंतयन्नंतकाले सोऽपि त्यजति देहं कलेवरं तं तमेव स्म
र्यमाणं स्वभावमेवैति नान्यं परं पितृष्वसुरात्मजत्वेनानुग्राह्योऽसीति
सूचयन्कौन्तेयेति पदेनात्र स्नेहातिशयं सूचयन् नात्र पूर्वाभ्यासाजि
शेष तां वासनां स्मृतिकारणं सर्वदा येनाभ्यस्तो भावो देवादिगोचरः
स्मर्यमाणतया सोंऽतेन तमेवैति नान्यं परं ८ ॥

नीलकंठी टीका ॥

नीलकंठीटीका

न केवलं कार्यकारणब्रह्मणोरेव भावनोत्कर्षवशात्तद्भावप्रा।
प्तिरेतरस्यापि कीटस्य जीवत एव भावनाबलात् भाव्यवस्तुभावप्राप्ति
र्दृश्यते तर्हि किं वक्तव्यं मरणसमये महिम्न महादेवे भावयंस्तत्सायुज्यं देहां
तरे विन्देदिति योगशास्त्रेष्वपि प्रसिद्धं तत्र किमु वक्तव्यं मृतस्य
एव शरीरान्तरे भाव्यभावप्राप्तिरस्तीति मत्वा तमेवार्थमस्य चापि द
र्शयति यं यमिति तद्भावभावितः भाव्याकारवासनया रंजितस्वभावः ६

करणवैकल्यस्यावश्यंभावित्वात्क ज्ञानदीपिका थं परमेश्वरलक्षणप्रतिपत्तिरित्याशंकामपनुदति ॥

यः कश्चिद्योगी अयोगी वा यं यं वापि भावं यं कंचन पदार्थं स्मरन्नन्ते
प्रियासन्नासन्ने शरीरपरिणामे प्राणवियोगकाले स्मृत्वा कलेवरं
जति हे कौन्तेय सदा सर्वस्मिन्नपि समवे नरशरीरस्थितिभोगसमये
तद्भावभावितः तेन तेन भावेन भावितो वासितः दृढयत्नस्तमेव भा
वमेति जन्मान्तरेण तमेव प्राप्नोति तत्कालस्मरणमनुवर्तत इति नि
यमो नेत्यर्थः तथा च तद्विषय एव मन्त्रान्तरे पुराणे तथा च व्याख्या
तमिदमभिनवगुप्तपादैः तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्य
जन्देहम् ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति

[illegible] ॥

रामकंठीटीका

यं यं सात्त्विकं राजसं तामसं वा भावं पदार्थं स्मरन् सात्त्विकाराज।
सतामसत्वाद्बुद्ध्या ध्यायन् पुरुषोऽन्ते वर्तमानं देहं जहाति तं तमेव दे
हान्तरे प्रतिपद्यते अत्र हेतुगर्भं विशेषणमाह सदा तद्भावभावि।
तः सदा नित्यकालं तस्मिंस्तादृशि सात्त्विकादौ भावे भावितः संजा
तभावनो यतः किमुक्तं भवति वर्तमाने देहे यदेव सात्त्विकादिकं
वस्तु पुरुषोऽभ्यासेन भावयति तत्तद्भावनाभ्यासप्रकर्षादन्ते संस्का
रबलेनैवान्ते वश्यं स्मरति यमेव वस्तु स्मरन्नस्माद्देहादुत्क्रामति तमेव त
त्समनन्तरे देहान्तरे लभते यदुक्तं यदा सत्वे विवृद्धे तु प्रलयं या
ति देहभृत् तदोत्तमविदां लोकानमलान्प्रतिपद्यते रजसि प्रल
यं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते

गी॰ टी॰ अ

इति [illegible] ६

लासिकी [illegible]टीका

नकेवलंमद्विषयएवायंनियमः किंतर्हि ॥ सा या

अंतेतत्क्षणेपुत्रादिप्रमाअनन्तरागोचरेसामायांसहिक्कागद्गदं
कादि[illegible]चेष्टाचरमभाविनिशरीरदाह्यं वंधश्चतद्भावाद्देहकु
तस्तवदुःखमोहवंध्यैकलोशेयंपुरुषोयंयंभावंसात्विकंरा
जसंतामसमपिवावस्तुस्मरन्वापिशब्दोमध्यातिरिक्तवस्तुस्म
रणद्योतके अथवाशद्वार्थेदेहंत्यजतितंतमेवभावंसात्विका
दिकमेतिप्राप्नोति अंत्येतत्क्षणेतद्भावस्मरणेहेतुगर्भविशेषण
माह सदातद्भावभावितः यतोसौसर्वदातस्यवस्तुनोभावेन
भावनयाअनुचिंतनेनभावितोवासितचित्तः एतेनतद्भावानुचिंत
नमेववासनारूपेणांतेतत्क्षणेतद्भावस्मरणेवीजभूतंदेहत्यागा
नन्तरंतद्भावापत्तेर्हेतुः यद्वक्ष्यति सदासत्वप्रवृद्धेष्विति भावि
तशद्वेनतद्व्यज्यते तद्भावानुचिन्तनेनतद्वासनायाः स्मरणवी
जभूतायाः सत्वात्स्मरणस्यस्फुटत्वमसत्वस्फुटत्वंवाकारणा
नुवर्तित्वात्कार्यस्येति [illegible] ६

पंचोलीटीका

नकेवलंमामेवस्मरन्मद्भावंप्राप्नोतिइतिनियमः किंतर्हि।
अन्यास्वपिदेवतासुअयंनियमः समानइत्याह यंयमिति हे
कौंतेयअपिवाअंतेमरणकालेयंयंभावंदेवताविशेषंस्मरन्
कलेवरंदेहंत्यजति सदातद्भावभावितः तस्मिन्भावस्तद्भावः
सभावितोयेनासौतद्भावभावितस्तद्वासनयावासितः सनरंते
तंभावंदेवताविशेषमेतीत्यर्थः ६

अथ जीवदवस्थायां निरंतरं स्मृतो भावोंतकालेपि स्मृतिमारो
हति देहत्यागकाले निरंतरस्मृतभावनारूप्यापत्तिश्च नियमि
तेति स हेतुकं दर्शयति यंयमिति यंयं भावं यं पदार्थं स्मरन्स्मृ
अंते प्राणावसानासमनंतरे काले कलेवरं देहं त्यजति तंतमेव
भावं हे कौंतेय एति प्राप्नोति तत्स्वरूपो भवतीत्यर्थः ननु क
थमंतकाले तदनुस्मृतिः स्यादित्याह सदेति सदा सर्वदा आरं
भात्प्रभृति सर्वास्ववस्थासु यया प्रयत्नेन नित्यत्वप्रतिपादितस्व रू
पा सतत्क्रावभावितः भावितो भावनाविषयीकृतः स एव भावो
येन वाहिताग्न्यादिषु परमिति भावितशब्दस्य परनिपातः यमे
व जीवदवस्थायां निरंतरं स्मरति तमेवांतेप्यवध्यायति स्मरण
स्य सदातनत्वेनाविच्छिन्नत्वात् यश्चानुस्मरति तदेव भवतीति
व्याप्तिसिद्धोयमर्थः अतः एवं वासनैवांतेस्मृतिनिमित्तं न पुन
स्तदाविव प्रास्य स्मरणोद्यमो वपुषापेक्ष्यः संभवतीति भावः ६

मधुभाष्य

६॥

३५

भाषा अनुसार टीका ॥

अन्तकाल मे मेरा स्मरण कर मेरी प्राप्ति होय केवल यही नहीं। सोई कहते है कि हे कुन्तीपुत्र अर्जुन अन्तकाल मे जो कोई। जिस देवता का या और किसी विषय का ध्यान कर देह छो ड़े है सोउसी को प्राप्त होता जिसका ध्यान किया है ऐसा स दा जिसका चिन्तन करते रहो तो अन्तकालमे भी अन्तःक रण मे उसीकासंस्कार रहता और नयी अपूर्व वस्तुका स्मरण कठिन है ६॥ ॥

दोहा

जिह जिह भावस्मिरनजोतजैंहिं अंतमे देह तिह तिह भावमें प्राप्ति है कौंतेय नित यह ६॥

35

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च मय्य-
र्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७ ॥

शाङ्करभाष्य टीका

यस्मादेवमन्त्याभावना देहान्तरप्राप्तौ कारणं तस्मादिति तस्मात्
सर्वेषु कालेषु मामनु स्मर यथाशास्त्रं युध्य च युद्धं च स्वधा-
र्मं कुरु मयि वासुदेवेऽर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितम-
नोबुद्धिः सन् मामेव यथास्मृतमेष्यसि आगमिष्यसि असंशयो न
संशयोऽत्र विद्यते ७ ॥

आनन्दगिरिकृत टीका

सततं भावना प्रतिनियतफलप्राप्तिनिमित्तमित्यभ्युपपादितमुपसंहरति
तस्यानन्तरश्लोकमवतारयति यस्मादिति विशेषणं व्यवतो भगव-
दनुस्मरणस्य भगवत्प्राप्तिहेतुत्वं भातितस्मादित्युच्यते सर्वेषु का-
लेष्वादरनैरन्तर्याभ्यां सहेति यावत् भगवदनुस्मरणे विशेषणत्रय-
साहित्यं यथाशास्त्रमिति योऽसौ भगवदनुसंधाने कर्तव्यमुक्तो ते-
न सह स्वधर्ममपि कुरु युद्धमित्युपदिशता भगवता समुच्चयोऽना मयीति
न धर्मेणाङ्गीकृतो भातीत्याशंक्याह मनोबुद्धिगोचरं क्रियाकार-
कफलजातं सकलमपि ब्रह्मैवेति भावयन् युद्ध्यस्वेति ब्रुवता क्रि-
यादिकलापस्य ब्रह्मातिरिक्तस्याभावाभिलापाच्च समुच्चयो वि- मा
वक्षितेत्यर्थः उक्तरीत्या स्वधर्ममनुवर्तमानस्य प्रयोजनमाह मामेवे-
ति उक्तसाधनवशात् फलप्राप्तौ प्रतिबन्धाभावं सूचयति असंश-
य इति ७

स्वामिकृत टीका ॥

यस्मात्पूर्ववासनैवान्तकाले स्मृतिहेतुः न तु तदैव विवशस्य स्मरणोद्यमः संभवति ॥
तस्मात् सर्वदा मामनुस्मर चित्तय सततस्मरणं च चित्तशुद्धिं विना न
भवति अतो युध्य स्वचित्तशुद्ध्यर्थं युद्धादिकं स्वधर्मं चानुतिष्ठेत्यर्थः
एवं मय्यर्पितमनः संकल्पात्मकं बुद्धिश्च व्यवसायात्मिका येन त्वया स त्वं
मामेव प्राप्स्यसि असंशयः संशयोऽत्र नास्ति

गी॰
टी॰ ग्र॰

[illegible] ७ ॥

38

पिशाचभाष्यं टीका ॥

तस्मात्सर्वेषु कालेष्वित्यर्थः ७ ॥

रामानुजभाष्यं टीका

तस्मादिति यस्मात्सर्वकालाभ्यस्तविषये चांत्यप्रत्ययो जायते तस्मात्सर्वेषु कालेष्वा प्रयाणादहरहर्मामनुस्मर अहरहरनुस्मृतिकरं शुद्धादिकं वर्णाश्रमानुवंधिश्रुतिस्मृतिचोदितं नित्यनैमित्तिकं च कर्म कुरु एतदुपायेन मय्यर्पितमनोबुद्धिरंतकाले च मामेव स्मरन् यथाभिलषितप्रकारं प्राप्स्यसि नात्र संशयः ७ ॥

अभिनवगुप्तकृत टीका ॥

यदाह तस्मात्सर्वेषु कालेषु मामनुस्मरेति तेनेदमत्र पदसंगतिः सदा यंयं भावं स्मरन्कलेवरं त्यजति अंतेपि वा स्मरन्वा गर्हणात्स्मरन्वा तं तमेवैति यतोसौ सदा तद्भावेन भावितः अंतेन कलेवरं त्यजति सति अंते कलेवरत्यागस्तेणेव धुपुत्रादिष्वमात्रेन रागो च रेष्या सा यासदिक्कागृहदिकादिचेष्टा चरमभाविनि हत्वेणाशरीरस्यार्द्धं वंधप्र तन्भावादेहकृत सावडुःस्वमोहवच्छेकालांशोदेहत्यजनशङ्का वाच्ये यदेव स्मरति तदेव प्रथमसंविदनुगृहीतमस्वरूपं संपद्येत नात्हृणि च काले स्मरणस्य कारणं सदा तद्भावभावितत्वमिति तिव्या जतो तिसममीयाज्येति प्राक्तनपद्यार्थः नन्वेवमंतकाले किंप्र योजनेन तत्स्मरणेन कथमाह प्रयोजनमिति किं न वस्तुहेतोयत तमेव तद्भवति तस्मिन्नंतेत्वरोननुपुत्रकलत्रं वेषुहेतेः शिशिरोट कपालोदवोत्पद्यमात्रं स्मरणादिति तद्भावापत्तिः स्यात् ॥ ::॥

मेवं तद्विमोत्थः स्मरणः स्फुटदेहावस्थानात् तदासावंभः स्मरणे स्मद्धिव
सितो भवात् दृशेर्लक्ष्यते तत्रैवं तस्य स्मरणे येनैव रूपेण भावितं मनस्तत्संस्कार
स्य हृदयवर्तिनोऽपि देशकालव्यवहितानामप्यानन्तर्यमिति न्यायेन प्रबोधे
न भाव्ये तद्वशात् स्मरणेन तत्स्मरणात् तद्भावप्राप्तिः कस्यचित्तु देहस्याव
स्थायामपि तदेव काकतालीयवशादुत्पद्यते यथा स्वर्गादेः पुराणेन वर्ण
नेन तत्कृते तत्स्वर्गादे अत एव प्रयाणकालेऽपि च मामित्यादावपि चेतिग्रह
णम् येऽपि सदा भगवन्तं भावयन्ति एवंभूता भविष्याम इति तेषां तदः संस्का
रोऽत्र संस्कारप्रतिबन्धीति न्यायेन तस्यामलस्यायामन्तर्दशायां संस्कारो
न गाढस्तेन न संस्कारकृतेन तद्भावस्मरणेन देहसद्भावलक्षणकृते च तस्यस्म
रणेनेन्तरे देहविनिपातलक्षण एव काले संस्कारनिहितस्तादृङ्मित्यादि
वेद्यविभागानवभासात् स्वविकल्पात्र सततत्त्वपरमेश्वरस्वभावतैव भवती
ति श्रीमदभिनवगुप्तगुरूणां संमतं इत्यलं बहुना प्रमेयशयमिति तात्परे
देय्यमिति ७ ॥

परमार्थप्रपाटीका

ननु तदविवशस्य कथं स्मरणेऽयमः संभवतीत्याह तस्मादिति यस्मादेवं
तस्मात्कारणात्सर्वेषु कालेषु सावद्भः सुखभोगसमयेषु मामनुस्मर अनुवेलस्म
रणानुरूपेण कुरु तेन निरन्तरानुध्यानसंस्कारेणान्तकालेऽपि स्वत एव स्म
रणं भविष्यति नहि चित्तशाद्विमेतरेण स्मरणं भवति अतो युद्धस्व च स्वधा
मरूपं स्वधर्माचरणं कुरु एवमवसाने मय्यर्पितमनोबुद्धिस्त्वं संशयः
निश्चितं मामेवैष्यसि देहान्तकाले मदाकार एव संकल्पः निश्चयोऽपि म
य्येव एवं कृते सति मत्स्वरूपापत्तिर्नेमामेवैष्यसि अत्र मामेवैष्यसि एवका
रेणान्ययोगव्यवच्छेदः कृतः तस्मात् इममेवानन्याभिरेवेन स्वस्मरणे प्रव
र्तितव्ये देहावसाने दुःखविस्मार्येत् स्वाभिमुखे माकर्षयामि इत्यर्थः तदु
क्तं स्पर्शप्रमाणमसारं न यति कनककान्तो वाति के तेवकाप्रमासते त्रि
सर्पकान्तो द्रवति तत्परमस्य दूरस्याभिमुख्यात् इत्यन्यः सन्निधानात्ति
छमति गरहनाहु लिव स्मरप्रभावो जीवानाम् किरेवं भवति भगवतः कि

+ ज्ञरूपवशेनोभक्तस्यदेहात्ययेसंशयाणवर्णेजपत्यविकलेंद्रेरणगभात्मकः अथाधियज्ञ
स्वरूपप्राप्तिस्तदेतत्सर्वंहृदयंबकृष्णतिसंमतंज्ञनवांयात्सोत्तत्त्रयोऽगिरसाप्रतिपादित
मयियज्ञमंतकालप्राप्तिंस्वोपदिशन्नाह + ७

गी· पुनर्भवितांनं इति संयुक्तस्लोकस्य छांदोग्योपनिषत्तु तं किल यजुर्मंत्रत्रयं अट गृह्य तं तद्घो +
टी·अ रांगिरसर्षिणाभवाव **वनमालीटीका ॥** ते कस्माय संस्मारितं श्रीकृष्णोपधिनाय +

37

यतः सर्वदा चिंतनाभ्यासादेव संस्कारदार्ढ्यं द्विविधे कल्पकाले स्मृतिर्भ
वत्यतः सर्वदा भगवच्चिंतनमनवरतं कार्यमित्याह तस्मादिति यतो मद्रू
पोल्लसनातनांशारब्धकर्माभावेनित्यस्मृतिजन्यात त्स्मृत्यामत्प्राप्तिर्नि
यतं भवति तस्मात्सर्वेषु कालेषु मामनेन गुणालयं जडंगडदयादिक
मोरं सच्चिदानंदघनविग्रहं अनुनिरंतरं संस्मरेस्मर यदि निरंतरस्मवि
च्छिन्नैतैलधारावन्मनुस्मरणं कर्तुमशक्तस्तर्हि मदाराधनरूपस्वाधि
तेनिः कामं कर्ममत्कुर्वित्याह युध्य च जातजिज्ञासस्यास्थिरचित्तस्य नि:
कामकर्मानुष्ठानेन ततः श्रवणमननिदिध्यासनरूपं [illegible] सत्कामा
च्चिततेततो मदापरोक्षं प्रसादस्ततो मत्प्राप्तिरूपो मोक्ष इत्याह
मयीति मयि सर्वेश्वरे अर्पिते संकल्पाध्यवसायरूपे मनोबुद्धी येन सः मा
मेव सर्वेश्वरमेष्यसि यद्यपि स्वरूपानंदाविर्भाव एव मुक्तिर्नेश्वरप्राप्ति
स्तथापि तादृक्स्वरूपाविर्भावः सर्वेश्वरप्रसन्नपरोक्षीभूतेप्राप्त्यैव भवति
नान्यथा परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतेरित्यभिप्रायः

कृष्णसवैजयन्तीटीका

नन्वेतत्काले शिरोघातादिजनितातिशयदुःखेनाखिलेंद्रियव्याकुलत्वात्स्मर
वशः स्मर्तोः कथमन्यस्मरतोन्याशंक्य एवं काला[illegible]भ्यस्तस्मरणमेवान्त्य
स्मरणस्य कारणं स्यादित्याह तस्मादिति यस्मात्सर्वकालाभ्यासविषय
केपवपदार्थे स्मृतिरंत्यपि तस्मात्सर्वेषु कालेषु स्नानाशनशयन
गमनादिषु प्रतिक्षणं मा सर्वेश्वरं भगवन्तमनुस्मर कृष्ण एव ममात्मा
कृष्णाधीनोहं कृष्णेनैव कारितः कर्मणोमीत्येव रीत्यात्वं मां स्मर च कु
रु च युद्धनः श्रुत्युद्धायलक्षितेस्वाचितेनित्यनैमित्यादिकं कर्म कुरु ए
वं त्वं प्रकारेण मय्यर्पितमनोबुद्धिः सन्मयि सर्वेश्वरे भगवति स्वर्पितेना
स्यापितमनोबुद्धीयेन तथा सः यदि त्वमीदृशोभविष्यसि तर्हि मामेवैष्य
सि न त्वं संदेहादिकमित्यत्रासंशयस्तव संदेहो मास्तु ७ ॥

+ १
अधियज्ञोहमेवेति नो देहे भृतां वर अत्रदेहे अहमेवाधियज्ञः यज्ञं शारीरयागमधिकृत्य व
र्तते सावधियज्ञः अंतर्यामी भगवतः प्रकृष्टस्यांतर्यामि +

+ त्वेन वर्तमानस्तत्प्रवर्तकः तत्फलसंपादकोप्यहमेवेत्यर्थः उक्तं च टिप्पणि
कायां सुरुत्थानामादित्ययामिन्नोव्यवहारं करोतीति यं शारीरः स च यज्ञात्मतं
यज्ञपुरुषं विदुः संस्कृतान्नस्य पानत्रपामानेवेविन्नुरुषोश्नुते नाप्यदाश्नुतेन
यः शोकाजादवेजानवेदस्ति पिपासितोभः पिबति सोमपानमप्यात्मतत्
यज्ञस्योपसदृश्येष्टा भूतिस्थावमध्यस्यचेति श्रुतिरपि छांदोग्योपनिष
त्सु सयदशिशिषतिस्यत्पिपासतिय त्ररमतेतावस्य दीक्षाः अथयद
श्नाति यत्पिबति यद्रमते तदुपसदैरेत्यथयद्वसति यज्जक्षति यन्मैथुनं च
रति स्तुतशस्त्रैरेवैत्यथयत्तपोदानमार्जवमहिंसासत्यवचनमितितास्य
दक्षिणास्तस्मादाहुः सोष्यत्यसोष्टेतिपुनरुत्पादनमेवास्य तन्मरणमे
वावभृथस्तद्धैतद्घोर आंगिरसः कृष्णायदेवकीपुत्रायोक्त्वोवाचापिपास एव ४
स वभूव सोंतवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसिप्राणसंशि
तमसीति तत्रैते द्वे ऋचौ भवतः आदित्प्रत्नस्य रेतस उद्वयंतमसस्परिज्योतिः
पश्यंत उत्तममिति भाष्यं शारीरयज्ञसंपादी पुरुष आत्मा नं यज्ञं मन्य
ते सोच तत् छेहेनोच्यते सयदशिशिषति त्युद्धत्ताः सत्वशितं भोक्तुमि
च्छति तथापिपासति तृषादितः [illegible]
[illegible] सन्यात
मिच्छति अत एव यत् रमते तत्सुखियामाजनितं दुःखमनुभवति ता अ
स्य यज्ञपुरुषस्य दीक्षाः यतो दीक्षायामनशनादिना क्लेशानुभव एव
यत्तत्कटीक्षोपसत्स्तुतशस्त्रदक्षिणादिभिः संपाद्यते तत्र दीक्षा अन
विशेषः अथोपसदः आह अथेति सयज्ञपुरुषो यदश्नाति यद्वत्ति तथा
यज्जलं पिबति तथा रमते अन्नपानादिना सुखमनुभवति तेरुपसदै
तिवर्तते यत उपसदस्त्य यज्ञा जनितसुखानुभवरूपः अथस्तुतशस्त्रा
नाहुर्यद्वसतीति यज्ञपुरुषो यद्धसति विनोदकथाभिरीषद्धास्यमुखो
पक्रमं करुते न यजक्षति यामैथुनं चरतु कालेभार्या मनुगच्छति
तानिस्तुतशस्त्राणि द्वादशस्तोत्राणि द्वादशशस्त्राणीति श्रुतेः स्तु
तनामस्तोत्रं अगुणस्तावकवाक्यमदर्भः तथाहोत्रपरमानक्रकं

गी.
टी. अ.

दर्भेऽक्षाप पर्य्यायः शस्त्रशब्देनोच्यते । अकुशावीयब्राह्मणेपि अथातः स्तु
तशस्त्रयोरैकाहिके प्रातःसवनमित्यादि । ते स्तुतशस्त्रे रनिवर्तते अथ दक्षि
णार्थं तुष्टिकरत्वात् अथैतस्य यज्ञपुरुषस्य चरमदेहं स्पृशति श्रुत्यंतरोक्त्या मा
हतस्मादिति । यस्मादेवं यज्ञपुरुषस्वरूपं तस्मादन्यशाखावीर्कः अत्रतय आहुः
सोष्यत्यसोष्टेति तस्य पुरुषस्य तेहहातिक्रमे तन्माता सोष्यति प्रसविष्यति त
था सोऽष्ट प्रसूत इत्यस्य पक्रममात्रं दर्शितं । तदत्र भागेवोक्तं तस्य ह वा एतस्य हृद
यस्य पंच देवसुषयस्तथा पंच ब्रह्मपुरुषान्यो वेद तस्य कुले वीरो जायते ।
प्रतिपद्यते स्वर्गं लोकमिति । अत्र वीरशब्देन षड्रिपुजयशीलः प्रोच्यते त
थाह हरदत्तः रणकेपि । तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्त्वं ब्रह्म त्वं यज्ञस्त्वं ।
लोक इति पित्राशिष्टः सन् पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति इयमेव च
रमदेहात्मकस्य यज्ञपुरुषस्य परीक्षा अनेन प्रकारेण पुनरुत्पादनं जन्म
स्यैतद्देहपरित्याग एवावभृथोऽयं ज्ञातव्यमिति अथोपसंहरन्नाह तद्धैतदिति
एतन्निरूपितप्रमेयं घोरनामर्षिरांगिरस आचार्यो भगवते कृष्णाय देव
कीपुत्रायोक्त्वा पुनरुवाच । तत्किं स यज्ञपुरुषः अपिपास एव बभूव पिपा ।
६ सारमादिसकलविषयेभ्यस्तद्दृष्टितो वितृष्ण एव भवति । अनेन नरः सोऽन्तवेलायां प्र
याणसमये भगवदुपदिष्टं त्रयं प्रतिपद्यते आप्नोति । तत्किं अक्षितमसीति
प्रथमः अच्युतमसीति द्वितीयः प्राणसंशितमसीति तृतीयः भाष्यं नि
र्याणकाले यज्ञपुरुषः स्वात्मानं वदति भो जीव त्वमक्षितमपरिच्छिन्नमसी
ति तथा अच्युतमप्रच्युतस्वभावमसि तथा प्राणः श्वासवायुस्तेन
संशितं तनूकृतमसि सूक्ष्मप्राणापानादिरसि । एवंविधस्त्वमसीति महा
वाक्यसंदर्भः अत्रास्मिन्नर्थे ऋचौ भवतः तयोः प्रथमा आदित्प्रत्नस्य रेतसो ज्यो
तिः पश्यंति वासरं परो यद्दिवि उद्वयं तमसस्परि ज्योतिः पश्यंत उत्तरं दे
वं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति भाष्यं आदिति समेनात् इदेवकारा
र्थे प्रत्नस्य पुराणस्य चिरंतनस्य रेतसो बीजभूतस्य जगत्कारणस्य ब्रह्म
णो ज्योतिः प्रकाशं वासरमहरहः पश्यंति पर इति लिंगविपर्यासः ब्रह्म
णो ज्योतिर्निहतवत्संविदो ब्रह्मचर्यादिनिवृत्तिसाधननिरस्तान्तःकरणात्मा

माह यज्ञपइत्यादिना प्रसिद्धा त्रस्य दक्षिण

३८

38

ब्रोत्रह्म

समंततोज्योतिः पश्यंतीत्यर्थः तत्किंज्योतिर्दिविस्
र्ग्गे स्वर्गे वा यत्तदीध्यते दीप्यते येन ज्योतिषा आदित्यः सू
विनातपति चंद्रमा भाति विद्युद्विद्योतते तारागणा
भाति तदित्यर्थः उद्वयमिति उद्धर्वं ज्योतिः स्वप्रका
शं तेजो वयं पश्यंतः संतः अगन्म प्राप्तवंतः किंभू
तः तेजः तमसस्परि तमसोऽज्ञानात्परिपरितः
उत्कृष्टं देवं द्योतमानं देवत्रा देवेषु मध्ये आसूर्यं सू
र्यं मर्यादीकृत्य द्योतमानं उत्तमं निरतिशयं तदु
क्तं नारायणोपनिषत्सु तस्यैवं विदुषो यज्ञस्यात्मा
यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमा

गीं
टीं
ग्रं

४४

39

निबर्हिर्वेदः शिखाहृदयंयूपःकामश्चाज्यंमन्युः
पशुस्तपोग्निर्दमःशमयितादक्षिणवाक्होताप्राण
उद्गाताचक्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीध्रोयावद्ध्रि
यतेसादीक्षायदश्नाति तद्धविर्यत्पिबति तदस्य
सोमपानंयद्रमतेतदुप
सदइत्यलमिति
विस्तरेण
॥ १ ॥
एतत् परमार्थभाषा
त्रुटितं ॥

मधुसूदनी टीका

यस्मादेवं सर्वं स्मरणं भासजनितात्मभावनेनैव तदानीं परवशस्य देहांतरप्राप्तौ कारणं ॥
तस्मात् मद्विषयकात्मभावनोत्कर्षार्थं सर्वेषु कालेषु पूर्वमेवादरेण मां स
गुणमीश्वरमनुस्मर चिंतय यथांतःकरणशुद्धिवशात् शक्नोषि सततम
न्यस्मात्तेनांतःकरणशुद्धये अंतःकरणशुद्ध्यर्थं युद्धादिकं स्व
धर्मं कुरु युध्येति युद्धस्य स्वधर्मः एवं च नित्यनैमित्तिककर्मानुष्ठानेनाशु
द्धिद्वारात् मयि भगवति वासुदेवेऽर्पिते संकल्पाध्यवसायलक्षणे म
नोबुद्धी येन त्वया स त्वमीदृशः सर्वदा मच्चिंतनपरः सन् मामेवैष्यसि प्राप्स्य
सि असंशयो नात्र संशयो विद्यते इदं च सगुणब्रह्मचिंतनमुपासकानां
मुक्तेस्तेषामात्मभावनासापेक्षत्वात् निर्गुणब्रह्मज्ञानिनां तु ज्ञानसमकाल
मेवाज्ञाननिवृत्तिलक्षणायां मुक्तेः सिद्धत्वान्नात्मभावनापेक्षेति द्र
ष्टव [illegible] ७ ॥

सदानंदी टीका

यतोऽन्त्यभावनाहेतुः प्राप्तौ देहांतरस्य च तस्मान्मद्विषयकात्मभावनो।
त्कर्षसिद्धये पूर्वमेवादरेण त्वं सर्वकालेषु मां हरिं सगुणं सर्वसौंदर्यसा
र सर्वस्वमीश्वरं स्मितांकितमुखं मेचकश्यामं पीतांबरं बिभ्रं श्रीवत्सांकि
तवक्षस्यकौस्तुभादिश्रियोज्ज्वलं गरुडध्वजमाधारं सर्वस्य जगतः प
तिं आनंदसांद्रं श्रीकांतं करुणार्द्रं निरंतरं शंखचक्रगदापद्मवनमा
लाविभूषितं चिंतयाविरतं प्रेम्णाद्रवीभूतेन चेतसा यथांतःकरण
शुद्धिवशात्त्वं नैव सततं शक्नोषि मामनुस्मर्तुं ततः स्वांतविशुद्धये
युद्धादिकं स्वधर्मं त्वं कुरु निष्कामचेतसा तेनाशुशुद्धितया देवे वासु
देवे मयीश्वरे येनार्पिते मनोबुद्धी संकल्पाध्यवसायकौ स त्वमेतादृ
शो नित्यं मच्चिंतनपरायणः मामेव वासुदेवं श्रीपरमानंदविग्रहं प्रा
प्स्यस्यत्र न संदेहो विद्यते मे मनागपि सगुणध्यानिनां मुक्तेर्मत्प्रा
भावापेक्षणं ज्ञानिनां भ्रांतिदाहेन मुक्तिः स्यात्तत्क्षणे यतः सद

गी
टी अ वि
हेतेनत्ततेहेत यदन्योमेकवीत्वणं तस्मात्कालस्तद्भेदबुद्धेरवनवेत
ः नीरोगाउपविष्टोवामगेणावाल्लटमपि मद्धितोवान्यतेत्वष प्राणांप्रा
तिनसर्वथा इत्युक्तेवपिहृष्टव्यानित्तानिविवेचने यस्मिन्निटविविध
विषमजेविभूमिस्वाभाविकास्तनस्वेवबरिवतितिनिंम सार्वत्यमत्ये
गुणामेवमहोदयोश्रीसेव्याक्षिपमयुरालेनमहेश्रपद्ये ७ ॥

80

40

नीलकंठी टीका ॥

यस्मादेवंतस्मात्सर्वेषुकालेषुमामनुस्मरश्चेनकालेमनस्मरणामज्ञावप्रा
प्रर्थं युध्यचेतिवकारात्कर्मापास्याःस्मयुक्तयोवगम्यते तानकर्मसमु
च्चयकर्तेरीवतउभयानुष्ठातरिपकस्मिंश्चाधिकारिणिकर्टेलाकर्टेव
प्रसयहृतविरोधाभावात् मय्यर्पितेमहेकनिष्ठतोनीतेमनोबुद्धीये
नसमर्पितमनोबुद्धिस्त्वंप्रसंशयंमामेवैष्यसिप्राप्स्यसि ग्नेनकालेस्म
रणेनेतिशेषः ७॥

सर्वोक्तमेवपुनःस्फुटयति ॥ आनन्दीटीका

यस्मात्सदायोयद्भावभावितस्तमेवैतीतितस्मात् सर्वेषुकालेषुवै
मर्षिकेषुव्यावहारिकेषुमांपरमात्मानमनुस्मरानुसन्धेहिचपुनःयु
हेवकृत्युद्धकरणेनवेनैकाविड्डानिरित्याह मय्यर्पितमनोबुद्धिरिति
हेतद्दर्शनमेतत् मनसंकल्पविकल्पौबुद्धिरध्यवसायः

रामकंठी टीका

यतएवं तस्मादुक्ताकारणाद्रामोपदेशग्रामितंणात्स्मरति सर्वेषुकालेषुका
लेशाद्युपलक्षणार्थंतेनसर्वदेशेषुसर्वेष्वाकारेषुसर्वावस्थासुयथोत
स्वरूपंमोपरमात्मानंपरमेश्वरमनुस्मरसेवित्तपमत्स्वरूपध्यानानु
परतनिविड्डवध्यानोभवयुध्यस्व स्वकर्मोःनुतिष्ठच येनमय्यर्पितान्त
पकोरणानिम्नविनिवेशितान्तःकरणोनिःसंशयंमामेवैष्यसिमदभ्र
हंशाप्स्यसि अहमेवभविष्यसीत्यर्थः

लासिकी [illegible] टीका

कथं चास्यस्यावस्थायामंतकाले विनिहतसकलेंद्रियचेष्टस्य भगवानात्मा स्मृतिपथमुपेयादित्युपायमप्युप

देशति ॥ यतोनुचिन्तनमेव तत्प्राप्तिहेतुः तस्मात्कारणात्सर्वेषु कालेषु सर्वास्ववस्थासु व्यावहारिकीष्वपि मामात्मानमनुस्मरणार्थं तं चिन्तय व्यवहारदशासु मध्ये प्रक्रांतमुपलक्षणमाह युध्य चेति व्यवहारस्थं तं स्वधर्ममनुपनं युद्धं चानुतिष्ठ च: सगुणत्वये व्यवहारदशास्वपि यस्य भगवतत्वं न हृदयादपयाति तस्य भगवत्येव सकलकर्मसंन्यासिनः सततं भगवन्मयस्यावश्यमेव स्वयमेव भगवतत्वमंतकाले स्मृतिविषयतां यातीति भावः तथा चोक्तमन्यत्र स्वस्थे चेष्टाश्रये मर्त्याः स्मरंति मम नारद काष्ठपाषाणवेष्टाणां नेतकाले स्मराम्यहमिति प्रत्यत्रैव स्थिरे चेतसि स्वस्थे शरीरे सति यो नरः धातुमास्थे स्थिते स्मर्ता विश्वरूपं च मामजं ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभं अहं स्मरामि मद्भक्तं नयामि परमां गतिमिति स्मर्तेत्यत्र ताच्छील्ये तृन् अतएव न लोकाव्ययेति कर्मणि षष्ठीनिषेधः ननु व्यवहारदशासु त्वदनुस्मरणे सत्यपि भवत्प्राप्तिः स[illegible]लभ्यानुमीयते इत्यत आह मय्यर्पितेति यदा यदा मयि प्रत्यगात्मनि अर्पिते मनोबुद्धी मनः संकल्पात्मकं बुद्धिर्निश्चयात्मिका येन सः तथा सर्वथा यो देहाहंभावरहित एवंविधः सन्नित्यानुस्मरणपरस्त्वं भवसि तदा तदा मामेवैष्यसि मदभेदं प्राप्स्यसीत्यर्थः [illegible] मनो[illegible]मामेवैष्यसि एवं[illegible]कालेऽपि मन्मना मामेवैष्यसीत्याह ७

पंचोलीटीका

यस्मादेतस्य भावना देहांतरप्राप्तौ कारणं न च पूर्वाभ्यासमंतरेण तदानीं चित्तस्य विवशत्वात्सा भावना न संभवति तस्मात्सर्वदैव तद्भावना कर्तव्येत्याह तस्मादिति यस्मादेवं सर्वेषु कालेषु यावज्जीवनं यथाशास्त्रं मामनुस्मरन् युद्धं स्वधर्मं कुरु मयि परमेश्वरे अर्पिते मनोबुद्धी येन स त्वमेवंविधः सन् मामेव यथास्मृतमागमिष्यसि असंशयः संशयोऽत्र न विद्यते ७ ॥

रत्नावीरसमिद्धोयिनी॥

उक्तमर्थं विनिगमयन्नर्जुनं प्रस्तुते युद्धे प्रवर्तयति तस्मादिति
यस्मादंतकालस्मृतिर्ना सर्वास्ववस्थास्वव्यभिचारिणीमनु
वनैवोत्क्रांतिकाले पियानवैषम्यविवशीकृतस्य विनैवोपमं मद
नुस्मृति हेतुः तस्मात्कारणात्त्वमपि सर्वेषु कालेषु मामनुस्मर श्र
मो मे पारणमिति बुद्ध्या चिंतय युद्ध्यच स्वधर्मभूतं युद्धं चानुतिष्ठ त
त्वयि मयि सर्वेश्वरेऽर्पिते मनःसंकल्पात्मकं बुद्धिर्निश्चयात्मिका ये
न तादृशस्त्वं मामेवमत्तारूप्यमेवैष्यसि प्राप्स्यसि अत्र संशयं ना
स्त्यत्र संशयो निश्चितमेतदिति भावः ७॥

मधुभाष्य

७॥

भाषा अनुवाद टीका ॥

दृढ़ वासना ही जिसलिये मरण कालके समरण से हेत है और अन्त समय विवश प्राणी को अदृढ़ वस्तुका समरण असंभवहै इससे सर्वदा हमको चिन्तन करो परन्तु मेरा चिन्तन भी चित्त शुद्धि विना दुर्लभ है सो तुम चित्तशुद्धिके अर्थ युद्धरूप स्वधर्मका अनुष्टान करो और तुमारा संकल्पात्मकमन तथा व्यवसायात्मिका बुद्धि मेरेमे अर्पित भई है इससे अनायास हम को प्राप्त होउगे इसमें संशय नही है ७ ॥

दोहा

ताते सर्वहि काल में सिमर मोहि कर युद्ध मोहि मिलें संदेह नहि मोही अर्पे मन बुद्ध ७ ॥

अभ्यासयोगयुक्तेन चेतसाः नान्यगामिना परमं
पुरुषं दिव्यं याति पार्थानुचिन्तयन् ८ ॥

शाङ्करभाष्यटीका

किञ्च अभ्यासेति अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षणो विलक्षणप्रत्ययानन्तरितोऽभ्यासः स चाभ्यासो योगस्तेन युक्तं तत्रैव व्यापृतं योगिनश्चेतस्तेन चेतसा नान्यगामिना नान्यत्र विषयान्तरे गन्तुं शीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्यमण्डले भवं दिव्यं याति गच्छति हे पार्थ अनुचिन्तयन् शास्त्राचार्योपदेशमनुध्यायन्नित्येतत् ८

आनन्दगिरिकृतटीका

इतश्च पूर्वश्लोकोक्तार्थानुष्ठायी भगवन्तमन्तकाले प्राप्नोतीत्याह किञ्चेति अभ्यासं विभजते मयीति नहि चित्तसमर्पणस्य विषयभूते भगवतोऽर्थान्तरे वस्तु सदस्तीति मन्वानो विशिनष्टि चित्तेति अन्तरालकालेपि विजातीयप्रत्ययेषु विच्छिद्य विच्छिद्य जायमानेष्वपि सजातीयप्रत्ययावृत्तिरयोगिनोपि स्यादित्याशंक्याह विलक्षणेति अभ्यासाख्येन योगेन युक्तं चेतसो विशेषणमिति तत्रैवेति तृतीयया परामृष्टोऽभ्यासयोगः सप्तम्यापि परामृश्यते ननु प्राकृतानां चेतस्तथेत्याशंक्य विशिनष्टि योगिन इति तच्चेच्चेतो विषयान्तरं परामृशेन्न तर्हि परमपुरुषार्थप्राप्तिहेतुः स्यादित्याशंक्याह नान्यगामिनेति प्रामादिके विषयान्तरव्यापारवशपमाभ्यनुज्ञातं ताच्छील्यप्रत्ययान्तेन तात्पर्यादिपरामृष्टार्थान्तरेण परमपुरुषनिष्ठेनेत्यर्थः तदेव पुरुषस्य निरतिशयत्वं यदपरामृष्टाखिलानर्थत्वमनतिशयानन्दत्वं तच्च प्रागेव व्याख्यातं नेह व्याख्यानमपेक्षते यश्चासावादित्ये इत्यादि श्रुतिमनुसृत्याह दिवीति तत्र विशेषतोऽभिव्यक्तिरेव भवनं पूर्वोक्तेन चेतसा यथोक्तं पुरुषमनुचिन्तयन् याति तमेवेति सम्बन्धः अनुचिन्तयन्नित्यत्रानुशब्दार्थं व्याचष्टे शास्त्रेति चिन्तयन्निति व्याकरोति ध्यायन्निति ८ ॥

अभ्यासयोगेति

गी· सततंस्मरणस्यचा स्वामिकृतटीका भ्यासेंतरंगसाधन मितिदर्शयन्नाह ॥

टी·अ अभ्यासःसजातीयप्रत्ययप्रवाहःसएवयोग उपायःतेनयुक्तेनएकाग्रेणा
नएवनान्यविषयंगन्तुशीलंयस्यतेनचेतसा दिव्यंद्योतनात्मकंपरमेश्वरंचिं
तयन्हेपार्थतमेवयाति ८ ॥

पिशाचभाष्यटीका

५३ अभ्यासयोगयुक्तेनेति अभ्यस्यतेऽनेनेत्यभ्यासः अभ्याससंज्ञोयोगस्तस्यभ्या
यो सयोगस्तेनयुक्तेनअभ्यासयोगयुक्तेनपरमंश्रेष्ठतमंदिव्यमप्राकृतंयोऽनु
चिंतयन्यातितेनान्यगतिमित्यर्थः ८ ॥

रामानुजभाष्यटीका

एवंसामान्येनसर्वत्रस्वप्राप्तिरेषप्रत्ययाधीनेत्युक्तातदर्थंत्रयाणा
मुपासनप्रकारभेदंवक्तुमुपक्रमते तत्रैश्वर्यार्थिनामुपासनप्रकारंया
थोपासनंमरणप्रत्ययकारकंचाह अभ्यासेति अहरहरभ्यासयोगाभ्या
युक्तेनयानन्यगामिनाचेतसांतकालेपरमंपुरुषंदिव्यंवक्ष्यमाणप्रका
रंचिंतयन्तमेवयाति आदिभरतस्मृगत्वप्राप्तिवदिति ऐश्वर्यविशिष्टा
तयामस्मानाकारोभवति अभ्यासोनित्यनैमित्तिकाविरुद्धेषुसर्वेषुका
लेषुमनसोपास्यसंशीलनं योगस्तुअहरहर्योगकालेनुष्ठीयमाणं
यथोक्तलक्षणमुपासनं ८ ॥

अभिनवगुप्तकृतटीका अनुचिन्तयन् शरीरभेदानन्तरं
वरकृतव्यथः पश्चाद्भगवन्तंचिन्

परमार्थप्रपाटीका

सततस्मरणस्याभ्यासोंतरंगकारणमित्याह अभ्यासेति अभ्यासो
नामस्त्रीपुत्रवित्तादिभ्योमनसःप्रत्याहाररूपःयोगोनाममयि
योजनंतेनतद्युक्तंसमाहितं तेनतथाभूतेनचेतसाअतएवअन
न्यगामिनापदार्थान्तरपराङ्मुखेनदिव्यंद्योतनात्मकंपरमेश्वरम
नुचिन्तयन् परमंपुरुषंपरमात्मानंयाति प्राप्नोति ८ ॥

वनमालीटी॰

तदेवं सप्रयत्नानोऽन्तरमुक्त्वा प्रयाणकाले हरिस्मरणस्य हरि॰
प्राप्तिरूपं फलं वर्णयन्निरतिशयैश्वर्यं निरूपयितुमारभते अ
भ्यासेति अभ्यासो विजातीयप्रत्ययानन्तरितसजातीयप्रवा
हः स एव योगः समाधिस्तेन युक्तं तत्रैव व्यापृतं भगवदाका
रवृत्तीतरवृत्तिशून्यं यच्चेतस्तेन चेतसाभ्यासपाटवेन नान्य॰
गामिना न अन्यत्र विषयान्तरेषु प्रयत्नं विनापि गन्तुं शीलमस्ये
ति तेन परमं निरतिशयं पुरुषं पूर्णगुणं दिव्यमतिवैरिंचिप्रपं
चवैभवं यात्यर्चिरादिमार्गेण प्राप्नोति अनुचिंतयन् शास्त्राचा
र्योपदेशमनुध्यायन् ८ ॥

हनुमद्वैजयन्तीटीका

एवं सार्वकालिक्याः पूर्वस्मृतेरंतिमस्मृतिकारणत्वमन्तिमस्मृ
तेश्च तदनन्तरप्राप्यावाप्तिहेतुत्वं सामान्येनोक्त्वेदानीमप्यती
न्द्रियाणां यथाधिकारमुपासनप्रकारैर्वदन् निरंतरपूर्वस्मृ
तेरन्तिमस्मृतिहेतुतां द्रढयति अभ्यासयोगयुक्तेनेति अ
भ्यासः पुनः पुनः स्मरणावृत्तिरूपः स एव योगस्तेन युक्तेन तेन
नान्यगामिना नान्यानितरदेवादीन्प्राकृतविषयान्वा गन्तुं
शीलं यस्य तेन तेन चेतसा व्यवसायवता चित्तेन परमं सर्वदेवो
त्कृष्टं दिव्यं सर्वैः प्राप्यैरपि स्तुत्यं पुरुषं चेतनाचेतनान्तरात्मा
नं विष्णुमामनुचिंतयन् अनुक्षणमभ्यासेन भावयंस्तमेव
चिंताविषयं मां याति कीटभृङ्गन्यायेन मत्समानरूपं प्राप्नो॰
तीत्यर्थः ८ ॥

मधुसूदनीटीका

तदेवं समानामपि प्रश्नानामुत्तरमुक्त्वा प्रयाणकाले भगवद
नुस्मरणस्य भगवत्प्राप्तिलक्षणं विवरीतुमारभते अभ्यासः
सजातीयप्रत्ययप्रवाहो मयि विजातीयप्रत्ययानन्तरितः स
हेयाभ्यासात्: स एव योगः समाधिस्तेन युक्तं तत्रैव व्यापृ
तेनात्माकारवृत्तीतरवृत्तिशून्यं यच्चेतः तेन चेतसा अभ्या

सपाटवेननान्यगामिना न अन्यत्रविषयांतरे निरोधप्रय
त्नंविनापिगंतुंशीलमस्येतितेनपरमंनिरतिशयंपुरुषंपू
र्णंदिव्यंदिविद्योतनात्मन्यादित्येभवं यश्चासावादित्यइति
श्रुतेः यातिगच्छति हेपार्थ अनुचिंतयन् शास्त्राचार्यो
पदेशमनुध्यायन् ॥ ८ ॥

सदानंदी टीका

समानान्तरंप्रोच्यप्रश्नानामधुनाहरिः भगवच्चिंतनस्यै
वभगवत्प्राप्तिलक्षणं विवरीतुंफलंचात्रसम्यगारभते
स्फुटं वासुदेवेविभोस्तुल्यप्रत्ययावृत्तिलक्षणः अभ्या
सस्तेनयुक्तंयद्वातस्तत्रैवतत्परे गंतुंशीलंनचान्यत्रचे
तसोयस्येतितेनच युक्तोयातिपरंदिव्यंसूर्यमंडलमध्यगं
शास्त्राचार्योपदेशेनध्यायन्नुत्तमपूरुषम् ८ ॥

नीलकंठी टी॰

एतदेवश्लोकत्रयेणविवृणोति अभ्यासेति अभ्यासयोगयु
क्तेनतत्रस्थितौयत्नोऽभ्यासइतिसूत्रितोऽभ्यासः तत्रध्येये
वस्तुनिचित्तस्यस्थिरीकरणार्थोयत्नःसचविजातीयप्रत्य
यानंतरितसजातीयप्रत्ययप्रवाहीकरणरूपःसोऽत्राभ्या
सः तत्रभाव्योविषयःसिद्धःविष्णुप्रतिमादिर्विराडादिर्वा
असिद्धस्तुमानसप्रतिमादिः तत्रासिद्धेमनसःप्रतिमा
कारतासंपादनेनतत्रस्थैर्यसंपादनेनचेतिविषयभेदाद्द्वि
गुणोयत्नःकर्तव्योभवति सिद्धेतुचित्तस्थिरी

करणार्थ्यपकल्पवयत्न: तत्रयथास्वतःस्वच्छःस्फटिकोजपाकु।
सुमोपरागाल्लोहितःस्फटिकइतिनलोहितमाभासः तथावस्ता।
न्नैवस्फटिकधीपद्मरागत्वाभासः पद्मरागोपिवेदिकापामि
न्द्रनीलत्वाभासस्तत्रैवतत्स्वनीमेवकिंचिद्रूपत्वेनिहीनोपलत्वाभासः
ति उत्तरोत्तरःभासक्रमेणशुद्धपकल्पवस्फटिकःपंचविधोभवति एवं
स्वतःशुद्धैवैतन्यमायोपरागान्नेदेवेश्वरःमायाशबलेनतस्यैवेश्वरत्वा
शप्रमोषेनन्नैवस्रष्टात्मत्वाभासः सृष्टेपिप्रत्तानदापत्तौहिरण्यगर्भास: त
तएवविराड्केरणेष्वशरीराद्दिप्रज्ञात्मत्वभ्रमः तत्रयथाघंटान्तर्गतः
प्रदीपःघटमात्रंभासयतिघटच्छिद्रान्तर्वहिर्गतःकिंचित्स्वप्रभयाप्र
सृष्टंविषयमवभासयति सर्वात्मनाघटाद्वहिर्गतस्तुसकलंभवनोदरव
र्त्तिपदार्थजातंप्रकाशयति तद्वद्देहान्तर्गताचितिःदेहमात्रंभासयति
देहच्छिद्राद्वहिरादेर्बहिर्गतासतीतत्संनिकृष्टंकेविदविषयंरूपादिकम
वभासयति सर्वात्मनाशुद्धरूपत्वाद्देहकृतपरिच्छेदाभिमानेनत्यक्ते
नपरिच्छिन्नासतीकृत्स्नंविराडात्मानमवभासयति यथोक्तंवासिष्ठे
योगेपि मणिञ्जनवहनाद्रामोमसूर्योदयोपिहितिविषयमिहालं।
वासमुद्योतयेति सहजलयसम्प्रसंयोनयेज्ज्योतिरेनस्त्रिभुवनमपि
स्तम्भस्थूलभेदक्रमेणेति सहजलयसम्प्रत्य सहजःस्वाभाविकोदे
हकृतपरिच्छेदाभिमानस्तस्यलयमात्रादेवउत्थितं क्रमेणसंकल्पक्र
मेण सर्वीत्तरणमात्राभिनिर्हृतत्वात्सर्वस्यशाकसंकल्पादसत्वात् त
थाचश्रुतिःसयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमु
त्तिष्ठंतीति शेषतिमित्तेरूपादयोविषयाःसंकल्पकृतात्मसत्तयादर्शा
वदेवापरागादयः तदेवंप्रकाशमानेविराजित्रयहमेवेदंसर्वोस्मीतिम
न्यतेसोस्यपरमोलोकइतिशास्त्रप्रमाणपाउपासकेनगृहीतोदंयथेहा
प्ययपिवस्तुततापेत्तणाशोनितिरूपत्वप्याप्पिस्वाभाविकादेहाहंयथास्व
स्वरूपः यथास्फटिकेहीनोपलत्वग्रहापेत्तयाइंद्रनीलत्वग्रहस्तद्वत्।
यथावस्फटिकेप्रणिधीयमानवत्रकृतरक्तरपाटववैविद्धोइंद्रनी।
लत्वेवापित्वाप्पद्मरागत्वंतद्वापेनलोहितस्फटिकत्वेतद्वापेनशुद्धत्वे

गी. यावगच्छति एवं शुक्लकृष्णमार्गगाम्यानि प्राणिनां यमानं मनोस्य
टी. र्व्वासं रूपमपोसंश्रोतरेअवतिष्ठते वरमेविशुद्धं रूपंशाध्यतस्वयमेवव
अ. लीयते यथोक्तं येनमजसितमजेति येनमनसामजस्विविराडादिभावं
तदपिमनसामजेत्यर्थः तदेवं मवहारापेक्षयापाक्षिद्धविराट्सूत्रांतर्या
मिषुमनसः स्थिरीकरणार्थायत्नोभ्यासस्तत्फलभूतोयोगः समाधि
र्यथवस्तमेवचेतसः स्थैर्यतेनयुक्तेनयुक्तं यचेतस्तेन नान्यगामिना
अनन्यगामिना नेकपेतिवत्समासः तेनचेतसापरमंसर्वोत्कृष्टंपुरु
षंनिरस्ताशेषदोषं यस्मैवेणपुरस्तात्सर्वाया मनश्रोष तस्मात्पुरुष इ
तिनिर्वचनात् दिव्यंद्योतमानं अनुचिंतयन् अहमेव भगवान्सर्वात्मा
वासुदेव इति सततमाचार्योपदेशमनुध्यायन् तमेवनदीसमुद्रमायेन
यातिहेपार्थ तथाचश्रुतिः यथानद्यः स्यंदमानाः समुद्रेस्तंगच्छंति
नामरूपेविहाय तथाविद्वान्पुण्यपापेविधूयपरात्परंपुरुषमुपैति
दिव्यमिति परात्सूत्रात्परंअंतर्यामिणं ८ ॥

आनन्दीटीका

अत्रोपायमाह ॥ – यमनियमादीनांबहिरङ्गानांध्यानधारणासमाधीनांवान्तरङ्गा
नामभ्यासयोगेभ्रूमध्यादिदेशे चिरंचित्तस्यबाह्यारणादावेतस्या
वदेशेपरमेश्वरे सिद्धेयेनवरत्नेत्तानैकेतानतयाध्यानदार्ढ्यम् ध्यान
स्यैववस्तरूपभूमवात्सततमर्थमात्रनिर्भासनयासमाधिदार्ढ्यंम
भ्यासयोगः तद्युक्तेनचेतसा अनपवादनन्यगामिना अमंविषयम
गच्छतापरमंपुरुषंदिव्यमनुचिंतयन्योकक्रमेणानुसन्दधानः त
मेवपरमंपुरुषंयाति [illegible] ॥
इतिप्रतिपादितार्थमेनमेवार्थं

रामकेदीटीका

विवरीतमाह ॥ निमानुस्मरणायतत्त्वलक्षणसमाधौपुक्तेनसंबद्धेनाः तपवाःतस
गामिनापश्यो किंतत्रव्यतिरिक्तवस्त्वन्तरविरतगातिनाः तः कुर्यो
नचिन्तयन्सदाध्यायन् संस्कारबलात्परमेसर्वेदेवज्ञेभ्य उत्कृष्टंपु
षमेकमात्मानंदिव्यंदिविपरमव्योम्निस्वभावमयंभवंयातिप्रपद्य
नादात्म्यमुपैति [illegible]

नमोऽवसाधनम् परमुत्क्रान्तिकर्म प्रतिपाद्य दानीं शरणजयादिसा
ध्ययोगसाधनमपरं तं प्रतिपादयितुमाह ८ ॥

यथाजीवद्दशायां मय्यर्पित लासिकी [illegible] टीका मनोबुद्धिर्मामेवैष्यति एवं देहत्यागकालेपि मत्प्राप्ति

रित्याह ॥ अभ्यासयोगयुक्तेन नित्यानुस्मरणसंबंधेनानन्यगामिनावलन्तर
विरतगतिना चेतसान्तःकरणेनात्मानमनुचिन्तयन् शरीरभेदान
न्तरं निहृतकलेवरश्चयः पश्चाद्ध्यायन्पुरुषादिव्यं द्योतनात्मकं पर
मं पुरुषं पुरुषोत्तमं श्रीपरमेश्वरं याति प्रतिपद्यते तादात्म्यमुपेत्य वि
देहमुक्तो भवतीत्यर्थः [illegible] नार
[illegible] विशेषणानि
तदभेदेनात्मा [illegible] कथंमिति [illegible]
[illegible]
[illegible] ८ ॥

पंचोलीटीका

परमपुरुषार्थहेतुभूतायाः इष्टायाः अंत्यभावनायाः अभ्यास
एवकारणमित्याह अभ्यासेति हे पार्थ अभ्यासयोगयुक्तेन तत
द्विषयोनिरंतरज्ञानप्रवाहोऽभ्यासः सएवयोगस्तेन युक्तेचेतसा
तेनाभ्यासयोगयुक्तेनचेतसानान्यगामिनाअन्यत्रविषयांतरेग
मनरहितेनअनुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन्परमे
निरतिशयेदिविसूर्यमंडले भवंदिव्यंपुरुषं याति प्राप्नोति ८

मराठीरसमिद्धायिनी ॥

अथसर्वकालीनानुस्मृतावुपायमाहाभ्यासेति योनःपुन्येनमब्धे
कर्मणिप्रवृत्तिरभ्यासः सएवयोगउपायस्तेनदेवनायुक्तेनसाव
धानेन अतएवानन्यगामिनापरमेश्वरस्तस्मात्स्वन्यविषयंगंत
शीलमस्येति तादृशेनचेतसादिव्यंद्योतनशीलमत्यद्भुतदीप्ति
विशिष्टंपरमंपरात्परंपूर्णमीनाति हितरणीतिकत्वाजगद्धातैतउ

पद्भवकारकउष्टदानवादिहिंसायैवप्रतावतारं अथवपरमं परा
मर्वोत्कृष्टमाचतुर्वर्गसंपदस्यतंपुरुषंपुरुषोत्तमंसर्वेश्वरं अथ
वा परमं सर्वोत्कृष्टं पुरुषं वासुदेवाख्यंपुरुषश्रीविस्मरन्नचिंत
यन् अनुस्मरन् देहपार्थतमेवयाति तत्सारूप्यमेवाप्नोति ८॥

मधुभाष्य

अभ्यासेति अभ्यासएकयोगोऽभ्यासयोगः दिव्यंपुरुषंपुरि
शयं सर्वांच सर्वान्तःपुरुषः सर्वासुपूर्षु पुरिशयो नैनेन किं
चनानावृतं नैनेन किंचनासंवृतमितिश्रुतेः दिव्यस्वर्ग्यादि
उद्युतं दिवुक्रीडेतिधातोः ध्येयमाह ८ कविमिति कविःस
र्वज्ञः यःसर्वज्ञइतिश्रुतिः त्वंकविःसर्ववेदनादितिब्राह्मे धात
रंधारणपोषणकर्त्तारं डुधाञ्धारणपोषणयोरितिधातोः

भाषा अनुवाद टीका ॥

और स्मरण मे परम कारण अभ्यास को देखावते हुये कहते हैं कि अभ्यास कहे समान जातीयकी प्रतीतिका प्रवाह जो धारा वह योग है अर्थात् उपाय है उससे एकाग्र होय जिसकी बुद्धि अन्यविषयमे न जाय ऐसा मनुष्य उस बुद्धिके द्वारा प्रकाश रूप परमेश्वर को निरन्तर करिके हे पार्थ उस परमेश्वर को प्राप्त होता है ८ ॥

दोहा

अभ्यास योगयुत चितसें अनन्यगामीसें कोय जो पार्थ चिंतन
करे मिलें परमपुरुष दिवसोय ८॥

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्
यः सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः प
रस्तात् ९ ॥

शाङ्करभाष्यं टीका

कविमिति कविं क्रान्तदर्शिनं सर्वज्ञं पु
किं विशिष्टं पुरुषं यातीत्युच्यते कविमिति कविं क्रान्तदर्शिनं सर्वज्ञं पु
राणं चिरन्तनमनुशासितारं सर्वस्य जगतः प्रशासितारं अणोः सूक्ष्माद
णीयांसं सूक्ष्मतरं अनुस्मरेदनुचिन्तयेत् यः कश्चित् सर्वस्य कर्मफला
जातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं विभज्य दातारमचिन्त्यरू
पं नास्य रूपं नियतं विद्यमानमपि केनचित् चिन्तयितुं शक्यते इत्यचि
न्त्यरूपस्तं आदित्यवर्णमादित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य त
मादित्यवर्णं तमसः परस्तादज्ञानलक्षणान्मोहान्धकारात् परं तमनुचि
न्तयन् यातीति पूर्वेणैव सम्बन्धः ९ ॥

आनन्दगिरिकृतटीका

किं विशिष्टं पुरुषमनुचिन्तयन्निति सम्बन्धः चकारात् कया वा नाड्यो
त्क्रामन्निति अनुक्तमुच्यते तत्र ध्यानद्वारा प्राप्यस्य पुरुषस्य विशेषणानि
दर्शयति उच्यत इति क्रान्तदर्शित्वमतीतादिदेशेषस्य वस्तुनो दर्शनशी
लित्वं तेन निष्पन्नमर्थमाह सर्वज्ञमिति चिरन्तनमादिमतः सर्वस्य का
रणत्वादनादिमित्यर्थः सूक्ष्ममाकाशादि ततः सूक्ष्मतरं तदुपादानत्वा
दित्यर्थः यो यथोक्तमनुचिन्तयेत् सततमेवानुचिन्तयन् यातीति पूर्वेणै
व सम्बन्ध इति योजना ननु विशिष्टजात्यादिमतो यथोक्तमनुचिन्तने
फलवत्त्वं न त्वस्मदादीनामित्याशङ्क्याह यः कश्चिदिति फलम
त उपपन्नेरिति न्यायेनाह सर्वस्येति एतदप्रमेयं ध्रुवमिति श्रुतिमाश्रि
त्याह अचिन्त्यरूपमिति नहि परस्य किंचिदपि रूपादि वस्तुतोऽस्ति
अरूपवदेव हीति न्यायात् कल्पितमपि नास्मदादिभिः शक्यते चिन्त
यितुमित्याह नास्येति मूलकारणादज्ञानात् तत्कार्याच्च पुरस्तादुपरिष्टा
द्व्यवस्थितं परमार्थतो ज्ञानतत्कार्यास्पृष्टमित्याह तमस इति ९

गी॰
टी॰ अ॰

स्वामिकृतटीका ॥

पुनरप्यनुचिंतनीयं पुरुषं विशिनष्टि कविमिति कविं सर्वज्ञं पुराणं अनादिसिद्धं अनुशासितारं नियंतारं अणोः सूक्ष्मादपि अणीयांसं अतिसूक्ष्मं सर्वस्य धातारं पोषकं अपरिमितमहिमत्वात् अचिंत्यरूपं आदित्यवत् स्वपरप्रकाशात्मको वर्णः स्वरूपं यस्य तं तमसः प्रकृतेः परस्तात् वर्तमानं एवंभूतं पुरुषं अंतकाले भक्तियुक्तः यः स्मरेदिति ५ ॥

पिशाचभाष्यटीका ॥

कविं क्रांतदर्शिनं सर्वज्ञं पुराणं पुरातनं अनुशासितारं अणोरणीयं सर्वप्राणिनां स्वधर्मे स्थितिनिमित्तं अणोरणीयांसं सूक्ष्मादपि सूक्ष्मतरं मनस्मरेयुः सर्वस्य धातारम् अचिंत्यरूपं यस्य तम् आदित्यवर्णं प्रकाशरूपं तमसः परस्तात् परतो वर्तमानं ५ ॥

रामानुजभाष्यटीका ॥

कविं सर्वज्ञं पुराणं पुरातनं अनुशासितारं शिक्षकं अणोरणीयांसं जीवादपि सूक्ष्मतरं सर्वस्य धातारं सर्वस्य स्रष्टारं अचिंत्यरूपं सकलेतरविसजातीयस्वरूपं आदित्यवर्णं तमसः परस्तात् अप्राकृतस्वासाधारणदिव्यरूपं ५ ॥

अभिनवगुप्तकृतटीका [illegible]

परमार्थप्रपाटीका ॥

एवमनुस्मरेदिति आदित्यवर्णं तत्त्वस्य परिच्छेदकं मायिकं भ्रांतिमयमोहतमसोतीतत्वाद्भावनमित्याशयः ५

अथ चिंतनीयं पुरुषं विशिनष्टि कविमिति द्वाभ्यां कविं सर्वज्ञं पुराणमनादिसिद्धं अनुशासितारं नियंतारं अणोः सूक्ष्मादप्यणीयांसं सर्वस्य स्थूलसूक्ष्मप्रपंचस्य धातारं माश्रयभूतं सूक्ष्मदेवाचिंत्यरूपं तमसः प्रकृतेः परस्ताद्वर्तमानं आदित्यवत् स्वपरप्रकाशमयो वर्णः स्वरूपं यस्य एवंभूतं पुरुषं ५ ॥

वनमालीटीका ॥

पुनरपि मुमुक्षुभिः ध्येयमतःप्राप्यं पुरुषं विशिनष्टि कविमिति कविं सर्वज्ञं पुराणं सर्वस्यादिभूतं स्वस्यादिरहितं अनुशासितारं अन्तर्यामिरूपेण अणोरणी

मं

यो संहृत्यस्मादपि सूक्ष्मं सर्वस्यान्तरं सर्वस्य जीवजडादेर्धारकं पोषकं
चाचिन्त्यरूपं अणुत्वमहत्त्वसर्वकर्तृत्वौदासीन्यसर्वभूतसमत्वस्थित्या
हकत्वभक्तानुग्राहकत्वादीनां लोके एकत्र विरुद्धानां च तानां नेदा
शनेन गुणानामालयत्वेन तस्मादपि विनाविंतयितुमशक्यमित्यर्थः
आदित्यवर्णं सूर्यवत्स्वपरप्रकाशकवर्णं येन तमसः प्रकृतेः परस्ता
त् प्रकृतिपरत्वेन नियामकत्वेन तद्धर्मास्पृष्टत्वेन च मायां तु प्रकृतिं विद्या
न्मायिनं च महेश्वरमिति श्रुतेः नमोऽव्यक्ते शिवे नित्यमजे योनिः स
नातने प्रकृतिर्विकारोऽप्रलयं प्रधानं प्रभवाप्ययौ अनादिकमनन्तं च
त्वकं ममचलं ध्रुवं सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतं तेन योनितो
नामधेयानि तस्यैवाध्यात्मचिन्तकैरित्याद्यमेयिके तमः प्रकृतिश
ब्दयोः पर्यायत्वोक्तेः ९ ॥

अष्टमवैजयन्तीटीका ॥

यो अक्तां
ननु योगं विनाभ्यासं एवं कथं संभवतीत्यपेक्षायां योगमुक्तिमाह पंचभिः कवि
मिति मोक्षार्थी भक्तस्तं पुरुषमुपैति गच्छतीत्यनेनान्वयः
कीदृशमित्यपेक्षायां सप्त विशेषणान्याह कविं सर्वसामान्यविशेषज्ञा
तृत्वेन यः सर्वज्ञः सर्ववित् इति श्रुतिसिद्धमित्यनेन चतुर्मुखस्य कवित्वा
निराकृतं तस्य विशेषसर्वज्ञत्वाभावात् पुराणं पुरातनमित्यनेनाप्यस्य
विधिशिवादित्वं सूचितम् यस्माद्ब्रह्मा जायते रुद्रो जायते इति श्रुत्या त
योर्जन्यत्वश्रवणात् अनुशासितारं सर्वेषां ब्रह्मरुद्रेन्द्रादिदेवानामपु
पदेष्टारमित्यनेनाप्यस्य जगद्गुरुत्वं दर्शितम् ननु जीवस्याप्यनादित्वे
न अजो नित्यः शाश्वतोऽयं पुराण इत्युक्तत्वेन च पुराणत्वं देहादिपाल
कत्वेनानुशासितृत्वं च सम्भवत्यतोऽत्र चिन्तनीयः किं जीवः स्यादित्या
शंकायामाह अणोरणीयांसमिति अणोरणुपरिमाणकाज्जीवा
दणीयांसं अतिशयेनाणुरणीयांस्तमणीयांसं जीवस्याप्यन्तःप्रवि
ष्टं शास्तारमित्यर्थः अन्तःप्रविष्टः शास्ता जनानामिति श्रुतेः नन्वणो

श्री॰
टी॰ अ॰

रूपात्सूक्ष्मादणोर्जीवस्याप्यणीयस्त्वं स्यादिति चेत्तत्राह सर्वस्य धातारमिति सर्वस्य चेतनाचेतनात्मकस्य जगतो धातारं स्रष्टारं धारकं वा जीवस्य जगत्स्रष्टृत्वासत्त्वेनाणीयस्त्वं नास्तीति भावः ननु अणीयसो वस्तुनो जगत्स्रष्टृत्वं कथमुपपद्यते इति चेत्तत्राह अचिंत्यरूपमिति चिंतयितुं योग्यं चिंत्यं रूपं यस्यासावचिंत्यरूपस्तमवितर्क्यस्वरूपं अचिंत्यरूपं अचिंत्यरूपत्वान्नास्य महतो महीयस्त्वादणोरणीयस्त्वाद्वेदेनोऽज्जगत्स्रष्टृत्वं जगद्धारकत्वं वा घटत एवेत्यर्थः ननु तर्हि किं प्रकृतिर्यतोऽस्याप्यचिंत्यरूपत्वमिति चेत्तत्राह तमसः परस्तात् तमःशब्दवाच्यायाः प्रकृतेः परस्तात्पर तत्स्थितमतो न प्रकृतिरित्यर्थः ननु तर्ह्यस्य किं रूपं स्यादित्यपेक्षायामाह आदित्यवर्णं स्वयं वस्तुकाशरूपं आदित्यवर्णं तमसः परस्तात् आप्रत्नवालत्ववर्णमित्यादिश्रुतेः ९

मधुसूदनी टीका ॥

पुनरपि तमेवानुचिंतयितव्यं गंतव्यं च पुरुषं विशिनष्टि ॥

कविं क्रांतदर्शिनं तेनातीतानागताद्यशेषवस्तुदर्शित्वेन सर्वज्ञं पुराणं चिरंतनं सर्वकारणत्वादनादिमिति यावत् अनुशासितारं सर्वस्य जगतो नियंतारं अणोरणीयांसं सूक्ष्मादप्याकाशादेः सूक्ष्मतरं तदुपादानत्वात् सर्वस्य कर्मफलजातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं फलमत उपपत्तेरिति न्यायात् न चिंतयितुं शक्यमपरिमितमहिमत्वेन रूपं यस्य तं आदित्यस्येव सकलजगदवभासको वर्णः प्रकाशो यस्य तं सर्वस्य जगतोऽवभासकमिति यावत् अत एव तमसः परस्तात् तमसो मोहांधकारादज्ञानलक्षणात्परस्तात्प्रकाशरूपत्वेन तमोविरोधिनमिति यावत् अनुस्मरेत् चिंतयेत् यः कश्चिदपि स तं यातीति पूर्वेणैव संबंधः स तं परं पुरुषमुपैति दिव्यमिति परेण वा संबंधः ९

सदानंदी टीका ॥

पुनश्चिंतयितव्यं गंतव्यं चैव पुरुषं नानाविशेषणैः स्तुहे विशिनष्टि हरिः स्वयं अतीतानागतादेस्सर्वस्यैव वस्तुनः स्पष्टदर्शितया क्रांतदर्शी स कविरुच्यते तमनादितया सर्वकारणत्वाच्चिरंतनं समस्तस्य नियंतारमाकाशादेस्सूक्ष्मतः तत्कारणतया सूक्ष्मतरं सर्वस्य कारणं सर्वस्य

फलजातस्यविविचित्रत्वेनकर्मणां प्राणिभ्यःसंविभक्तारमचिंत्यम
हिमत्वतः नास्यचिंतयितुंशक्यंरूपंकेनापितंतथा आदित्यस्ये
वसर्वस्यप्रपंचस्यावभासकः प्रकाशोयस्यतंतस्मान्मोहांध
तमसःपरं तमित्येचिंतयेद्यस्तुसंतयात्येवपुरुषं ९ ॥

नीलकंठी टीका

तदेवंउपासनायाःस्वरूपमुक्त्वाउपास्यस्यस्वरूपमाह कविमिति
कविंक्रांतदर्शिनंसर्वज्ञं पुराणंचिरंतनं अनुशासितारंजगतोंत
र्यामिणं अणोः सूक्ष्मादप्याकाशादेरणीयांसंसूक्ष्मतरंयोऽनु
स्मरेत् अनुचिंतयेत् सर्वस्यकर्मफलस्यधातारंविभागेनप्रदा
तारं अचिंत्यरूपं नास्यरूपंविद्यमानमपिकेनचिच्चिंतयितुं
शक्यं आदित्यवर्णंआदित्यस्येवनित्यप्रकाशरूपोवर्णोदीप्य
मानतायस्यतं आदित्यवर्णंसर्वजगदवभासकमित्यर्थः तम
सः देहेंद्रियादावनात्मनिआत्माभिमानरूपःविद्यातःपरस्ता
त् पराचीनंसतिदेहाभिमानेनप्रकाशतेयोगयुक्तात्मकेतत
स्मिन्स्वयमेवप्रकाशतइत्यर्थः ९ ॥

आनंदी टीका

तस्यविशेषणान्याह कविंसर्वज्ञंपुराणंकालेनानवच्छिन्नंसर्
वेषामपिपूर्वतरमनुशासितारंशास्त्रद्वारेणोपदेष्टारंनानास्व
कर्माणिनियोजकं अणोरणीयांसम् सर्वत्रांतरनुप्रविश्यप्रे
रकत्वात्सूक्ष्मं सर्वस्यविश्वस्यकर्मफलस्यचधातारंकर्ता
रम् अस्थूलमनण्वह्रस्वदीर्घमलोहितमितिरूपादिप्रतिषे
धात् अचिंत्यरूपाम् आदित्यवर्णंज्योतिर्मयंसर्वप्रकाशकं
तमसःपरस्तात् अज्ञानमेवतमोतीत्यस्थितम् ९ ॥

रामकंठी टीका

एवमवाधितोपपत्त्युपन्यासपूर्वंयथोक्तात्तत्वज्ञानमात्रसाधनं
परमुत्क्रांतिक्रमंप्रतिपाद्येदानींप्राणजयादिसाध्ययोगसाध
नमपरंतंप्रतिपादयितुमाह सएवंविधोयोगीतंदिव्यंदिविप

गी॰ टी॰ अ॰

50

रमयोगिभवमतएवपरंसर्वोत्कृष्टंपुरुषमीश्वरमात्मानंउ॰
पैतिप्राप्नोति कोसौयोभक्त्याभगवदनुग्रहादित्यलोकप्रभा
संध्यायासकलपुरुषार्थसिद्धिबीजभूतया तथाप्रत्युतस्वरू
पनिरूपणसमाधिसामर्थ्येनयुक्तः संततस्याभ्यासस्यायामब
लेनस्थिरसमाधानेनमनसान्तःकरणेन सर्वस्यधातारंपरम॰
कारणमनुस्मरेदन्तकालेनुचिंतयेत् ९ ॥

लासिकी टीका

ननुकथमवच्छिन्नस्यात्मनोनुचिन्तनेनानवच्छिन्नपुरुषोत्तमा
वाप्तिरित्याशंक्य पुरुषोत्तमाधिविशेषणानि तदभेदेनात्मनो
प्रतिदिशति कविमिति कविंसर्वज्ञंक्रान्तदर्शिनंवापुराणम॰
नादिसिद्धमनुशासितारंनियन्तारं अणोःसूक्ष्मादप्याकाशा
देरणीयांसंसूक्ष्ममतिदुर्लक्ष्यं सर्वस्यचराचरस्यधातारंधार॰
कंपोषकंच अचिन्त्यचिन्तयितुमशक्यममनोगोचरंरूपं॰
यस्यतमादित्यवर्णंस्वप्रकाशंनतुपरप्रकाश्यम् अतएवतम
सोज्ञानरूपादन्धकारात्परस्तात्पृथक्तयावर्तमानम् ९ ॥

पंचोली टीका

तमेवपुरुषंदर्शयति कविमिति यःपुराणंचिरंतनंकविंस
र्वज्ञंअनुशासितारं अणोःसूक्ष्मादपि अणीयांसंसूक्ष्मतरंस
र्वस्यकर्मफलज्ञानस्यधातारंविचित्रतयाप्राणिभ्योविभक्ता
रमचिंत्यरूपंविद्यमानमपिरूपंकेनचिच्चिंतयितुमशक्यंय
स्यतं आदित्यएवनित्यचैतन्यप्रकाशोवर्णोयस्यतं आदित्य॰
वर्णंतमसः अज्ञानलक्षणान्मोहान्धकारात्परस्तात्पृथक्त्वव
र्तमानमनुचिंतयेत् ९ ॥

रणवीरसमिद्बोधिनी॥

अथप्रयाणकालेचकथंज्ञेयोसिनियतात्मभिरित्यनेनमरण
समयेकिंप्रकारकस्वरूपेणानुचिंतनीयोसीतिनिरनुयोगके
वलमनभिज्ञतयैवप्रयाणकालीनभगवत्स्वरूपप्रकारप्रति
योगिकज्ञानविषयोक्तिसर्वकंप्रश्नमेवोन्नयति कविमितिद्व
भ्यां सतंप्रसिद्धं दिव्यमत्यद्भुतयोक्तिमंतंपरंमनोवाचामगो
चरंपुरुषंपरमेश्वरमुपैति तत्स्वरूपंव्रजतीति सकस्त्वये
त्याशंविघ्नानाह यःकर्मयोगी अचलेनसंकल्पांतरैरप्य
स्वोचितकर्मणःसकाप्रज्ञालयितमनसाकेन तथा भक्त्याप
ध्यत्वेनयज्ज्ञानंसाभक्तिरितिकथ्यते इतिलक्षितया तथायोग
बलेन योगाभ्यासउपायरूपायः तस्यबलेनचयुक्तःसन् ९

मधुभाष्य

धाताविधातापरमोतसंदृगितिश्रुतिः ब्रह्मास्याणुरित्या
रभ्यतस्यप्रसादाद्विहृंति तदादिष्टफलांगतिमित्यादिव मो
हरूपमें तमसोव्यक्तात्परतः स्थितंतमसःपरस्तात् इति अव्य
क्तंवैमतः परस्ताद्धिसततइति पिप्पलादप्रामाण्यात्मृत्युर्वा
मतः मृत्युर्वैतमोज्योतिरमृतमितिश्रुतेः वायुजयादियोग
युक्तानांमृतिकालेकर्तव्यमाह ९॥

51

भाष्य अनुवाद टीका

फेरि भी चिन्तनीय पुरुष का स्वरूप दो श्लोकसे कहते है कि कवि क
हे सर्वज्ञ सकल विद्यों के निर्माण कर्ता पुराण कहे अनादि सिद्ध अनु
शासता कहे समस्त जगतके नियन्ता औ अणोरणीयांस कहे सूक्ष्म
से भी सूक्ष्म आकाश काल दिशा से भी सूक्ष्म औ सबके धाता कहे
पोषण कर्ता अपरिमित महिमा से अचिन्त्य रूप अर्थात् मलपुक्म म
नबुद्धि के अगोचर कहे अदृश्य औ आदित्य वर्ण तथा तम जो प्रकृ
ति मया तिससे पर ऐसे मेरे रूप को जो स्मरण करै है ९ ॥

चौपई

अणुसें सूक्ष्म अतिस्मर्ता या
कवि पुराण अनुशासनकर्ता जो
ता सभको रूप अचिंत आदित्यवर्ण तमपरे अनंत ९ ॥

52

प्रयाणकाले मनसाऽचलेन भक्त्यायुक्तो योगबलेन
चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पु
रुषमुपैति दिव्यं १० ॥

शाङ्करभाष्यटीका ।

किंच प्रयाणकाल इति प्रयाणकाले मरणकाले मनसाऽचलेन प्रच
लनवर्जितेन भक्त्या युक्तो भजनं भक्तिः तया युक्तो योगबलेन चैव योगस्य
बलं योगबलं तेन समाधिजसंस्कारप्रचयजनितं स्वचित्तस्थैर्यलक्षणं
योगबलं तेन च युक्त इत्यर्थः पूर्वं हृदयपुण्डरीके वशीकृत्य चित्तं तत
ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थाप
यित्वा सम्यगप्रमत्तः सन् स एवं बुद्धिमान् योगी कविं पुराणमित्यादि
लक्षणं तं परं पुरुषमुपैति प्रपद्यते दिव्यं द्योतनात्मकं १० ॥

आनन्दगिरिकृतटीका ।

इतस्य भगवदनुस्मरणं सफलत्वादनुष्ठेयमित्याह किंचेति कदा तद
नुस्मरणे प्रयत्नातिरेकोऽनुष्ठेयमितत्राह प्रयाणकाल इति कथं तदनु
स्मरणमित्युपकरणकलापमपेक्ष्यमाणं प्रत्याह मनसेति योऽनुस्मरेत्
स किमुपैति तत्राह सतमिति मरणकाले क्लेशबाहुल्येपि प्राचीना
भ्यासप्रशंसादितबुद्धिवैभवो भगवन्तमनुस्मरन् यथासंतमेव देहाभि
मानविगमानन्तरमुपागच्छतीत्यर्थः भगवदनुस्मरणस्य साधनं मनसै
वानुद्रष्टव्यमिति श्रुत्युपदिष्टमाचष्टे मनसेति तस्य चञ्चलत्वान्न
स्थैर्यमीश्वरे सिध्यति तत्कथं तेन तदनुस्मरणमित्याशंक्याह अ
चलेनेति ईश्वरानुस्मरणे प्रयत्नेन प्रवर्तिते विषयविमुखे तस्मि
न्नेवानुस्मरणयोगप्यौनःपुन्येन प्रवृत्त्या निश्चलीकृते तत्स्खलना
विकलं तेनेतिव्याचष्टे प्रचलनेति संप्रत्यनुस्मरणाधिकारिणं वि
शिनष्टि भक्त्येति परमेश्वरे परेण प्रेम्णा सहितो विषयान्तरविमुखोऽनु
स्मर्तव्य इत्यर्थः योगबलमेव स्फारयति समाधिजेति योगः समाधिः
चित्तस्य विषयान्तरवृत्तिनिरोधनपरस्मिन्नेव स्थापनं तस्य बले सं

स्कारश्चययोः स्थैर्यकारणकरणं तेन तत्रैव स्थैर्यमित्यर्थः चकारस्तु पूर्वेण सम
च्चयमन्वाचष्टे तेन चेति यत्र कया नाड्योत्क्रामन् यातीति तत्राह ऊर्ध्वमि
ति चित्तं हि स्वभावतो विषयेषु व्याप्तं तेभ्यो विमुखीकृत्य हृदये पुण्ड
रीकाकारे परमात्मस्थाने यत्नतः स्थापनीयं अथ यदिदमस्मिन् ब्रह्म
पुरे इत्यादिश्रुतेस्तत्र चित्तं वशीकृत्य आदावनन्तरं कर्तव्यमुपदिशति
तत इति इडापिङ्गले दक्षिणोत्तरे नाड्यौ हृदयान्निःसृते निरुध्य तस्मादेव
हृदयादूर्ध्वगमनशीलया सुषुम्नयानाड्या हार्दं प्राणमानीय कण्ठा
वलम्बितस्तनसदृशं मांसखण्डं प्रापय्य तेनाधुना भ्रुवोर्मध्ये तमा-
वेश्य अप्रमादवान् ब्रह्मरन्ध्राद्विनिःक्रम्य कविं पुराणमित्यादिवि-
शेषणं परमपुरुषमुपगच्छतीत्यर्थः भूमिजयक्रमेणोत्य च भूम्यादी
नां पञ्चानां भूतानां जयो वशीकरणं तस्य तस्य भूतस्य स्वाधीनचेष्टा
वैशिष्ट्यं तद्द्वारेणोत्पतन्नुच्यते सत [illegible] मित्यादि व्याचष्टे स एवमिति १०

स्वामिकृतटीका

प्रयाणकाले अन्तकाले भक्तियुक्तो निश्चलेन मनसा यो नुस्मरेत् मनोने-
श्चल्ये हेतुः योगबलेन च सम्यक् सुषुम्नामार्गेण भ्रुवोर्मध्ये प्राणमावेश्य
ति स तं परं दिव्यं पुरुषं द्योतनात्मकं प्राप्नोति
[illegible]
१० ॥

पिशाचभाष्यटीका

प्रयाणकाले मनसाचलेन चलनवर्जितेन भक्त्या च युक्तो योगबलेन चै
व योगस्य बलं योगबलं तेन भ्रुवोर्मध्ये प्राणमावेश्य व्यवस्थाप्य सम्यग्य
थाशास्त्रं स तं परं ब्रह्मपुरुषमात्मानं दिव्यमुपैति १०

रामानुजभाष्यटीका

तमेवंभूतमहरहरभ्यस्यमानभक्तियुक्तयोगबलेनाहितसंस्कारवत
याचलेन मनसा प्रयाणकाले भ्रुवोर्मध्ये प्राणमावेश्य संस्थाप्य तत्रा
भ्रुवोर्मध्ये दिव्यं पुरुषं ध्यानस्मरेत् स तमेवोपैति तद्भावं याति तत्समानै
श्वर्यो भवतीत्यर्थः १० ॥

अभिनवगुप्तकृतटीका

[illegible] देवनीति
[illegible] प्राणमावेश्य [illegible]
[illegible] दिव्य [illegible]
[illegible] भ्रुवोर्मध्य इति प्राग्वत् १० ॥

परमार्थप्रपा टीका

प्रयाणकालेऽन्तकाले भक्त्या युक्तः सन् तन्निर्वाहितयोगबलेन अचलेन
स्थिरीकृतेन मनसा सम्यक् सुषुम्नाविवरेण भ्रुवोर्मध्ये प्राणमावेश्य अनु
स्मरेन् स तं पुरुषं दिव्यमेति १० ॥

वनमालीटीका ॥

स्वभक्तस्य योगिनः प्रयाणकाले कर्तव्यमाह प्रयाणकाल इति प्रयाणका
लेऽन्तकाले अचलेनैकाग्रेण भगवदाकारातिरिक्तवृत्तिशून्येन मनसा अव
[illegible]ण दिवासितेन तं पुरुषं योऽनुस्मरेदित्यनुवर्तते कीदृशः भक्त्या भगवद्वि
षयकप्रेमप्रवाहेण युक्तो योगस्य चित्तसमाधेर्बलेन तज्जनितसंस्कारसा
मूहेन व्युत्थानसंस्कारविरोधिना च युक्तः पूर्वं प्रथमं हृदयपुंडरीके वशी भूमिजय
कृत्य ततः ऊर्ध्वगामिन्या सुषुम्नानाड्या [illegible] गरूपदिष्टमार्गेण क्रमे
ण भ्रुवोर्मध्ये आज्ञाचक्रे प्राणमावेश्य स्थापयित्वा सम्यगप्रमत्तोऽचलं
आरं [illegible] पुराणमित्युक्तलक्षणं परं जगदुदयादिक
[illegible]रं पुरुषं पूर्णगुणादिव्यं द्योतनात्मकमुपैति प्राप्नोति १० ॥

ऊरुमवैजयन्तीटीका ॥

किं कृत्वा प्राप्नोतीत्यपेक्षायां योगप्रकारमाह प्रयाणकाल इति प्रयाणका
ले मरणसमये अचलेनैकाग्रेण मनसा आकृतविषयसंकल्परहितेन
भ्रुवोर्मध्ये आज्ञाचक्रे सम्यक् सावधानः सन् प्राणमूर्ध्वगतिकं वायु
मावेश्य संस्थाप्य भक्त्या श्रवणकीर्तनाद्यात्मिकया च पुनः योगबलेन
वाष्टाङ्गयोगसामर्थ्येन च युक्तो मद्भक्तः परं सर्वोत्कृष्टं दिव्यमानंदात्मकं
पुरुषं विष्णुं मामुपैति गच्छति तत्लोकस्थो वा भवतीत्यर्थः १०

मधुसूदनी टीका
कदा तदनुस्मरणेन प्रयतनातीति स्फोऽभिव्यक्ते तदाह ॥
प्रयाणकालेऽन्तकाले अचलेनैकाग्रेण मनसा तं पुरुषं योऽनुस्मरेदित्यनुव
र्तते कीदृशः भक्त्या परमेश्वरविषयेण परमेण प्रेम्णा युक्तो योगस्य समाधे

१ गामिन्या सुषुम्नया नाड्या गुरूपदिष्टमार्गेन
भूमिजयक्रमेण भ्रुवोर्मध्ये

गी॰ बलेन तज्जनितसंस्कारसमूहेन युक्त्या न संस्कारविरोधिना वशीकृत्य
टी॰ अ॰ प्रथमं हृदयपुंडरीके वशीकृत्य ततऊर्ध्व आज्ञाचक्रे प्राणमावेश्य स्थाप
यित्वा सम्यगप्रमत्तो ब्रह्मलं प्राकृतं क्रमसंपूर्वमुपासकं तं कविं पुराणमनु
२मं शासितारमित्यादिलक्षणं परंपुरुषं दिव्यं द्योतनात्मकमुपैति प्रतिपद्यते

54

[illegible]

सदानंदी टीका

अंतकाले बलेनांतःकरणेनानुसंस्मरेत् भगवद्विषयेण निश्चलेनायु
क्तः समाधिना समुत्थितन्यसंस्कारसमूहेन युतः पुनः आदौ हृ
दिवशीकृत्य ततो भूमिजयक्रमात् सुषुम्नयोर्ध्वगामिन्या नाड्या वायोर्मा
र्गेतास्थापयित्वात्मनः प्राणमाज्ञाचक्रे समाहितः ब्रह्मरंध्रात्सुउ
म्योपासकं तं स्वचिंतितं कविं पुराणमित्यादिलक्षणं पुरुषं परं योगि
नामकमीशानमद्भुतं प्रतिपद्यते १०॥

नीलकंठी टीका॥

उपासनायाः फलमाह प्रयाणेति प्रयाणकाले मनसाऽचलेन हृत्संग
वर्जितेन भक्त्या भगवति वासुदेवे आराध्यत्वबुद्ध्या युक्तो योगबलेन यो
गो मनःप्राणेंद्रियक्रियानिरोधो हृदयपुंडरीके नेषां वशीकरणमिम
नस्यैव बलेन युक्तो भूमिकाजयक्रमेण प्रागेव मूलाधारादिचक्र
स्थानेषु आरोहक्रमेण संचारितपवनोंऽतकाले भ्रुवोर्मध्ये आज्ञाचक्रे प्राणं
आवेश्य सुषुम्नया नाड्या मूलाधारादुत्थाप्य सर्वं कुंभकेन सम्यक् ति
स्थापयित्वा स्थापनप्रयोजनं तत्र विस्मरणपूर्वकं दिव्यपुरुष
ने तद्भ्रूमध्यादुपर्युपरि नीयमाने वायौ मनो मूर्छामापद्यत इति तस्या
वस्थायां न भवतीमं प्रमयप्रसक्तेरेव संपायत ततो विराट्मार्गपर्वणा
मानं दृष्टपुरुषस्य स्थानविशेषप्रापकस्य माध्यमान सन्नेव
णं कृतं वा न दोषः सनावासितं मनो भ्रूमध्या योगिना ऊर्ध्वया नाड्या उ
प्राणोऽमृके वश्यो श्रवपरं भिन्नाप्रचलितेन सनिलवत् हृतिकं भूत्वा पूर्व
स्कारप्रावस्थायोगमाहात्म्याद् दिव्योपाध्युपेतमविराट्पर्वं देव

रूमिश्रमानस्तद्गरो वरंस्यानेमत्तानिवारमानमभानवेनचक्र षेणाप्सरद्धमानं तेनचयथाभिलषितं स्थानेश्रापितमात्मानंप श्यति नदिरुमक्तंभ्रुवोर्मध्येसम्यकप्राणमावेश्येति सयवेक्त न्योगीकवितुराणामित्रक्तलत्तणपरंपुरुषंहिरण्यगर्भोरव्येम वस्थमात्मानस्य तनुवित्तारंनारायणादिशुक्लमतिपायेउपैतिस मीपंप्राप्नोति तल्लोकंप्राप्नोतीत्यर्थः नहिपौराणिकानामिवंवेदि कानांमतेब्रह्मविष्णुरुद्रलोकानामुपर्युपरिकल्पनास्ति किंतर्हि सर्वैहिरण्यगर्भलोकात्वेसत्यलोकएवांतर्भवंति यथाहिसोपाना तकर्मोजितिर्हिरण्यगर्भमात्मोनेतिबृहदारण्यकेतदर्याद्वोध्यः

यं १०॥

श्रानंदीटीका

प्राणेचारोप दशमाह॥ भक्त्योपलक्षणात् भक्तिप्रद्धावीर्यस्मृतिसमाधिप्रज्ञाभिर्यो गिनामुपायप्रत्ययस्यनिर्वीजसमाधेर्हेतुभूताभिः प्राप्तेयत्यो गबलंधारणादिदाऽर्व्यम् तेनयुक्तः अत एवाचलेनमनसावशकृ तेनप्राणप्रत्यनीतेः स्वरत्रप्रत्यरंतेनितत्तद्भूमिजयेनभ्रुवोर्मध्येसम्य क्प्रावेशयानतया प्राणमावेश्यतंपरंपुरुषं दिव्यमुपैति [illegible]

[illegible] ॥

रामकंठीटीका

कथंकीदृशंवभ्रुवोर्मध्येप्रासरवतत्वीक्ततेप्राणमात्मारेमारुतेत म सत्यमार्गेणावेश्यतेधायाः दिव्यवर्णसर्वतेजोत्यतिविकल्पा तीतरूपमत एव तमसः परस्तात् अतानस्यकथावतेमानंकी दृशंसर्वस्यधातारमनुस्मरेत् परावस्थायोकविमित्यादिविशेषणा विशिष्टत्वादवचित्यंपारमार्थिकत्वात्स्वभावत्वाच्छिन्तनक्रियायाः। कर्मत्वंनेतमणोरणीयान्तः पुराणंकविमनादिंदर्शावंनयानुशासिता रं सर्वस्यचराचरस्यजगतस्तेनतेनतियमेनतियन्तारमतः सर्वतेसर्वंक र्तारंवेमुक्तंभवति तथास्वरूपतोणुःसूत्त्मः तेव्रतादिलत्मादणुणी यांसमतिशयेनाणुम् इदमत्यन्तमर्थम् यः परावस्थायामदयत्वेने कविषयत्वात्स्मरणाद्यपाराः विषयभूतस्तस्योगनूपाधामपराव

गी.
टी.
भ्र.

स्थाणोर्नियतदेशत्वेन नियताकारत्वेन च यो योगी यथोक्तक्रमेण स्म
रति सततमेव पुरुषमुपैति तत्समीपं गच्छति योगक्रमपर्व परमप
दप्राप्तिफलोपयाभवति तथा सम्यग्वक्ष्य प्रतिजानीते १० ॥

लासिकी [illegible]टीका

[illegible] तथान्येषामपि पुरंस्थितानां मोदयमाणमुमूर्षु वद्दितत्पु डीनां लवाणीयो विदेहमुक्तिं वदर्शयति प्रयाणकाले इति

[illegible] पवं
विशिष्टत्वेन सर्वाभिज्ञं सन्तमात्मानं प्रचलेन विषयानुरागाकृष्टेन
तथैव स्थितेनेति यावत् मनसात्मन तत्मकेनान्तःकरणेन प्रया
णकाले दुःखबहुले मरणसमये यो भक्त्यायुक्तो योगी अनुस्मरेत्स्म
रेच्छक्नुयात् शक्तिलिङ् ततो योगबलेन समाधिबलेन प्राणमान्त
रेमारुतं भ्रुवोर्मध्ये सुषुम्णामार्गेण सम्यग्यथावदावेश्यावेशयित्वा वर्त
मानः स योगी विदेहमुक्तिं गमिष्यन्दिव्यं योतनात्मकं परं पुरुषं पुरु
षोत्तममीश्वरमुपैति तादात्म्यमापद्यते रम्यर्थः तथा च श्रुतिः एष सं
प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते
भ्रुवोरिति भ्रग्रहणं सर्वेतो मध्यवर्तिन्याः सुषुम्णाया नाड्या उपलक्षणा
र्थम् ततश्च मध्ये विवर्तिनम् यथाहृतमन्त्रवर्णो नाडी तनेविष्णुर्दिम
[illegible] १० ॥

पंचोलीटीका

परमपुरुषार्थप्राप्तिनिमित्तं ध्यानभावनायाः प्रकारमाह प्रयाण
कालेइति किंच सज्ञानी योगिभक्त्याऽनन्यभक्त्यायुक्तः प्रयाणका
लेमरणकाले अचलेन चलनवर्जितेन मनसा चयुतः योगबले
युक्तः योगः समाधिः तस्य बलेन जनितसंस्कारजन्मचित्तस्थैर्य ल
क्षणं योगबलं तेन च युक्तः भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा
वशीकृत्य तत्तद्वेगामिन्यानाड्या भूमिजयक्रमेणाभ्रुवोर्म
ध्ये प्राणं वायुं चावेश्य स्थापयित्वा सम्यक् सम्यक् प्रकारेणादिग्रह
णामित्यादिलक्षणं दिव्यं परं पुरुषमुपैति उपसमीपे गच्छति १०

रणवीरसमिद्धोयितो॥

भ्रुवोर्मध्ये प्राणमावेश्येति भ्रूशब्देनात्रद्विवचनांतेन साष्टम्या
हनुकोट्योर्लक्ष्येते तथा वाक्यमर्थः भ्रुवोर्मध्ये धनुष्कोट्योरंतरे
जीवास्थाने इतियावत् प्राणं बलमावेश्याविष्टं कृत्वा सर्वप्राणे
न पुरुषमाकृष्येतियावत् एतेन च भ्रूसंमुखाभिद्धवर्णयो
तितं माहप्रास्यैव वह्निमरणं श्रेयस्करमित्युक्तं प्राक् यः कर्मयो
गी प्रयाणकाले देहोत्क्रांत्यासन्नतरे काले एवंविधं पुरुषमनु
स्मरेदनुध्यायेति किंविधमित्यपेक्षायां तं विशिनष्टि कविमि
ति कविः क्रांतदर्शीत अतएवोक्तं वेदाहं समतीतानि वर्तमा
नानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चनेति पुरा
णमनादिं तं अनुशासितारं यथा स्वं कर्माणि विधेयत्वेनात्तमा
रं अथवा नियंतारं वक्ष्यति हि ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठ
ति भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति तर्हि कथं नोप
लभ्यं तत्रस्य तत्राह अणोः सूक्ष्मादणीयांसमतिसूक्ष्मं स्थूलदृष्टा
नयासुदुर्दर्शमितिभावः तथा सर्वस्य जगतो धातारं धारयितारं
पोषयितारं च तथा अचिंत्यमनोविदूरं रूपमस्येत्यचिंत्यरूपं
यदि मनसो न विषयं तत्कथमिंद्रियविषयं स्यात् इति वक्तादि
भिरनुपलभ्यस्वरूपमित्यर्थः तथा आदित्यवर्णं आदित्यस्येव
वर्णो यस्य तं सूर्यवत्प्रकाशस्वरूपमित्यर्थः तथा तमसः प्रथमा
ध्यायप्रतिपादितस्वरूपस्य मोहस्य तहातिलक्षणात् मोहाविष्ट
स्यपरत्वात् दूरीवर्तमानं मोहाविष्टमनस्कैरसाक्षात्कार्यमित्य
र्थः यद्वा सूर्योपमत्वेन मोहापनोदकमित्यर्थः १०॥

मधुभाष्य

विशेषतः प्रयाणकाल इति वायुजयादिरहितानामपिज्ञान
भक्तिवैराग्यादिसंपूर्णानां भवत्येवमुक्तिः तद्धतं नीचज्ञाना

घसंस्पर्शानामपिनिश्चलानांतद्दुलाभकथंचिकुवंतीतिविशेषः
उक्तंचभागवते पानेनतेदेवकथासुधायाःप्रवृद्धभक्त्यावि
शदाशयाये वैराग्यसारंप्रतिलभ्यबोधंयथांजसान्वीयुर
कुंठधिष्ण्यम् तथापरेचात्मसमाधियोगबलेनजित्वाप्रकृ
तिंबलिष्ठं त्वामेवधीराः पुरुषंविशंतितेषांश्रमःस्यान्न
तुसेवयातेइति येत्वेतत्कवितालोकेपकांतित्वसमाश्रि
ताः एतदभ्यधिकंतेषांततेजःप्रविशंतुतेतिच मोक्षधर्मे
संप्रत्यानामवंध्यावो विरक्तिज्ञानभक्तिभिः नियमेनतथा
पीरजयादियुतयोगिनां वधपत्वात्मनसत्वीपसूवंमथा
प्यतेध्रुवमितिचव्यासयोगे तदेवसंध्येयंप्रपंचयति १०॥

भाष्य अनुवाद टीका

प्रपञ्च सहित प्रकृति को भिन्न करिके जो स्थित है ऐसे पुरुष को भ
क्तियुक्त जो पुरुष विक्षेप रहित निर्मल मन से आसन्न काल मे धारा
वाहिक चित्तवृत्ति से स्मरण करे है उस के स्मरण विषयक मन की
स्थिरता कारण यही है कि सम्पूर्ण योग बलसे सुषुम्णामार्गक्रम से
उस की प्राणवायु भ्रू मध्य मे प्रविष्ट होती है ऐसा पुरुष परमात्मा रू
प प्रकाशात्मक पुरुष को प्राप्त होता है १० ॥

चौपई

अंत समयमें दृढ़करा मनसें भक्तियुक्त अथावा योग हिं बलसें
भ्रुकुटि मध्य प्राण स्थित कर जोई तेहिं परं पुरुष दिव्य हिं आ वे लहै
सोई १० ॥

57

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरा
गाः यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण
प्रवक्ष्ये ॥ ॥

शाङ्करभाष्यटीका

योगमार्गानुगमनेनैव ब्रह्मविद्यामन्तरेणापि ब्रह्मावाप्तिरित्येवं प्राप्तद
ष्टमुच्यते पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेद
विद्वदनादिविशेषणविशेष्यस्याभिधानं करोति भगवान् यदक्षरमिति
यदक्षरं न क्षरतीति अक्षरं अविनाशि वेदविदो वेदार्थज्ञा वदन्ति तद्वा एत
दक्षरं गार्गि ब्राह्मणा अभिवदन्तीति श्रुतेः सर्वविशेषनिवर्तकत्वेनाभिवद
न्त्यस्थूलमनण्वित्यादि किञ्च विशन्ति प्रविशन्ति सम्यग्दर्शनप्राप्तौ स
न्तो यद्यतयो यतनशीलाः संन्यासिनो वीतरागाः विगतो रागो येभ्यस्ते
वीतरागाः यच्चाक्षरमिच्छन्तो ज्ञातुमिति वाक्यशेषः ब्रह्मचर्यं गुरौ
चरन्तीति तत्ते पदं यदक्षराख्यं ब्रह्माख्यं पदं पदनीयं ते तुभ्यं संग्रहेण
संग्रहः संक्षेपः तेन संक्षेपेण प्रवक्ष्ये कथयिष्यामि स यो ह तद्भगवन् म
नुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जय
तीति तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार
इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभि
ध्यायीत प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन
वेद्धव्यं शरवत्तन्मयो भवेदित्यादिना वचनेन अन्यत्र धर्मादन्यत्रा
धर्मादिति चोपक्रम्य सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च
यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमि
त्येतदित्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत्
प्रतीकरूपेण च परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां वि
वक्षितस्योङ्कारस्योपासनं कालान्तरे मुक्तिफलमुक्तं यत्तदेवेहापि अ ८
भिहितं कविं पुराणमनुशासितारं यदक्षरं वेदविदो वदन्तीति चोपन्यस्त
स्य च परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योङ्कारस्य का
लान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं ॥ ॥

येन केनचिन्मंत्रादिना ध्यानकाले भगवदनुस्मरणे प्राप्ते सत्यभिध्यान
त्वेन नियन्तुं स्वीकृतत्वेन प्रकृतपरमपुरुषस्य त्रैविध्यहेतुप्रसिद्ध्या प्रा
माणिकत्वमाह पुनरपीति उपायो वक्ष्यमाण ओङ्कारः अविशेषेण प्रती
चि ब्रह्मणि वेदार्थविदामपि कथं वचनमित्याशंक्याविषयत्वमिष्यता
वत्वेवेति मत्वा श्रुतिमुदाहरति तद्धेति तथापि तस्मिन्नविशेषे सर्ववि
शेषशून्ये वचनमनुचितमित्याशंक्याह सर्वेति न केवलं विद्वदनुभा
वसिद्धं यथोक्तं ब्रह्म किन्तु मन्त्रोपलक्ष्यतया मन्त्राणामपि प्रसिद्धमि
त्याह किं त्वेति केषां पुनः सन्न्यासिनं तदाहुर्वीतरागा इति ज्ञानार्थं
ब्रह्मचर्यविधानादपि ब्रह्म ज्ञेयत्वेन प्रसिद्धमित्याह यदिति कथं न
हि यथोक्तं ब्रह्म मम ज्ञातुं शक्यमित्याकुलितचेतसमर्जुनं प्रत्या
ह तत्ते पदमिति वक्ष्यमाणेनोपायेनेत्युक्तं व्यक्तीकुर्वन्नोङ्कारद्वारा
ब्रह्मोपासने प्रवृत्तमनुक्रामति सयोहेति सत्यकामेनाभिध्यानफ
ले जिज्ञासुना भगवन्निति पिप्पलादः सम्बोध्याभिमुखीक्रियते नि
पातो न प्रसिद्धमर्थमवद्योतयन्नाभिध्यानस्य फलत्वेन कर्मत्व
मावेदयतः मनुष्येषु मध्ये सयोपि कश्चिन्मनुष्यस्तत्प्रसिद्धमभिध्याने
यथा सिध्यति तथा सर्ववेदसारभूतमोङ्कारमाभिमुख्येन ध्यायी
त तद्ध्यानमाप्रायणादिति न्यायेन मरणान्तमनुष्ठेयं सचैवम
नुतिष्ठन्प्रकृतेनाभिध्यानेन लोकानां जेतव्यानां बहुत्वात्कतमं
लोकं जयतीति प्रश्ने पृष्टवते सत्यकामाय पिप्पलादनामा किलाऽ
चार्यः प्रतिवचनं प्रोवाच तत्र प्रथमे अभिध्येयमोङ्कारं परापरब्रह्म
त्वेन महीकरोति एतद्वाइति त्रिमात्रेणाकारोकारमकारात्मकेने
ति यावत् योभिध्यायीत तमेव यथाभिध्याने पुरुषमप्येति गच्छती
त्यादि वचनेनोपासनमोङ्कारस्यात्मकमित्यर्थः प्रश्नश्रुतिवत् कठव
ल्ली च तत्रैवार्थे प्रवृत्तेत्याह अन्यत्रेति अव्यवधानेनोपनिषदां व्यवा
धानेन च कर्मस्मृतीनां परस्मिन्नात्मनि पर्यवसानं दर्शयति सर्वे इ
ति तपसामपि सर्वेषां चित्तशुद्धिद्वारा तत्रैव पर्यवसानमित्याह त
पांसीति तस्यैव च ज्ञानार्थमपेक्षितं ब्रह्मचर्यं तत्र तत्र विहितमित्याह

यदिच्छन्त इति तस्य पदनीयस्य ब्रह्मणः संक्षेपेण कथमोंकारद्वारक
मिति कथयति ओमित्येतदिति ओमित्येतदिति उदाहृत वचनात्ता
त्पर्यं दर्शयति परस्येति तस्य वाचकरूपेण वा तस्यैव प्रतीकरूपेण।
वाविवक्षितस्योङ्कारस्योपासने यथोक्तं सर्वं वेदनरूपमिति सम्बन्धः ननु म
रस्मिन् ब्रह्मणि तत्त्वमस्यादिवाक्यादेव प्रतिपत्तिरधिकारिणो भवि
ष्यति किमित्युपासनमोङ्कारस्योपन्यस्यते तत्राह येति यद्यपि विशि
ष्टस्याधिकारिणो विनैवोपासनमुपनिषद्भ्यो ब्रह्मणि प्रतिपत्तिरुत्प
द्यते तथापि मन्दानां मध्यमानाञ्च तद्धि हेतुत्वेनोंकारो विवक्षितः
तदोपासने ब्रह्मदृष्ट्या श्रुतिभिरुपदिष्टमित्यर्थः तस्य क्रममुक्ति-
फलत्वाद्देनुष्ठेयत्वं सूचयति कालान्तरेति भवत्येवं श्रुतीनां प्रवृत्तिस्ता
वता प्रकृते किमायातमित्याशङ्क्याह उक्तं यदिति तदेवेहापि वक्ष्य
माणमित्युत्तरेण सम्बन्धः उपासनमेवोपास्योपन्यासद्वारा स्फारयति
कविमित्यादिना पूर्वोक्तरूपेणोऽभिधानत्वेन प्रतीकत्वेन चेत्यर्थः
ओंतस्योपासनस्यानुष्ठानस्य सोपस्करत्वं संगिरते योगेति ॥ ॥

स्वामिकृतटीका दपि प्रणववाचारमभ्यासमंतरंगं विधि तुः प्रतिजानीते॥
केवलाभ्यासयोगा
यदक्षरं वेदार्थज्ञा वदंति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्र वीतरागा
मसौ विधृतौ तिष्ठत इत्यादि श्रुतेः वीता विगता रागा येभ्यस्ते यतयः
प्रयत्नवंतो यद्विशंति यज्ज्ञातुमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते प
दं तत्त्वं पद्यते गम्यते इति पदं प्राप्यं संक्षेपतः प्रवक्ष्ये तत्र प्राप्त्युपायं
कथयिष्यामीत्यर्थः ॥

पिशाचभाष्यटीका
यदक्षरमिति अक्षरं न क्षरतीत्यक्षरं एतस्य वा अक्षरस्य प्रशासने
गार्गी इति श्रुतेः वेदविदो वदंति विशंति प्रविशंति ब्रह्मचर्यं ब्रह्म
चारिव्रतं चरंत्यनुतिष्ठंति संग्रहेण संक्षेपेण प्रवक्ष्ये ॥

रामानुजभाष्यटीका

गी.
टी-अ

अथ कैवल्यार्थिनां स्मरणप्रकारमाह यदक्षरमिति यदक्षरं अ-
स्थूलत्वादिगुणं वेदविदो वदन्ति वीतरागाश्च यतयो यदक्षरं वि-
शन्ति यदक्षरं ज्ञातुमिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रव-
क्ष्ये पद्यते गम्यते अनेनेति पदं तन्निखिलवेदान्तवेद्यं मत्स्वरूपम-
तं च यथा प्राप्यते तथा संक्षेपेण प्रवक्ष्यामीत्यर्थः ॥ ॥

परमार्थप्रपा टीका

अभिनवगुप्तकृतटीका स्पष्टार्थ

अथाभ्यासेनप्राप्तयोग्यं नवकं प्रतिजानीते यदक्षरमिति वेदविदो
वेदार्थज्ञा याज्ञवल्क्यादयः यदक्षरमिति वदन्ति नक्षरतीत्यक्षरं अस्थू-
लमनण्वह्रस्वमित्यादिस्पष्टश्रुतिरूपितं तथा यद्वीतरागा विरागवन्तो
यतयः प्रयत्नशीलाः विशन्ति आत्माकारतया तिष्ठन्ति तथा यदिच्छन्तो
ज्ञातुमिच्छन्तो गुरुकुले ब्रह्मचर्यं चरन्ति तत्तेऽभ्यापदं पद्यते गम्यते
प्यतेऽनेनेति पदं संग्रहेण संक्षेपेण प्रवक्ष्ये ॥ ॥

[illegible]माली टीका

ध्यानकाले येनकेन विन मंत्रेणानुस्मरणे प्राप्ते सर्ववेदायस्तदमाग-
ति वर्णानि सर्वाणि च वदतीति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सं-
हेण वक्ष्यामीत्यनन्तरं दित्यादिश्रुतिपाठेन तेन प्रणवेनैवा-
धानेन तदनुस्मरणकार्यं नान्यमन्त्रेणेति नियमायोपक्रमेणैयाधि-
ति यदक्षरमित्यादिद्विहिकारस्मृत्यैदेकंकारं ब्रह्म वेदविदाव-
दन्ति एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्व-
मदीर्घमित्यादिवचनैरिति नरजीवनः स्थूलत्वादियमेतिद्वयत्नया
यतन्सिन्नवक्तरेगाग्यीकाशञ्जातस्मिञ्जात्याकाशादिस्व जग-
दाधारतया अस्यालरस्य प्रशासने ह्यावङ्मसौ विष्टनोतिष्ठत
इति सूर्यादितियामकतया च वदतीति केवलप्रमाणज्ञैले
रेवज्ञातं किं न मुक्तैः प्राप्यतयानुभूतमपीत्याह विशन्तिपयत
यायत्नशीलाः संन्यासिनः वीतरागा रहामुत्रभोगनिस्पृहाः अशु-
द्धाविद्यानिवृत्तिर्स्वकं प्राप्नुवन्ति प्रवेशः खगादीनां हृल्लाद्विधि

वसंश्लेषविशेषः सएव सायुज्यपदवाच्यो मोक्षः स इत्युक्तमिति सयुक्तम
युक्तो भावः सायुज्यमिति व्युत्पत्तेः अथ पुनर्ये स्वजनं यंति ब्रह्मणः सायु-
ज्यं गच्छंतीत्यादिश्रुत्या स्वात्मस्वरूपमेव सायुज्यमुक्तं न तत्स्वरूपैक्यं यदे
वानामेवमहिमानं गत्वादित्यस्य सायुज्यं गच्छति पितॄणामेवमहि
मानं गत्वा चंद्रमसः सायुज्यं गच्छति अग्नेर्वायोरादित्यस्य सायुज्यानि
गच्छंतीत्यादिश्रुतिषु सायुज्यशब्दस्य साधर्म्यवाचकत्वदर्शनात् मु
क्तेः प्राकृपरेणापि जीवानामभेदानंगीकारादेकत्वैकं प्रमाणानामन्य
त्र गमनासंभवाच्च सायुज्यं साधर्म्यं सारूप्यं समानरूपत्वं चतुर्भुजत्वा
दिना सामीप्यं विग्रहविशेषनिकटस्थत्वं सालोक्यं समानलोकस्थ
त्वमिति चतुर्धा मुक्तिः तत्र केषांचित्पूर्णत्वाद्यपि केषांचित्तिसः केषां
चित् द्वे केषांचिदेकैव उदकपूर्णस्वल्पमहाघटानामिव [illegible]
[illegible] सर्वेषां पूर्णत्वाविशेषाविषयादिहेतुत्वेश्व
त॰ तास्त्याद्धि पूर्णत्वेतास्तामपि तेषां भेदो विग्रहः संकल्पादेव तच्छ्रु
तेरिति सूत्रात् यदि पितृलोककामो भवति संकल्पादेवास्य पितरः
समुत्तिष्ठतइत्यादिश्रुतेश्च अथय इहात्मानमनुविद्य व्रजंत्येता
ंश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीतिश्रुत्या
मुक्तानामिष्टलोकेः कार्यात्यये तदध्यक्षेण सहातः परमभिधानादिति
सूत्रेण सर्वकार्याणां प्रलये स्वाधीक्षेण स्वामिना चतुर्मुखेन सहब्र
ह्मणस्तत्स्थानात्परं गच्छंतीत्यर्थः केन सोश्नुते सर्वान्कामान्सह ब्रह्मणा
विपश्चितेति श्रुत्या च मुक्तभोगोक्तेः स एतान्ब्रह्म गमयतीति श्रुत्या
चतुर्मुखस्य मोक्षप्रापकत्वोक्तेः येच मुक्ता भवंतीह नराभरतसत्तम
तेषां लक्षणमेतत् यच्छ्वेतद्वीपनिवासिनो तत्र नारायणपरायणा
वाक्सिद्धवर्चसः अनिंद्रिया अनाहारा अनिष्पंदाः सुगंधिनः एकांतिनः
सेपुरुषाः श्वेतद्वीपनिवासिनः तत्रच पुरुषाः सर्वे पंचेंद्रियविवर्जि
ताः अतिपुष्टाश्च ते सर्वे भक्ताश्च पुरुषोत्तमं अर्चयंति सदा देवं ते सार्हद्र
मतेवसः ततश्चाभ्यधिकः कश्चित्सर्वे ते समतेजसः कृतांजलिपुटा
ह्यष्टानमस्त्येववादिन इति मोक्षधर्मे मुक्तानां प्राकृतेंद्रियाद्यभावादि
माप्राकृतदेहेंद्रियादिकं चोक्तं न केवलमनेनैव साधकानामपि स

गी॰
टी॰ अ॰

60

र्वेप्रयासस्तदर्थं इत्याह यदिच्छन्तो यज्ज्ञानेनैष्ठिका ब्रह्मचर्यं गुरुकुलवा-
सादि तपश्चरंति यावज्जीवं तद[illegible]क्षरमुपदेयपदनीयप्राप्यं तेनान्वयः सं-
ग्रहेण संक्षेपेण प्रवक्ष्ये वदिष्यामीत्यादिना ब्रह्मणः सर्वशब्दावाच्यत्वं श्रुतं तो-
निरस्तः न च यतो वाचो निवर्तंत इत्यादिश्रुत्यावाच्यत्वेन निषिद्धं तस्याः
साकल्येनावाच्यत्वपरत्वात् यत इत्यनेनैव वाच्यत्वाच्च न च लक्ष्यमे-
व स्थूलं ब्रह्मोपासनाविषयीभूतं मंदाधिकारिणामस्थूलं स्व-
रूपमक्षरमिति वाच्यं अन्योपासनबोधकपदाभावादक्षर[illegible] प्राप्य-
त्वबोधकपदसत्वाच्च सर्वशब्दवाच्यलक्षणयाप्यदृष्टत्वादसंभवाच्च
वेदैश्च सर्वैरहमेव वेद्य इत्यत्रैवकारेण सर्वेषु सदनेन तद्गुणान्वयवा-
स्तदेवमिन्द्रस्य सर्ववेदवेद्यताया निराकरिष्यमाणत्वाच्च ॥ ॥

ऊसम वैजयन्ती टीका

एवमेतस्यार्थिनां प्राप्यप्रकारमुक्त्वेदानीं केवलार्थिनां यत्प्राप्यं तत्प्रका-
रमाह यदक्षरमिति वेदविदो वदंति सर्वस्मात्सांगोपनिषदान्विदंति
गुरुमुखाद्यथाश्रुतमर्थयाथात्म्येन जानंतीति वेदविदः न तु पदक्रमादि-
पाठमात्रविदः यदक्षरं ब्रह्मवाचकं एतस्यैवाक्षरस्य प्रशासने गार्गि सू-
र्याचंद्रमसौ विधृतौ तिष्ठतः अस्थूलमनण्वह्रस्वमदीर्घमलोहितमच्छाय-
मित्यादिश्रुतिप्रतिपाद्यगुणविशिष्टं वदंति कथयंति वीतरागाः विशेषे-
णेतो गतो रागः प्राकृतविषयस्नेहो येभ्यस्ते यतयः प्राप्यवस्तुप्रा-
प्तये यत्नशीलाः यद्वाक्षरमुत ब्रह्म विशंति प्रविशंति यदुभयविधवाच्य-
वाचकरूपं ब्रह्म ज्ञातुमिच्छंतो नैष्ठिका ब्रह्मचारिणो ब्रह्मचर्यं ब्रह्मावा-
प्त्युपायं गुरुकुलवासादिलक्षणं चरंति आचरणं कुर्वंति तेनान्यतम-
दं पदं तेन गम्यतेऽनेनेति पदं प्राप्यं सर्ववेदवेद्यमक्षरस्वरूपं संग्रहेण संक्षे-
पेण यद्वा सम्यग्गृह्यतेऽनेनेति निरुक्तेः संग्रहः साधनं तेन सह
प्रवक्ष्ये यथानायासेन ननु त्वं विद्यास्तथाहं प्रकर्षेण वक्ष्यामीत्यर्थः ॥

इदानीं येन केनचिदभि-
यत्पदमामनंति तपांसि

मधुसूदनी टीका

धानेन ध्यानकाले भगवदनुस्मरणे प्राप्ते सर्वे वेदा
सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं

यदक्षरमविनाशि ओंकाराख्यं ब्रह्म वेदविदो वदंति एतद्वै तदक्षरं गार्गि
ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिवचनैः सर्ववि-
शेषनिवर्तनेन प्रतिपादयंति न केवलं प्रमाणकुशलैरेव प्रतिपन्नं किं

+ संग्रहेण ब्रवीम्योमित्येतदित्यादिश्रुतिप्रतिपादितेन प्रणवेनैवाभिधानेन तदनुस्मरणं कर्तव्यं नान्येन
मंत्रादिनेति नियंतुमुपक्रमते ॥ +

तमक्षरोपस्यमनयानैरप्यनुभूतमित्याह विशंति स्वरूपतया सम्यग्दर्शनेन य
दक्षरं यतयो यत्नशीलाः संन्यासिनो वीतरागा निस्पृहाः न केवलं सिद्धैरनु
भूतं साधकानामपि सर्वोपि प्रयासस्तत्प्राप्त्यर्थ इत्याह यदिच्छंतो ज्ञातुं नैष्ठिका
ब्रह्मचारिणो ब्रह्मचर्यं गुरुकुलवासादि तपश्चरंति यावज्जीवं तदक्षराख्यं
पदं पदनीयं तेन संग्रहेण संक्षेपेण ते प्रवक्ष्ये प्रकर्षेण कथयिष्यामि
यथा तद्वेद्यो भवति तथा अतः तदक्षरं कथमयाज्ञेयमित्याकुलो मा
भूरित्यभिप्रायः अत्र च परस्य ब्रह्मणो वाचकरूपेण प्रतिमा [illegible] वत्प्रती
करूपेण वयः पुनरेतद्विर्णामित्यनेनैवाक्षरेण परं पुरुषमभिध्या
यीत स तमपि गच्छतीत्यादि वचनैर्मंदमध्यमबुद्धीनां क्रममुक्तिफल
कमुपासनमुक्तं तदेवेहापि विवक्षितं भगवता ऽतो येन धारणासहि
तमोंकारोपासनं तत्फलं स्वस्वरूपं ततो पुनरावृत्तिस्तन्मार्गश्चेत्यर्थ
जातमुच्यते यावदध्यायसमाप्तिः [illegible]
[illegible] ॥ ॥

सदानंदी टीका ॥

प्रणवेनाभिधानेन वेद्यं केन प्रयाणतः भगवत्स्मरणं कार्यमित्याह भग
वान्वेद्य अविशिष्य देशेकारोभिधेयं ब्रह्म वदंति च वेदार्थज्ञाभिदाऽस्तीत्यका
मानविदो बुधाः यत्स्वास्मैकपियायीवा निस्पृहा यत्तत्पराः विशंति मु
क्तपुरुषैः प्राप्यत्वेन मत्पदं यदिच्छंतः परितो नैष्ठिका ब्रह्मचारिणः ब्र
ह्मचर्यं गुरौ रतेर्निवासादि चरंत्यपि संक्षेपेण प्रवक्ष्यामि तत्तुभ्यं पदमेष
रे कथं तदक्षरं ज्ञेयमा भूरित्याकुलस्त्वतः ॥ ॥

नीलकंठी टीका ॥

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्केन किं कृत्वा कं तेन तत्कृत्वा च किं कर्तव्यमि
त्येतद्धृदयं वदिष्यन् तदुप्रतीकत्वेन चिह्नं प्रणवं वाह्यवाचकयोरभेदविव
क्षया स्तौति यदक्षरं प्रणवाख्यं वाचकं वेदविदो वेदार्थविदो वदंति यदाय
दक्षरं ब्रह्म तदाख्यं यतयो नष्टरागा वाह्मणा अभिवदंत स्थूलमनएव
कृत्स्नं ईशं मिमेवेलक्षणं वा वेदविदः उपनिषद्विदो वदंति यदक्षरं यतयो वि
शंति ब्रह्मप्रतीकत्वेन शरणीकुर्वंति पदे सम्यग्दर्शने सति सरित्सागर

ध्यायेत यस्य विष्णोस्तिष्ठत यः यदक्षरमित्यर्द्धेनो ब्रह्मचर्यं चरन्तीति य।
तद्देयेष्विसमाने तत्तेपदं वर्णात्मकं पदनीयं वा स्थानं विष्णोः परमं
पदं संग्रहेण प्रवक्ष्ये अयं च वाच्यवाचकयोरभेदः श्रुतिर्वापयागम्यते।
अन्यत्र धर्मादन्यत्राधर्मादिति सर्वधर्मातीतं ब्रह्म प्रक्रम्य सर्वे वेदा यत्पद
मामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं
संग्रहेण ब्रवीम्योमित्येतदिमां कारेणोपसंहारात् तत्फलं च प्रतीकाभा
वात् ओंकारं प्रतीकत्वेन प्रकल्प्य तद्द्वारा शुद्धं शबलं वा ब्रह्म प्रतिपत्त
व्यं तथा च श्रुत्यन्तरे एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्त
पक्रम्य तस्मादेवं विद्वानेतेनैवायतनेनैकतरमन्वेतीति इहे आयतनं
सालयामवलम्ब्य प्रतीकत्वेन ॥ ११ ॥

अस्य पदस्य दुस्साध्यत्वेन दुरधिग **आनन्दीटीका** मत्वात् पुनः पुनरुपायं दर्शयति ॥
सम्यग्गृह्यते निश्चीयतेनेनेति संग्रह उपायः सत्त्वसततमभ्यासमभि
भिनवगमपादः ॥ ११ ॥

रामकंठीटीका

तमर्थं योगिभिः प्राप्यं धाम संग्रहेण संक्षेपेणानुध्यमभिधास्ये कि
तद्गमयपदे वेदविदो वेदार्थविशारदा अक्षरं नित्यं विहायसो वदन्ति प्रवद
न प्रतिपादयन्ति यच्च यतयो यत्नैकनिष्ठा विशन्ति समापद्यन्ते य
च्छन्तः प्राप्तकामा ब्रह्मचर्यं ब्राह्मणा वेदस्याध्ययनश्रवणादिना चर्यं
चारं चरन्ति समाश्रयन्ते केचिदिहदन्तीति पाठं पठन्त्येवमेतद्धावर्तते
यथावेदविद्ब्रह्मणेन रहस्यवानग्रस्याः प्रतिपादिताः यतस्ते शास्त्रोक्त
क्रियानुष्ठाननिष्णाताः सन्तस्तमर्थं विदन्ति जानन्ति प्राप्यत्वेनाध्यव
न्ति यतयस्तत्कृतनक्रमस्ताहिशन्ति शुनयघ्राः प्रतिपादिताः यतस्ते शा
सेयमनुष्ठाननिष्णाताः सन्तस्तमर्थं विदन्ति जानन्ति प्राप्यत्वेना
प्यवस्यन्ति यतयस्तु नारास्यमामवन्ति ब्रह्मचारिणस्तं तत्साम्मका।
माः स्वाध्यायशास्त्रार्थबोधादिनिष्ठा अतं विशेषं भजन्ते इति यथा प्रत्ना
नमभिधानमाह ॥ ११ ॥

लाभिकी [illegible]टीका

अथास्यैवात्मनो दुर्लभतामापन्नस्य सर्वप्राप्युपायं सम्यग्वक्तुं प्रतिजानीते ॥

वेदविदो वेदांतज्ञा यन्मदक्षरं वेदोपगतोऽपि स्वभावबलनरहितं वदन्ति तथा च श्रुतिः तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्तीति तथा वीतरागा वैराग्यवन्तो योगिनो यतयः प्रयत्नशीला आत्माकारवृत्त्याहर्निशं नित्यमभ्यस्यन्तः यत्पदं विशन्ति समाविशन्ति तदभेदमुपलभन्ते तथा यत्पदमिच्छन्तः पुरुषा यमादिसर्वं विनिहत्य निरोधं चरन्ति कुर्वन्ति ब्रह्मचर्यं यमादीनां विनिहत्य निरोधलक्षणयोगांगानामुपलक्षणम् तत्पदं पद्यते गम्यते इति पदं प्राप्यं धाम संग्रहेण संक्षेपेण अथवा सम्यग्गृह्यते निश्चीयते तेनेति संग्रहं उपायस्तेनाभिधास्ये [illegible] ११ ॥

पंचोलीटीका

प्रणवं विवक्षमाणो नोपायेन प्रतिपित्सितस्य ब्रह्मणो विशेषणोत्तरविशिष्टस्वरूपं निरूपयति यदक्षरमिति वेदविदो वेदार्थज्ञाः यदक्षरमविनाशितं वदंति विगतरागाः संन्यासिनो यतयः यदक्षरं विशन्ति यच्चाक्षरं ज्ञातुमिच्छन्तः गुरौ ब्रह्मचर्यं चरंति तदक्षराख्यं पदं प्राप्यं तेन तत्त्वं संग्रहेण प्रवक्ष्ये कथयिष्यामि ११ ॥

रणवीरसमिद्बोधिनी॥

अथ यथावर्णमनुशिष्टकर्मयोग एव परमपदप्राप्तेरुपायो यथाभवति तथा सम्यक्तं दिव्यवक्तुं प्रतिजानीते यदक्षरमिति प्रवार्जुनं प्रत्येवोपदेशस्यावश्यकत्वात्तेनत्यनेन क्षत्रियजातिविशिष्टत्वं गभीकृतवतान्न वियजाते लवनक्रमसंन्यासः परमपदप्राप्तावुचितउपायः क्षत्रियान्प्रति तस्याधर्मत्वात् इति ज्ञापयति तथाचायमर्थः अहं ते तुभ्यं क्षत्रियजातये क्षत्रियजातिशुद्धिप्रपति यावत् पदं पद्यते प्राप्यते यदिति व्युत्पत्त्या पदं व्यवसिति शास्त्रस्या संग्रहेण संक्षेपेण प्रनतत्त्वां विवक्षामीति कोसौ प्राप्यं धामसंग्रहेणेति समन्ताद्ग्रहः साघवसमंतात् गृह्णाति केशादिषु पशुस्वं भटादयोऽपि

गुजिज्ञासयाशुश्रूषादीनांपरिग्रहोयत्रेतिसंग्राहोगूढं तेनगूढेनैवप्र
वन्थेकथयिष्यामि तस्यचपदस्यगूढकरणकंकथनमसंगतं
मगूढरूपोपायोपेयताकथनेपर्यवस्यति तथाचगूढमयेनैवो
62 पायेनोपेयंकथयिष्यामि तस्यास्तूपायभूतगूढप्रकारस्योपायांत
रादतिरेककरंवक्ष्यामीतियावत् एतेनचपूर्वंप्रतिपाद्यप्रायेण
प्रोक्तस्यगूढकरणकपरमपदकर्मकलाभस्यपुनःकथनेकिंदोषइ
तिनिरस्तं तत्प्रकारकथनस्यारभ्यमाणत्वात् पूर्वंविस्तरस्यक
थनाउद्वेगदायित्वेनालब्धहृदयांतःप्रवेशस्यतस्यसंक्षेपेणक
थयिष्यमाणत्वाच्च अतएवविग्रहेणेत्यादिप्रसिद्धपदपरित्या
गेनसंग्रहेणाप्रसिद्धंपदमुपात्तं तच्चतंत्रेणसंक्षेपसमर्थोभ
यार्थप्रतिपादकं किंतत्पदंयस्यप्राप्तिकपेयत्वेनाभिधास्यतेभवते
त्याकांक्षायामाह वेदविदः वेदशब्दोत्रत्रयीपरः तथाचवेदान्वि
दंतिजानंतीतिवेदविदस्तदुक्ताधिकारिणस्त्रयीधर्माणोगृहस्था
वानप्रस्थाश्च यत्पदमनश्वरंवदंति अयंभावः यस्यया
नित्यताज्ञानेसतितत्प्राप्त्यर्थंत्रयीधर्ममनुतिष्ठंतीति तथा वीतरा
गाःरागोऽनुपलक्षणंद्वेषादेरपि तथाचरागद्वेषादिरहितायतयः
संन्यस्तत्रयीधर्माणोयत्पदंविशंति तादात्म्यंप्राप्नुवंतीतिकोऽर्थः
यत्तादात्म्यावाप्तयेपूर्वंत्रयीधर्ममनुष्ठायानंतरंविरक्तगूढज्ञानतया
सर्वसंन्यासंकुर्वंतीति संन्यासाधिकारश्चब्राह्मणानामेवस्मृतः
नक्षत्रियाणांनगौणः अतोविप्रस्यैवक्रमसंन्यासउपायतया
विहितोबोध्यः तथा यत्पदमिच्छंतोभिलषंतोहिंसाप्रमंवर्थप्र
स्मणाश्चिवैराग्यार्थमध्ययनश्रवणादिनाचरणंतल्लक्षणंब्रह्म
चारिव्रतंचचरंति समाश्रयंतइति अयमत्रसंग्रहार्थः हिंसेयति
रूपत्वानार्थंयथास्वमनुशिष्टतत्तदजिनदंडमेखलायतन्यादि
धारणापूर्वंगुरुकुलेऽपित्वायथावर्णविभागमनुशिष्टतनं
ध्ययनादिरूपंब्रह्मचर्यं यथाकालंचरित्वानंतरंस्वरूपज्ञाने
तेयत्प्राप्त्यर्थंगार्हस्थ्यमंगीकृत्यतदाश्रमीयधर्मसम्यग

त्य यश्चाह्रानप्रस्यतामाश्रियतयोत्कांथमेंष्यानुष्टायज्ञातायांवि
तमुद्दैयन्तमावेष्याथ्यैसर्वसंन्यस्यतेइतिमद्दत्तोपायाउंवदेपा
तिकष्टेनुचिरकालेनचयद्धामप्राप्यते तद्धुहेनैवकेवलेनस.
स्यशीघ्रप्राप्यतेइतितदुपायंसंक्षिप्याभिधास्यइति ११॥

मधुभाष्य

यदक्षरमित्यादिना प्राप्यतेमुमुक्षुभिरितिपदंस्वरूपं पद
गताविति धातोः तद्विष्णोःपरमंपदमितिश्रुतेश्च गीयते
पदमित्येवमुनिभिः पद्यसेयत्नइतिबृहन्नारदीये ब्रह्मनाडी
विनायद्यन्यत्रगच्छति तर्हि विनामोक्षस्यानांतरंप्राप्नोती
तिसर्वद्वाराणिसंयम्य निगृह्यचक्षुषासूर्येदिप्राणःश्रोत्रेण।
चैवहीत्यादिवचनाद्व्यासयोगे मोक्षधर्मेच हृदिनारायणे
ध्रियतेत्वयाजगद्यस्माद्धृदित्येवंप्रभाष्यसइतिपाद्मे नहिमू
र्ध्निप्राणेस्थितेहृदिमनसःस्थितिःसंभवति यत्रप्राणोमनस्त
त्रतत्रजीवः परस्तथेतिव्यासयोगे योगधारणामास्थितः
योगमवलम्ब्याभियुक्तइत्यर्थः नित्ययुक्तस्यनित्योपायव
तः योगिनःपरिपूर्णयोगस्यनतस्यास्मिंस्तोति ११॥

63

भाष्य अनुवादटीका ॥

तिस प्रकाश पुरुष की प्राप्ति का हेतु अभ्यास योग की अपेक्षा प्र
णव अभ्यास को अंतरङ्ग कहे श्रेष्ठ साधन करने की इच्छा राखते हु
ये भगवान इसके कहने की प्रतिज्ञा करते हैं कि हे गार्गि यही
अक्षरस्वरूप परब्रह्म की शिक्षा क्रमसे सूर्य औ चन्द्र मे नियुक्त हो
य स्थिति करते हैं यह श्रुतिके कहने से वेदवित लोग जिसको अ
क्षर कहते हैं और जिसके राग आदि गत भये हैं ऐसा [illegible]ती कहे
यत्नकारीपुरुष जिसमे प्रवेश करते और जिसके जानने के अर्थ
गुरुकुलमे वास करि ब्रह्मचर्य करते हैं सोई ब्रह्मपद तुम को
संक्षेप से कहता हूं ॥ ॥

चौपई

वेदवित जेहि अक्षर कहैं वीतराग संन्यासी जेहि लहैं जिहइ
च्छा ब्रह्मचर्यहि गहैं तिहपदकों संक्षेपहि तोहि कहै ॥ ॥

64

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्या
धायात्मनः प्राण मास्थितो योगधारणाम् ॥१२॥

शाङ्करभाष्यटीका

प्रसक्तानुप्रसक्तं च यत्किञ्चिदिदमेवमर्थं उत्तरो ग्रन्थ आरभ्यते सर्वेति स
र्वद्वाराणि सर्वाणि च तानि द्वाराणि च सर्वद्वाराणि उपलब्धौ तानि स
र्वाणि संयम्य संयमनं कृत्वा मनो हृदि हृदयपुण्डरीके निरुध्य निरो
धं कृत्वा निःप्रचारमापाद्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वगा
मिन्या नाड्या ऊर्ध्वमारुह्य मूर्ध्न्याधायात्मनः प्राणमास्थितः प्रवृ
त्तो योगधारणां धारयितुं ॥१२॥

आनन्दगिरिकृतटीका

तर्हि कथमनन्यचेताः सततमित्यादि वक्ष्यते तत्राह प्रसक्तेति ओङ्का
रोपासने प्रसक्ते तदनन्तरं तत्फलमनुप्रसक्तं तद्द्वारा वायुनारोहणा
दि वक्तव्ये कोटिनिविष्टमित्यर्थः उक्तेऽर्थे समनन्तरग्रन्थमवतारयति इ
त्येवमर्थ इति श्रोत्रादीनां कुत्र द्वारत्वं तत्राह उपलब्धाविति तेषां संय
मनं विषयेषु प्रवृत्तानां दोषदर्शनद्वारा तेभ्यो वैमुख्यापादनं कार्यं म
नसो हृदये निरोधस्तत्राह निःप्रचारमिति मनसो विषयाकारवृत्ति
निरुध्य हृदि वशीकृतस्य कार्यं दर्शयति तत्रेति ऊर्ध्वमित्यत्रापि हृ
दयादिति सम्बध्यते सर्वाण्युपलब्धिद्वाराणि श्रोत्रादीनि संनिरु
ध्य वायुमपि सर्वेभ्यो निगृह्य हृदयमानीय ततो निर्गतया सुषुम्न
या कण्ठभ्रूमध्यललाटक्रमेण प्राणं मूर्ध्न्याधाय योगधारणा
मारूढो ब्रह्म व्याहरन् मां च तदर्थमनुस्मरन् परमां गतिं यातीति
समन्वयः ॥१२॥

स्वामिकृतटीका

इति द्वाभ्यां सर्वाणि इन्द्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्बाह्यविषा
यग्रहणमकुर्वन्नित्यर्थः मनो हृदि निरुध्य बाह्यविषयस्मरणमकुर्व
न्नित्यर्थः मूर्ध्नि भ्रूमध्ये प्राणमाधाय योगधारणां स्थैर्यमास्थितः आश्रि
तवान् सन् ॥१२॥

गी॰ पिशाचभाष्यटीका

टी॰ ग्र॰ सर्वद्वाराणि नवद्वाराणि संयम्य स्ववशीकृत्य हृदि हृत्पुण्डरीके मन
धायात्मनः प्राणमास्थितः प्रवृत्तः योगधारणां योगाभ्यासं धारयित्वेति तत्रैव धार

रामानुजभाष्यटीका

सर्वाणि श्रोत्रादीनि इन्द्रियाणि ज्ञाननिद्वारभूतानि संयम्य स्वव्यापारेभ्यो निवर्त्य
हृदयकमलनिविष्टे मय्यक्षरे मनो निरुध्य योगाख्यां धारणां समास्थितः म
य्येव निश्चलां स्थितिमास्थितः १२ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १२ ॥

परमार्थप्रपा टीका ॥

अथ प्रतिज्ञातमर्थं सांगमाह सर्वद्वाराणीति द्वाभ्यां सर्वद्वाराणीन्द्रियद्वा
राणि चक्षुरादीनि संयम्य विषयेभ्यः प्रत्याहृत्य न केवलं नेत्रनिमीलन
मात्रेण किंतु मनो हृदि निरुध्य बाह्यविषयान् स्मरन्नित्यर्थः मूर्ध्नि भ्रूमध्ये
स्वस्य प्राणमाधाय स्वात्मनो योगधारणां स्थैर्यमास्थितः तत्राश्रितः अ
निरपेक्षः कृशादिवया युवा सुवासाः परिवीत आगात्स उ श्रेयान्भ
वति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति
गावणभाष्यं बाल्यवार्द्धकाद्यैर्दुर्विकारैर्विरहितो युवा स्वप्रकाशो सु
वासाः आवरणो यस्य सद्वाकारेण करणवृत्तिप्रतिबिंबितः परिवीतः शरी
रतः सन् आगात् जीवदशां प्राप्तः उ इति निश्चयेन स जायमानः प्रादुर्भू
तः सन् श्रेयान् सत्कर्मनिरतो भवति स्वाध्यः सुचिन्ताराध्यः तमेवं विधं
द॰ धीरासः दृढव्रताः कवयः क्रान्तदर्शिनो ज्ञानिनः देवयन्तो देवत्वं प्राप्तुमि
सवा॰ च्छन्तो मनसा सह उन्नयन्ति सुषुम्नाविवरेणोर्ध्वं नयन्ति अत्रार्थे बाल्या
वस्थाः सोयं पाणिनैः परिवृतत्वादि अथर्ववेदश्रुतिः आगात्प्रस्तुतमयापदिष्टधाति प्राणोवैयुवा सु
यस्तानाद्युत्तमेतस्मादृतानमभिमितिः स्तनैका तयोरुत्तमा पत्न्न्स्तत्वमे ति
न्न॰ विसृगता उत्क्रमणे भवंतीति भाष्यं शरीरान्तर्वर्तिनाडयः संति तासां म
ध्ये हृदयस्यापारार्थमेकाधिकशतं नाड्यः संति तासां मध्ये एका
नाडीमतद्वानमभिलक्षितनतिः स्तनातिर्गता तया नाड्या मूर्ध्न्या यद्रुग
च्छन् प्राणान् अमृतत्वमेति मुक्तो भवति उत्क्रमणे प्राणोत्क्रमणेन तत्राउ

कनाद्यो विषयकु सर्वाश्रपि मूर्ध्नानमभिनिःसरंति १२ ॥

वनमाली टीका ॥

प्रवक्ष्य इति प्रतिज्ञातार्थमाह सर्वेति द्वाभ्यां सर्वेंद्रियद्वाराणि संयम्य
विषयेभ्यो दोषदर्शनाभ्यासेन प्रत्याहृत्य बाह्येंद्रियमपि मनसः प्रचारः नियम्य
स्यादत आह मनो हृदि निरुध्य बहिर्हृदये मनो निरुध्य अंतःसंबंधेन समाधिप स्या
र्यंतं मनः प्राप्य एवं बहिरंतरुपलब्धिद्वाराणि सर्वाणि निरुध्य क्रिया
द्वाराणामपि सर्वतो निरुध्य क्रमेण मूर्ध्न्याधाय भ्रुवोर्मध्ये नाड्या परि
वगुरूपदिष्टमार्गेणाविश्य आत्मनः परमात्मनो योगस्य धारणामास्थितः १२

ऊसमवैजयन्ती टीका ॥

ननु केन साधनेनाहं तत्त्वं वेदिष्यामीत्यपेक्षायां साधनयोगप्रकार
माह सर्वद्वाराणीति सर्वद्वाराणि सर्वाणि द्वाराणि मनो बहिर्नि य
स्सरणद्वारभूतानि श्रोत्रादीनि पंच ज्ञानेंद्रियाणि संयम्य शब्दादिभ्यः
एव विषयेभ्यः प्रत्याहृत्य वशं कृत्वा ततः पश्चान्मनः हृदि हृदयस्थे दहर
रूपे मनस्तत्त्वरूपे मनोऽन्तःकरणं द्वारभूतं निरुध्य निवेश्य तेन मूर्ध्नि प्राण
क्रियाद्वारभूतं प्राणवायुं संस्थाप्य आत्मनो मम योगधारणां प्रति
लादारभ्य षष्ठाध्यायपर्यंतं समभावनारूपां आस्थितः आसमंतान्नात्रि
स्थूलेन मनस्तत्त्वरूपे एव स्थित इत्यर्थः १२ ॥

मधुसूदनी टीका ॥ प्रतिज्ञातमर्थं सोपकरणमाह द्वाभ्यां ॥

तत्र प्रवक्ष्य इति सर्वाणींद्रियद्वाराणि संयम्य स्वस्वविषयेभ्यः प्रत्याहृत्य विषयदोषा
दर्शनाभ्यासात् दृष्टिमुखेनामायादितैः श्रोत्रादिभिः शब्दादिविषयग्रह
णमकुर्वन् बाह्येंद्रियनिरोधेऽपि मनसः प्रचारः स्यादित्यत आह मनोहृ
दि निरुध्य च अभ्यासवैराग्याभ्यां बहिर्व्यावृत्ताभ्यां हृदयदेशे मनोनि
रुध्य निर्वृत्तिकलामायायच अंतर्बहि विषयचिंतामा
कुर्वन्नित्यर्थः एवं बहिरंतरुपलब्धिद्वाराणि सर्वाणि निरुध्य क्रियाद्वा सर्वा
राणामपि सर्वतो निरुध्य मूर्ध्नि नयक्रमेण मूर्ध्न्याधाय भ्रू
वोर्मध्ये नाड्या परिच गुरूपदिष्टमार्गेणाविश्य आत्मनो योगधारणां आ
त्मविंदुसमाधिरूपां धारणामास्थितः आत्मन इति देवतादिव्याहरन् मध्ये १२

गी॰
टी॰ अ॰

सदानंदी टीका ॥

प्रत्याहारैरिंद्रियद्वाराण्यपिविलापति विवेकतः सम्यक्समस्तभोगेभ्यो
दोषदृष्ट्याविशेषतः वैराग्याभ्यासयोगेननिर्हेतिकमनोयथा भवेत्तथा
स्वस्वदेशेसंयम्यातिप्रयत्नतः क्रियाद्वारेतथाप्राणंसर्वतोविनिरुध्यचगुरू
पदिष्टमार्गेणतथाभूमिजयक्रमात् स्थापयित्वाभ्रुवोर्मध्येधारणा
मात्मगोचरां समाधिलक्षणांकर्तुंप्रवृत्तस्तांसमास्थितः १२ ॥

नीलकंठी टीका ॥

भ्रुवोर्मध्येकथंप्राणमावेश्येदित्यतआह सर्वेति सर्वाणिशब्दा॰
दिविषयग्रहणद्वाराणींद्रियाणिसंयम्यनिगृह्य तथाहृदिमनोपि
निरुध्य तेषांकंचुकभूतंप्राणंमूर्ध्न्यात्मनाड्यासुषुम्नाख्ययामूर्ध्नि भ्रु
वोर्मध्येआधायकथं योगधारणांयोगशास्त्रोक्तांधारणांमनसो॰
देशविशेषनिबंधिनींआस्थितःअनुतिष्ठन्सन् १२

आनंदी टीका

श्लोकोयंप्राग्दर्शितोत्क्रांतिलक्षणेनगतार्थः सर्वद्वाराणिसंय॰
म्येतिधारणाध्यानसमाधिभिः क्रमेणसर्वेभ्योनवभ्योद्वारेभ्योवा
प्राणंनिरुध्य १२

रामकंठीटीका

सयोगीपरमांगतिंपूर्वोक्तंप्रकृष्टंपदंयातिप्रतिपद्यतेकोसौयए
वंदेहंत्यजन् यात्युत्क्रामति कीदृशोमामनुस्मरन् योगधारणा
मास्थितोमांयथोक्तस्वरूपपरमकारणमोंकारवाच्यब्रह्मतत्त्वम
नुध्यायन् योगस्यैकस्यचित्तसमाधेरालंबनीभूतेकृतेस्थैर्येचित्तनियम
रूपंधारणांभूमिकामाश्रितःकथमास्थितःप्रथमतःसर्वद्वाराणि
चक्षुरादीनिनिखिलवृत्तिप्रसरवर्त्मानिसंयम्ययथास्वविषयेभ्यःप्र
त्याहृत्यमनश्चोपदेशाधिगतेहृदिसर्वसंविदधिकरणभूतेदेहैक
देशेनिरुध्यप्रतिषिद्धेंद्रियविषयप्रचारंकृत्वातथाप्राणमंतश्चरं
मारुतंमूर्ध्निब्रह्मरंध्रेब्रह्मप्राग्भारभूतसुषुम्नामध्यग्रंथिभेदाल्लब्धमार्गं
संतमादायकृत्वातथोभितिप्रसिद्धैकाक्षररूपंब्रह्मप्राहृतंव्या
हरनुच्चारयन् १२ ॥

लासिकी [illegible] टीका

अथप्रतिज्ञातंविवृणोतियुग्मेन ॥
योयोगीविदेहमुक्तिमिच्छन् १२

पंचोली टीका

इदानींमेदमध्यमधुर्ज्ञीनोक्तविंगुणांयदक्षरमित्यादिनापूर्वोक्तं
परंब्रह्मप्रतिपत्तुमशक्तानांकृतेतत्प्राप्तिसाधनत्वेनोक्तंकाला
तरमुक्तिफलेयोगधारणासहितओंकारस्योपासनेप्रतिपादयि
तुंप्रसक्तानुप्रसक्तंचकिंचिदुक्तंतदर्थमनन्तरग्रंथमारभ्यते स
र्वद्वाराणीति सर्वद्वाराणिविषयोपलब्धिद्वाराणिसर्वेन्द्रियाणिसंय
म्यनियमनंकृत्वामनःहृदिपुंडरीकेनिरुध्यतन्निर्व्यापारंकृत्वाआ
त्मनःप्राणंप्राणवायुंहृदयादूर्ध्वगामिन्यानाड्याऊर्ध्वमारुह्यमू
र्ध्न्याधाययोगधारणांधारयितुमास्थितःप्रवृत्तःसन् १२

यणावीरसमिद्धोधिनी

अथप्रतिज्ञातंपरमपुरुषार्थोपायभूतंसमरप्रकारमेवाह सर्वद्वारा
णीतिद्वाभ्यां सर्वाणिसर्वदिक्षुवर्तमानानिद्वाराणिप्रवेशनिर्गममा
गान् प्रघात्स्वपुर्याः संयम्य सम्यग्दृढबलवीरपुरुषाद्रक्षकान्निय
स्य कपाटैरपिहितानिकृत्वा तथाअन्तर्हृदि अभ्यावेस्वल्पभावेवसाद
प्रपेचवाविपर्यये कृत्स्नायामपितन्नूतेयोनिछिद्रेचप्रभोक्तिमत्यभि
द्विनोक्तावादिपाह्वसंगृहीतदेशेष्वेवनतु तथाचउक्तंहृदयंयस्य
सोऽहन् उहंन् प्राणुरित्यर्थः तस्मिन्विषयेवृथाभिप्रायेणप्रहृतंम
नोनिरूढत्वबाधकत्वनिश्चयेनरूढंकृत्वानपुनःस्तेनहन्यमानादिविचारण
दिनामध्यावर्तस्य तथाप्राणानिति प्राणपाहेनाजातिप्रियत्वेनरक्षणी
यत्वेनचप्रजालुब्धंते तथाचप्राणान् प्राणतुल्याः प्रजा आत्मनः प्रा
त्वावेदुरनामासीतिश्रुतेरात्मजस्यमूर्ध्निभारमिवाधाययेत्तात्पर्यंसमर्थ
तथाप्रागुर्हितमित्यादिवत्कार्यकारणोपचारात् प्राणात् प्राणनति

मितभूतान् आत्मनः आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चे
ति कोशात् बुद्धिधृतियत्नात् मूर्ध्नि शिरसि आधाय धृत्वा शिरःकं
पेनाभिनयांगीकृत्येति यावत् बुध्यादिविषयं परित्यज्य न्दि प्राणाभि
रेष्य इत्यतेऽमेति तेषां प्राणान् निमित्तमव्याहतमिति तथा प्राणान्
प्राणंति जीवंति येस्ते प्राणा द्विजादिभिः प्रयुक्ता आशीर्वादास्तान्
आत्मनः स्वस्य मूर्ध्नि आधाय स्वीकृत्येति यावत् तथा प्राणो बलं वि
द्यते येषां ते प्राणाः अर्शआद्यच् तान्प्राणान् अतिबलिष्ठान् आत्मनः
आत्मा वै पुत्रनामासीति श्रुतेः पुत्रान् मूर्ध्नि अग्रभागे पूर्णात्सैन्यानां आ
धायकृत्वा सैन्याग्रेसरान् विधायेति यावत् तं वेगोवैतेषामप्यधीना
मवगमः एवंप्रकारेणा योगधारणां योगः संनहनोपायध्यान
संगतियुक्तिष्वित्यत्र धातुपाठसनात् योगः सर्वं संनहनं तस्य धारणा
मनुष्ठानलक्षणामास्थित आश्रितवान् १२॥

मधुभाष्य

१२॥

भाष्य अनुभाद टीका ॥

ब्रह्म पद प्राप्तिकी अङ्ग समेत उपाय दो श्लोक से कहते हैं कि इं
द्रियों को प्रत्याहरण पूर्वक अर्थात् वक्त आदिसे वाह्य रूपादि वि
षयों का ग्रहण छोडि मनको हृदयमे रोध करके अर्थात् विषय
का स्मरण त्याग करत भौंहके मध्य भ्रकुटी देशमे वायुके स्थाप
न करने के अनन्तर योग का धारण रूपजो धैर्य उसका अवलं
बन करके १२ ॥

दोहा

सर्वद्वारकोबंधकर हृदे मधिमनकोरोध मूर्द्ध वधायप्राण।
निजकरैं योगस्थित सोय १२॥

62

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः
प्रयाति त्यजन्देहं सयाति परमां गतिं १३

शाङ्करभाष्यटीका

तत्रैव च धारयन् ओमिति ओमित्येकाक्षरं ब्रह्मणोऽभिधानभूतमोङ्कारं व्याहरन्नुच्चारं तदर्थभूतं मामीश्वरमनुस्मरन्ननुचिन्तयन् यः प्रयाति म्रियते स त्यजन् परित्यजन् देहं शरीरं त्यजन् देहमिति प्रयाणविशेषणार्थं देहत्यागेन प्रयाणमात्मनो न स्वरूपनाशेनेत्यर्थः स एवं त्यजन् प्रयाति गच्छति परमां प्रकृष्टां गतिं १३ ॥

आनन्दगिरिकृतटीका

मूर्ध्नि प्राणमाधाय धारयन् इ

यथोक्त योगधारणार्थं प्रवृत्तो मूर्ध्नि प्राणमाधाय धारयन् किं कुर्य्यादित्याशंक्यानन्तरश्लोकमवतारयति तत्रैवेति एकञ्च तदक्षरं चेति एकाक्षरमोमित्येवं रूपं तत्कथं ब्रह्मण इति यः प्रयातीति मरणमुक्ता त्यजन् देहमिति ब्रुवता पुनरुक्तिराश्रिता स्यादित्याशंक्य विशेषणार्थं विहरणाति देहेति एवमोंकारमुच्चारयन्नर्थं वाभिध्यायन् ध्याननिष्ठः सन्मुमानित्यर्थः परमामिति गतिविशेषणं क्रममुक्तिविवक्षयाद्रष्टव्यं १३ ॥

स्वामिकृतटीका

ॐमित्येकं यदक्षरं तदेव ब्रह्मवाचकत्वाद् ब्रह्म प्रतिमादिवत् ब्रह्मप्रतीकं
त्वाद्वा ब्रह्म तद्व्याहरन्नुच्चरन् तद्वाच्यं च मामनुस्मरन्नेवं देहं त्यजन् यः प्रयाति स परमां श्रेष्ठां गतिं याति प्राप्नोति
कर्मणा याति अर्चिरादिमार्गेण स परमां श्रेष्ठां म
[illegible]
[illegible] १३ ॥

पिशाचभाष्यटीका

ॐमित्येकाक्षरं प्रधानाक्षरमित्यर्थः ब्रह्मप्रतिरूपत्वात् व्याहरन्नुच्चारयन्मामनुस्मरन्प्रयाति प्रतीत्य त्यजन्देहं परमां गतिं याति १३ ॥

रामानुजभाष्यंटीका

गी॰ ॐमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन् वाच्यं मामनुस्मरन्नात्मनः प्राणं मू

टी॰ग्र॰ र्ध्न्याधाय देहं त्यजन्यः प्रयाति स याति परमां गतिं प्रकृतिविमुक्तं मत्समानाका

रमपुनरावृत्तिमात्मानं यातीत्यर्थः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्य

ति अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिमित्यनेनैतदेव वदति १२ ॥

69

अभिनवगुप्तकृत टीका स्पष्टार्थं १२ ॥ परमार्थप्रपा टीका

त्वं एवमुत्क्रांतिसमये स्मर्तव्योऽहमित्युपदिष्टं अथ जाप्यं किमित्याह ॐमिति

ॐमित्येकमक्षरं यत्तदेकाक्षरं ब्रह्मप्रकाशरूपात्मकोऽवेदः मात्रात्रयेण सू

चीकृतयजुर्मंत्रत्रयात्मकस्तं व्याहरन् उच्चारयन् तथा तदर्थरूपं मामनुस्म

रन् योऽजीवः देहत्यजनप्रकर्षेण अर्चिमार्गेण यात्यपुनरुक्तिं ततः स परमां गतिं या

ति १२

वनमाली टीका

ॐमित्येकाक्षरं ब्रह्मवाचकत्वाद्ब्रह्म व्याहरन् तदर्थं सदनंता लौकिकवृत्तेः

र्णकं मामनुस्मरन् सस्नेहाविछिन्नमनो वृत्तिधाराविषयीकुर्वन् ब्रह्मरंध्रे

ण देहं त्यजन् यः प्रयाति सोऽर्चिरादिमार्गेण [illegible] विराडेव परमा

स्वस्वरूपानंदाविर्भावरूपा गतिर्मुक्तिं याति प्राप्नोति प्रतीकोपासकश्च

ज्ञानस्य योग्याशेषविशेषापरोक्षत्वं स्त्रप्रवाचिरादिमार्गेण मुख्यता

धिकारिणां नारदादीनां व्यापकोपासनया ज्ञानं ब्रह्मापरोक्षज्ञानमप्य

त् नाभंक्तेऽत्रायतेकर्मकल्पकोटिशतैरपीति श्रुतेः १२ ॥

अथ श्रीवैजयन्ती टीका ॥

किंच ॐमिति ॐमिति एकाक्षरं एकं प्रधानं च तदक्षरमविनाशि वे

देकाक्षरं ॐ तत्सदिति निर्देशो ब्रह्मण इति वक्ष्यमाणात् ब्रह्म ब्रह्मवाच

कं प्रणवं व्याहरन् उच्चारयन् मां तदर्थं ब्रह्मरूपं परमात्मानमनु

स्मरन् ध्यायन् तदेहं स्थूलसूक्ष्मरूपं त्यजन् सन् यो मदक्तः प्रयाति प्र

कर्षेण गच्छति सः प्रकृष्टः परमां सर्वोत्कृष्टां गतिं प्राप्यरूपां याति मत्सा

मानाकारं पुनर्जन्माभावमात्मानं प्राप्नोतीत्यर्थः १२ ॥

मधुसूदनी टीका ॥

ॐमित्येकमक्षरं ब्रह्मवाचकत्वात् प्रतिमावद्ब्रह्मप्रतीकत्वाद्वा ब्रह्म

हरन्नुच्चरन् ॐमितिव्याहरन्नित्येतावतैवनिर्वाहे एकाक्षरमित्यनाया
सकथनेनब्रह्मेत्यस्यार्थं ॐमितिव्याहरन् एकाक्षरमेकमद्वितीय मा
विनाशि सर्वव्यापकं ब्रह्म मां ॐमित्यस्यार्थं स्मरन्निति वा तेन प्रणवं जप
न्तदभिधेयभूतं च मां चिंतयन् मूर्धन्यया नाड्या देहं त्यजन् यः प्रयाति
स याति देवयानमार्गेण ब्रह्मलोकं गत्वा तद्भोगान्ते परमां प्रकृष्टां गतिम
हूयां अत्र पतंजलिना तीव्रसंवेगानामासन्नः समाधिलाभ इत्युक्त्वा ईश्व
रप्रणिधानाद्वेत्युक्तं प्रणिधानं च व्याख्यातं तस्य वाचकः प्रणवः तज्जपः त
दर्थभावनमिति समाधिसिद्धिरीश्वरप्रणिधानादिति च इह तमात्काले
वततः परमगतिलाभ इत्युक्तं तस्मात् अविरोधाय ॐमित्येकाक्षरं ब्रह्मव्या
हरन्मामनुस्मरन्नात्मयोगधारणामास्थित इति आख्येये विचित्रफल
त्वोपपत्तेर्वा न विरोधः
१३ ॥

सदानंदी टीका ॥

ब्रह्मणो वाचकत्वात्तत्प्रतीकत्वात्तमुच्चरन् ॐमित्येकाक्षरं ब्रह्म सर्वव्या
पकमद्वयं ॐमित्यस्यार्थमीशानं मां च सम्यगनुस्मरन् नाड्या मूर्धन्यया
देहं त्यजन् धीरः प्रयाति यः स देवयानमार्गेण ब्रह्मलोकमुपासकः ग
त्वा भोगावसाने च मद्रूपां गतिमुत्तमां प्राप्नोति ब्रह्मणा सार्धं संप्राप्ते प्र
तिसंचरे १३ ॥

नीलकंठी टीका ॥

मूर्ध्नि प्राणमाधाय किं कुर्यादित्यत आह ॐकाररूपमेकाक्षरमेकं च त
दक्षरं च वर्णो ब्रह्म च तद्व्याहरन्नुच्चरन् मां च ब्रह्मभूतं तत्र अनुस्मरन् यो हि
देवदत्तं स्मृत्वा तन्नाम व्याहरति तस्मै देवदत्तोऽभिमुखो भवत्येवं ब्रह्मणो
नामोच्चारणेन सन्निहिततरं व्यापकं ब्रह्म साधकस्य सन्निधीयते सन्नि
हिते च ब्रह्मणि यो देहं त्यजन् म्रियमाणः प्रयाति ऊर्ध्वनाड्या उत्क्रामा
ति स परमां गतिं सन्निकृष्टब्रह्मरूपां याति ब्रह्मैव प्रकृत्या श्रूयते एषा
स्य परमा गतिरेषास्य परमा संपदेषोऽस्य परम आनंद इति तामेव गतिं

गी॰ टी॰ ग्रं॰

युं देहं स एव प्राप्नोति ब्रह्मलोकप्राप्तिद्वारा १३

आनंदी टीका

अथ ओंकारस्योच्चारः ओंकारश्चाहृतेरन्तर्मुख्यापानेन समाहरेदिति संहि
तोक्तेरपानसंहाराद्यो दानोद्धारनाय चेति रहस्यविदः वैष्णवपदप्राप्त्यु
पायजपतये तिश्रुतिविदः गुरवस्तु अपानसमाहारउत्थानोद्धोषः
परप्राप्त्युपायपतञ्जपश्चेति समुदितत्रयमेव हेतुरित्याहुः तथा चैते
तिरीयश्रुतौ ओमिति ब्रह्म ओमितीदं सर्वमित्यादौ व्याख्यातं श्रुतिवि
द्भिः परपदप्राप्त्युपायत्वं

रामकंठी टीका

एवं प्राणस्य मूर्धनि प्रेरणं प्रणवस्योच्चारणं प्रणववाच्यस्य च मत्स्वरू
पस्यानुस्मरणं चेति सर्वेन्द्रियमनोनियमपूर्वकं भगवत्त्रितयमेतत्सं
पादयन् यो देहविसर्गं करोति स योगी परमं पदं प्राप्नोतीति तात्पर्यम्

१३

लाक्षिकी टीका

ओमिति यत्प्रसिद्धमक्षरं तदेव ब्रह्मवाचकत्वाद्ब्रह्म तदुक्तं तस्य वाच
कः प्रणव इति तज्जपस्तदर्थभावनं चेति तदेवोच्चारयन् तद्वाच्यं च म
मात्मानमनुस्मरन्निरन्तरं विमृशन् तदुक्तं अदृष्टविग्रहो देवो भावग्राह्यो
मनोमयः तस्योंकारः स्मृतो नाम तेनाहूतः प्रसीदतीति इति तथा सर्वाणी
न्द्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्वाह्यविषयग्रहणमकृत्वे
त्यर्थः मनश्चात्ममननात्मकं हृदि संवेशं संविरुध्य करणे उपदेशाधिग
तं देहे हृत्पुण्डरीके निरुध्य विगतप्रचारं कृत्वा ततो मूर्ध्नि सुषुम्नया
स्थिमेदेन सर्वब्रह्मरन्ध्रे हृदयादूर्ध्वगामिन्या सुषुम्णानाड्या प्राणमन्त
समारूढमाधाय कृत्वा एवमात्मनो योगधारणां समाधिं स्थिरमा
तः स देहं त्यजन् प्रयाति यथायतनप्रवेशं निर्गच्छति देहात्
सयोगी परमां गतिं विदेहमुक्तिं प्राप्नोति

पंचोली टीका

किंच ओमिति यः योगी ओं इति एकाक्षरं प्रणवं ब्रह्मवाचकं व्या
हरन् तदर्थभूतं मां ईश्वरम् अनुचिंतयन् देहं त्यजन् प्रयाति म्रिय
ते स परमात्मनः उत्कृष्टां गतिं याति १३ ॥

शरणावीरमसिद्धबोधिनी ॥

ओमित्येकाक्षरमिति इतिपाठः स्वरूपद्योतकः ओमिति ओंकारस्व
रूपं एकाक्षरमेकवर्णं ब्रह्म पाठे ब्रह्म व्याहरन् कोऽर्थः वेदसार
भूतमोंकाराख्यमेकवर्णं मंगलावहमुच्चार्येति कार्यारंभे हि निर्वि
घ्नतासिद्धये मंगलमाचरंतीति सदाचारः ओमित्युच्चार्यैव चोत्तिष्ठं
तीति सर्वानुभवसिद्धं ओंकारस्यैव मंगलावहत्वं ब्रह्मवाचकत्वा^
च्छात्प्रसिद्धं हि यतस्तथा च पाठे ओंकारः सिद्धप्राहुः सिद्धावेतौ ब्रह्मणः
पुरा कंठं भित्त्वा विनिर्यातौ तेनोभौ मंगलावहाविति वक्ष्यते च भग
वता ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति ओमित्येताव
तैव विवक्षितार्थसिद्धावेकाक्षरं ब्रह्मेत्यनेन तत्स्तुतिः पाद्यते वेदोक्त
स्वाध्ययनसूक्तपाठादिकं विधायैव कार्यांतरं द्विजैरारंभणीयं स
मरणस्थितस्य त्वशक्तस्य पुनरोंकारमात्रेणैव सर्वं वेदोक्तं सूक्तपाठादि
कं विहितं भवत्यन्यथा कालविलंबे स्यात्पीडादिनिति तथा मामनु
स्मरन् ओंकारवाच्यं मां परं ब्रह्म सर्वोत्तमसाधकमनुचिंतयन् यः का^
स्मिन्प्रवणोऽन्त्यपतिः प्रयाति प्राणत्यागं करोति कीदृशः सन्
देहं त्यजन् शिथिलतया पतीयते स्नायवीति व्युत्पत्तेर्देहः प्राहे नाम कोपेन
भियते तस्य कोपाख्यं ड^ विशेषेण तत्त्वात् तथाच देहं कोपाख्यं द्विजाति
विशेषं त्यजन् त्यागो विहायितेदानमितिना मानुपासनात् प्रथय
यः परमेश्वरप्रीत्यर्थं भवेद्भ्यः प्रोत्साहनानि मितंदत्त

वामार्थं ह्री शरीरस्य दक्षिणार्थं तत्र येनात्याधभिभुक्तो के देहं जा
या पुत्रादिकं त्यजन् प्रहति निरोधकं प्रत्याहतिनिमित्तं च तद्वि
षयं तत्र देहं परित्यजन् स राजा परमां परेषां दूरां संबंधिनीं मां रा
ज्यलक्ष्मीं याति प्राप्नोति किंभूतां तां गतिं गम्यते प्राप्यते या तां प्रा
प्ते योग्यामिति यावत् कर्मणि क्तिन् १६॥

मधुभाष्य

१६॥

भाषा अनुवाद टीका

ओंकाराख्य एक जो अक्षर सो ब्रह्मका वाचक अथवा ब्रह्म
का वाचक अथवा ब्रह्म प्रतीक कहे प्रतिमा केसमान इन दोनोंहेतु
से ब्रह्म है ऐसे प्रणव कहे ओंकार के उच्चारणपूर्वक तद्वाच्य रूप
हमको स्मरण करि देहत्यागकरते जो मनुष्य अर्चिरादि मार्ग अ
र्थात चन्द्र सूर्य मार्गसे गमन करतेहै तेई सर्वोत्तम मेरी गतिको
पावते है १२ ॥

दोहा

ओं एकाक्षर ब्रह्महि पढत स्मर्त मोहि कोय जो त्यजत देह हिंना
त है जात परम गति सोय १३॥

72

अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्या
हं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ ॥

शाङ्करभाष्यटीका

किञ्च अनन्येति अनन्यचेता नान्यविषये चेतो यस्य सोयमनन्यचेता यो
गी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सततमिति नैरन्त
र्यमुच्यते नित्यश इति दीर्घकालत्वमुच्यते न षण्मासं संवत्सरं वा किं त
र्हि यावज्जीवं नैरन्तर्येण यो मां स्मरतीत्यर्थः तस्य योगिनोहं सुलभः
सुखेन लभ्यः पार्थ नित्ययुक्तस्य सदा समाहितस्य योगिनः यत एव
मतोनन्यचेताः सन् मयि सदा समाहितो भवेत् १४ ॥

आनन्दगिरिटीका

ननु वायुनिरोधविधुराणां उदीरितया रीत्या स्वेच्छाप्रयुक्तोत्क्र
मणसम्भवाद्दुर्लभा परमा गतिरापतेदिति तत्राह किञ्चेति इतस्त
भगवदनुसंधाने प्रयतितव्यमित्यर्थः सततं नित्यश इति विशेषण
योरपुनरुक्तत्वमाह सततमित्यादिना उक्तमेवार्थं प्रश्नपूर्वकं व्यक्तीक
रोति नेत्यादिना जितासुरिच्छया देहं सजति तदितरस्तु कर्मक्षये
तैवेति विशेषं विवक्षन्नाह यत इति १४ ॥

स्वामिकृतटीका

एवंभूतकालधारणा यामन्यासि: नित्याभ्यासवत एव भवति नान्यस्येतिपूर्वोक्तमेवानुस्मार
यति नान्यस्मिन् चेतो यस्य तथाभूतः सन् यो मां सततं नित्यशः प्रतिदिनं स्म
रति तस्य नित्ययुक्तस्य समाहितस्याहं सुखेन लभ्योस्मि नान्यस्य १४
१४ ॥

पैशाचभाष्यटीका

अनन्यचेता यो मां स्मरति नित्यशः सुलभः सुखेन लभ्यः नित्ययुक्तस्य
नित्ययुक्तो नित्ययुक्तस्तस्य योगिनः १४ ॥

रामानुजभाष्यटीका

गी·
टी· अ·
23

एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रका
र उक्तः अथ ज्ञानिनो भगवदुपासनप्रकारं प्राह अनन्येति सततं सर्वकाल
मनन्यचेता यः स्मरति अत्यर्थं मत्प्रियत्वेन मत्स्मृत्या विनात्मधारणमा
लभमानो निरतिशयप्रियं मां यः स्मरति तस्य नित्ययुक्तस्य नित्ययोग
काङ्क्षमाणस्य योगिनोऽहं सुलभः अहमेव प्राप्यः न मद्भावः ऐश्वर्यादि
कः न हि योगमसहमानोऽहमेव तद्वरणमन्वास्यानुगुणोपासनविपा
कं तद्विरोधिनिरसनमत्यर्थं मत्प्रियत्वादिकं चाहमेव ददामीत्यर्थः
यमेवैष वृणुते तेन लभ्य इति श्रूयते वक्ष्यते च तेषां सततयुक्तानां भ
जतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते तेषामेवा
नुकम्पार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भा
स्वतेति च १४ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १४ ॥

परमार्थप्रपाटीका ॥

एवं मद्भक्तस्य नाहं शीघ्रदशामहमेव संपादयामीत्याह अनन्येति स
ततमनवरतेन अन्यमदतिरिक्ते चेतसि यस्य स तथाभूतः सन्यो जी
वद्दशायां नित्यशः मां स्मरति तस्य समाहितमनसोऽहं सुलभः सुखे
न प्राप्यो नान्यस्य ध्यानादिक्लेशराहित्येनापि स्वयमाविर्भूय प्रक
टो भवामीत्यर्थः १४ ॥

वनमाली टीका ॥

य एवं ब्रह्मलोकं प्रेम्णा विलुठ्याटहस्यकं न शक्नोति किं नु कमलयोरेव पदव
शे देहन्यजनं तस्य किं स्यादित्यत आह अनन्येति न विद्यते मदन्यविषये
चेतो यस्य सोऽनन्यचेताः सततं निरन्तरं नित्यशो यावज्जीवं यो मां मति
प्रेम्णा स्मरति तस्य स्ववशतया परवशतया वा देहं त्यजतोऽपि नित्य
युक्तस्य सततं समाहितचित्तस्य योगिनोऽहं सैव प्ररोजगड्डयादिकं
न्यस्यातिदुर्लभोऽपि सुलभः सोऽत्र न लभ्यः हे पार्थ त्वमनु मित्रस्या
हमति सुलभ इति भावः यावज्जीवं विहितेयान्तरस्मृत्यनया हरेश्चिन्तनम
वपरमगतिहेतुर्ब्रह्मलोकं प्रेम्णा स्वबयोक्रमणा भवन्नवेति नामीवाय

हः तदनुस्मरणं विना ब्रह्मलं प्रेप्सोः क्रमणमपि न मोक्षदमिति भावः १४

ऊस्मभैवेजयन्ती टीका ॥

एवमार्तादित्रयाणामुपासनप्रकारं मोक्षप्रकारं च प्रतिपाद्याथेदानीं
ज्ञानिन उपासनप्रकारं तस्याप्यप्रकारं चाह अनन्यचेता इति सततं निरंतरं
देशकालवस्त्ववस्थादिपरिहारोहविचारापेक्षारहितेन नित्यशो गृह
वहः अनन्यचेताः अन्येषु प्राकृतिकैहिकामुष्मिकविषयभोगसाध
नादिषु देवान्तरेषु वा चेतो यस्य सोऽन्यचेताः नान्यचेताः अनन्यचेताः
निरवच्छिन्नतैलधारावन्मत्स्वरूपलग्नचित्तः सन् मज्ज्ञानवान् मद्भक्तो त्रिय
यो जनः मां सर्वात्मानं सर्वेश्वरं स्मरति निरतिशयप्रेम्णा चिंतयति हे पा
र्थ तस्य युक्तस्य नित्ययुक्तस्य नित्यमेव प्रत्यहं प्रतिक्षणमेव मद्योगेच्छा
वतो योगिनो मन्मित्रादिसम्बन्धवतोऽहं सर्वेश्वरः सुलभः सुखेनैव ल
भ्यः प्राप्यः न तु दुःखेन तपःसाधनापेक्षा लक्षदोषविवशीभूतानां ज्ञानयोगस्था
नां न चापि ददामीत्यर्थः वक्ष्यति च ददामि बुद्धियोगं तं येन मामुपया
न्ति ते इत्यादि नाप्युक्तिर्वाह यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा
वृणुते तनूं स्वामित्यादि: १४ ॥

यएवं वायुनिरोधेन देहं त्यक्तुं स्वेच्छया न मधुसूदनी टीका ॥ शक्नोति किं तु यस्तु कर्मवत्तयेणैव परवशो देहं त्यजति तस्य किं स्यादिति

भ्रुवेणाक्रवोर्मध्ये प्राणमावेश्य पूर्वमूर्धन्यया नाड्या

ह॥ न विद्यते मदन्यविषये चेतो यस्य सोऽनन्यचेताः सततं निरंतरं नित्यशो याव
ज्जीवं यो मां स्मरति तस्य स्ववशस्य परवशतया वा देहं त्यजतोऽपि ति
सुलभः सुखेन लभ्योऽहं स तत्संततं समाहितचित्तस्य योगिनः सुलभः सुखेनैव लभ्योऽहम
त्यक्तस्य सततं समाहितचित्तस्य योगिनः सुलभः सुलभामाभेवी
रमेश्वरः इतरेषामतिदुर्लभोऽपि हे पार्थ तवाहमतिसुलभामाभैषी
रित्यभिप्रायः अत्र तस्यात्तिषष्ठीशेषे संबंधसामान्ये कर्तरि न लोकेत्या
दिना निषेधात् अत्र चानन्यचेतस्त्वेन सत्कारो नैरन्तर्यं दीर्घकाल
त्वेन सततमिति नैरन्तर्यं नित्यशः इति दीर्घकालत्वं स्मरणस्योक्तं तेन सततं दीर्घकालं
नैरन्तर्यसत्कारासेवितो दृढभूमिरिति निपाते ज्ञानं मतमनुसृतं भवति
तत्र सततं [illegible] नित्यशः अभ्यास [illegible] उक्तोऽपि स्मरणं पर्यवसायी तेन
यावज्जीवं प्रतिक्षणं विदेहपात रह्यतया भगवदनुचिंतनमेव रम
गतिहेतुः मर्यादया [illegible] नाद्यात्र स्वेच्छया प्राणोत्क्रमणं भवत तेनैव तिना
नीचाग्रहः [illegible]

प्रा

गी॰
टी॰ अ॰

सदानंदी टीका ॥

एवं स्वेच्छया देहं त्यक्तुं शक्नोति न तु जनः किं तु कर्मतत्पर एव देहं परवश
स्सन् रोगादिभिस्त्यजति तस्य किं स्यादित्युच्यते स्फुटम् मदन्यविषये
चेतो नास्ति यस्य स एकधीः यो मां निरंतरं यावज्जीवं स्मरति तस्यैव
स्वेच्छया त्यजतो देहं पराधीनं याप्यथवा समाहितधियो नित्ययोगि
नो मत्परस्य सः अनायासेन लभ्योऽस्मि योऽन्यथा मतिदुर्लभः हे पार्थे
ति सुखेनैव लभ्योऽस्त्वहं भयं त्यज १४ ॥

नीलकंठी टीका ॥

इयं गतिरतीव दुर्लभेति मामेव स्यादित्याह अनन्येति नास्ति अन्यत्र
चेतो यस्य सोऽनन्यचेता इत्यनेन स्मरणे आदर उच्यते सततमिति
नैरंतर्यं यो मां स्मरति नित्यश इति दीर्घकालत्वं यावज्जीवं स्मरतीत्य
र्थः तस्याहं सुलभः पार्थ नित्ययुक्तस्य नित्ययोगिनामेव पृथके यु
क्ताहारविहारादौ यमनियमादौ च युक्तस्यावहितस्य योगिनः योग
मनुतिष्ठतः १४

आनंदी टीका

अत्र सततमभ्यासस्यावश्यकर्तव्य
त्वमाह ॥ अनन्यचेताः सततं यो मां स्मरति धारणादिना स्थिरीकृतचित्तः यो यो
गी सततं निरंतरं नित्यशो दीर्घकालं यावज्जीवं वा स्मरति पार्थ तस्य
योगिनो नित्ययुक्तस्य सदा निरंतरमेव योगाभ्यासिनो हं सुलभः अत्र
श्रीमदभिनवगुप्तपादा रहस्यार्थान्तरमप्याहुः सर्वद्वाराणि चक्षुरा
दीनि संयम्य रूपादिविषयेभ्यो व्यावर्त्य न तु द्वाराणि विद्ध्वा नाडी
मनः प्राणमामूर्ध्नि विनिक्षिप्य शनैरात्मानि मूर्ध्नि सकलतत्वातीते
धारयन्निति कायनियमेन ओमिति जपन्निति वाङ्नियमेन माम
नुस्मरन्निति चेतसानन्यगामिनो नियमेन प्रयाति दिनाह्नि नमपुन
रावृत्तये गच्छति सततं परबोधस्वरूपतामात्मनेव धारयति पुनः
विंदसकलापत्याने जन्म माभूयादितीर्ष्ये यो मामनन्यचेताः स्म
रति सततं सममद्भावमेव याति न त्वज्ञोत्क्रान्तिमात्रेह योऽयमस्य
स्वस्याहं तपदोपलेपविरोधी युक्तः तथा चोक्तं व्यापिमांश्रीवसतता
यं सत्क्रान्तिनी मानिष्कला अव्यापिनि शिवे नाम नोत्क्रान्तिः शिवदा

१४

यिनीति [illegible]

रामकंठी टीका

तस्मिन्प्रयाणकाले नात्कालिकावस्था विसंस्थूल चित्तो योगी कथं तं समाधिं साधयेदित्यत्र पूर्वोक्तं कारणमाह ॥

तस्य नित्ययुक्तस्याविच्छिन्नसमाधेर्योगिनो हे नित्यशः सर्वावस्था सु सुखदुःखादिकात्मिका सु सुलभः सुप्रापः कस्य यः सततम व्यवधानेन मां यश्चोक्तयोगाभ्यासात् तथैकं तत्त्वं परमात्मानमनन्य चेता अन्यतो मद्व्यतिरिक्ताद्वस्तुनो निवृत्तान्तःकरणः स्मरत्यात्म त्वेन प्रत्यवमृषति यं यं भावं स्मरन्वापीत्यादिनोक्तोपपत्त्या सर्वात्म कमतत्त्वरूपप्रत्यवमर्शाभ्यासस्य दृढसंस्कारस्य योगिनस्तस्याम पावस्थायामहमात्मभूतत्वात्कथं दुष्प्राप इति तात्पर्यं [illegible]

[illegible] १४

[illegible] टीका

ननु मरणकाले तात्कालिकी [illegible] लिकदुःखादिविसंस्थूल चित्तो योगी कथमेवं विधं समाधिं साधयेदित्याशंक्य पूर्वोक्तमेव कारणमाह ॥

यो योगी अनन्यचेता नान्यस्मिन्साध्ये फलादौ विषये वात्मानं विस्मा र्य समरत्येतो यस्सततं यावज्जीवं प्रतिदिनं सततं निरन्तरं यथा भवति तथा मामप्रत्यवेस्मरति आत्मत्वेन प्रत्यवमृशति हे पार्थ तस्य तस्य योगिनो नित्यं व्यवहारदशास्वपि युक्तस्या त्मनो समाहितस्य अहमत्वरः सुलभोऽनायासलभः सदैव लभ्यो स्मि नान्यस्य प्रमत्तस्य एवं सति तस्यां दुःखनिबन्धनायामप्यवस्था यामात्मभूतत्वात्कथमहं दुष्प्राप इति तात्पर्यं यत एवमतोऽनन्यचे ताः सन्नपि सदा समाहितो भवेदिति [illegible]

[illegible] १४

पंचोली टीका

किंच अनन्यचेता इति हे पार्थ यः सततं निरंतरमनन्यचेता न अ न्यविषयं चेतो यस्य सः अनन्यचेताः मां परमेश्वरं नित्यशः दीर्घका लं यावज्जीवं स्मरति तस्य योगिनः नित्ययुक्तस्य योगिनः सदा स माहितचित्तस्य अहं सुलभः सुप्राप्यः १४ ॥

नत्वयथाणमात्रेणायातुसंबंधिराज्यत्वत्व्या क्रोंतिरसंभविनीत्य
र्जेनाभिप्रायमाधांक्ष्य प्रतिज्ञातार्थे पूर्तयेव पूर्वं यद्यक्षरं तत्स्याक्ष
स्यातं साधयति भगवान् तथाहि सर्वद्वाराणि संयम्य परब्रह्म
मीपमाप्नौसत्यांतत्संबंधिनः सर्वदिक्याण्यवेपानि गीमनमार्गा
न्विभुनकपाटान्कृत्वा हृदयस्याम्बरत्नकान्विदन्य तथा मनः मा
नोवदतिनवंरथाम्पादिकं हृदि हृदयदेशोर्ध्यात्परब्रह्मपानिरुध्य प्र
तिषिद्धप्रसंकृत्वेतियावत् तथा मूर्धिमम्मरध्रियाक्षिप्राणान् प्राणेन
बलेनसहितानातिबलानितियावत् आत्मनः प्राणान् यद्वा आत्मनः
स्वस्यसंबंधिनः प्राणान् प्राणो विद्यतेयेषामिति अस्त्यत्तः प्राणिनः
हृभटान्हस्यावांशस्थायाधस्थापयित्वायेकत्वेतियावत् योगधार
णांयोगः कर्मसुप्रवृत्तिलक्षणांस्यधारणामनुष्ठानलक्षणा
स्थितः पातकप्रक्षणादिकंकर्मकुर्वनितियावत् ॐमित्येकाक्षरं
ब्रह्म ॐकारलक्षणांपरब्रह्मसंज्ञामुच्चारयन् मांचपरमत्त्वसन्
परमेश्वरएवममप्रकरणमित्यविरतमनुध्यायन् यः त्यक्त्रियः प्रया
ति पातुसंसत्त्वमभिवानार्थंगच्छति सचेजयति तद्देहं पातुपा
शीरंत्यजन् प्राणाविमुक्तिकेनाभूमौपातयन् परमांगतिं प्राप्या
मातुराज्यलक्ष्मीं प्राप्नोति प्रथचराज्यसुखमनुपभुज्यदेहंत्यजन्
प्राशुरवसानेवपातिनाक्षमामत्सन् परमांगतिमनत्तासुख्यल
क्षणांप्राप्नोतीतिमतिनदैव्याख्या सचेद्युद्धभिरेवपरानीयेत
ततस्समरमध्यएवसंमुखमरणाद्देहंस्वशरीरंपरित्यजन्मयमांग
ति महामलक्षणांप्राप्नोतीत्यर्थः यद्वाव्यूहरचनाव्यवहारस्याक्षा
वगम्यते संक्षेपेणोक्तत्वात् एषएवहि संक्षेपोयदस्मीयसांप्र
नबहूनामर्थानांप्रतिपादने प्रतत्तत्राहजी प्रथ्यसेनगच्छेते म
वव्यूहरचनाप्रकारोयणामवेहाराणिमटानांप्रवेपातिर्गमायोगि
पहतोः प्रथीद्यूहस्यसंयम्यमयनानिनिषिद्धमहनिर्गमप्रवेपा

निरुध्वा तथा मनः मनः प्राधान्येन चात्मसाहाय्यलक्षणया सेनानीर्ल॰
क्ष्यते यथा चक्षुरादीनां मध्ये मनो यदिन्द्रियमनुवर्तते तेन देव स्व
विषयग्रहणे समर्थं भवति नान्यत् एवं सेनानीरपि यमेव सै
न्यभागं यस्मिन्नेव कार्ये नियुङ्क्ते स एव तदेव कार्यं करोति नान्य
दिति साहाय्यात्मनः सेनानीः तं सेनान्यं हृदि व्यूहमध्ये निरुध्य
स्थापयित्वा च यद्वा मनो वदति चपलानि करणानीति यावत्
अर्थात् सैन्यानि हृदि व्यूहमध्य एव निरुध्य संस्थाप्य यदुक्तं व्यूह
कलनायां पुरो देयाः स्वरतंत्रिनिर्भीरु घटना सेनापरं तत्कृतिरिति
यद्वा संयम्य मन इतिच्छेदः यथा ह्यो भिन्नक्रमो न इत्यमेनान्वेति
तथा चायमर्थः सर्वद्वाराणि प्रोक्तलक्षणानि निरुध्य निरुध्वेति
रुध्वा तथा हृदि व्यूहमध्ये संयम्य संयमयित्वा ग्रथित्वमस्वः सं
योजयित्व योग्यं मनः स्वकीयं यथं च निरुध्य स्थापयित्वा तथा
मूर्ध्नि व्यूहाग्रभागे आत्मन इति ल्यब्लोपे पंचमी तथा च आत्मा
नं यत्नं स्वभावं प्राणीयं वा विचार्येत्यर्थः प्राणानबलातिपाय प्रा
लिनः स्मरान् इति यावत् आधाय स्थापयित्वा कोर्थः हृस्वप्रांशुत्वा
दिकं स्वरताभिव्यंजकमवेद्याभीरुस्वभावं प्रयत्नातिप्रायं च पा॰
रीच्य स्मरान्मदानग्रेदद्वेति यदुक्तं प्रथमं योजयेच्छ्रमान्स्वान्संग्रा
मकर्माणीति एवं योगधारणा योगः सैन्यानां यथोचितस्थानेषु
स्थापनारूपो व्यूहस्तस्य धारणां कलनामाश्रितः व्यूहकलन॰
यासैन्यानि विन्यस्तवान् इति यावत् यथा च व्यूहस्थापना प्रथ
माध्यायव्याख्याने तत्र तत्र व्यूहकलनाप्रकारप्रदर्शने सव्या॰
ख्यानं विस्तरेण प्रपंचिता स्वलक्षणं च हृस्वप्रांशुघनभुकोपन
कलिप्रीता इत्यादिना तत्रैव दर्शितमिति तत एव सर्वमवधार्य॰
मिति एवं कृत्वा यः कश्चित्क्षत्रियप्रवरो राजा ओमिति स्वरूपमेका
क्षरं ब्रह्म मंगलावहं परब्रह्माभिधानं व्याहरन् प्रयाति प्राग्व्यू॰
हान्तरं गच्छति सदेहं स्वकीयं परकीयं वा शरीरं त्यजन् जयपराजे
योरन्यतरस्यावश्यंभावित्वादिति भावः परमां याति प्राप्तराज्य

तस्मात्क्रमणात्तद्रूपां मत्स्वाभाव्यलक्षणां व्याप्तिं प्राप्नोति तत्र दे
हः मामेव स्मरन्निति सर्वेषां समानः इति व्यूढकल्पनया व्या
ख्याते अथेदानीं प्रासंथानेतद्व्यपातने चैकाग्रतालक्षणाया
७८ धारणायाश्चापि जनराहृत्यैव व्याख्यायते तथाहि प्राग्स्मृत्व
प्रामेमत्यासर्वबहुशालिवत्त्वादीनि प्रवृत्तिनिरोधकमुख्या
दिनिमित्तकावध्यतानिश्चयनवर्णितेराचितमित्ताबालिम्बा
दियमविकोर्णात्मकचित्तवृत्तिप्रसरवत्संभूतानि संयम्यय
यास्वविषयेभ्यः प्रत्याहृत्य मनश्च सकल्पात्मकं हृदि प्रदेश
एवतिरुद्धा तथात्मनः आत्मानं बुद्धिमवस्थस्येति ल
क्षेपंचमी बुद्ध्यावसारेणोतियावत् प्राणात्ततं प्रजायावहृत्व
चनं मूर्ध्नि शतास्त्रिवाधायवाधायपट्वाकोयः मीति एवंकं पुरुष
विधायेति यतउक्तं कातर्यं केवलानीतिः प्रोर्थं चापलवेष्टित
तः सिद्धिसमेताभ्यामुभाभ्यामन्वियेषमइति तथायोगे भाव
काग्रं ब्रह्म ओंकाररमात्रमस्य देवतामंत्रं व्याहरन् मांचोंकार
वाच्यपरब्रह्मलक्षणमनुस्मरन् यः प्रयातीति सर्वेषां समानं
॥ तद्देहोत्क्रांतिकाले तादृशावस्थाविमस्थलविनः
कर्मयोगी कथं भवेत्तमनुस्मरेदित्यत्र पूर्वोक्तमेव कारणमाह
नन्यचेताइति यः कर्मयोगी सततं निष्ठवेधानेन मां परमात्मानं
स्मरति धारणात्वेन भावयति कथंभूतः अनन्यचेताः नाविषयतेम
सिन्मत्तो व्यतिरिक्ते देवतांतरादौ चेतो यस्य तादृशो मामदितत्वदेव
तादेः सकाशात्तिवर्तितास्यतः कारणइतियावत् तस्यनित्यं
तस्यनित्यं सर्वदाप्रयुक्तस्य स्वोचिते शुभकर्मसु प्रवृत्तस्ययोगिनः
कर्मयोगिनो हृन्नित्यशः सर्वास्वहरवात्मिकास्ववस्थाखात्मिकाव
चावस्थास्वजीवदप्राणायांमनुवरणमसन्नतरेकालेचहलभः हप्राप्यो
स्मि योहिनिरंतरं मां स्मरति तस्य निरंतरस्मृत्यैवमत्प्राप्तिः सिद्धैव
नवबलवदुःखावेगेन स्मृतिविनाशोपिदृष्टइति वाच्यं नित्या

भ्यासस्य त्वरणं स्मृतिनिरोधानेयितत्कालमेव पुनरपि स्मृत्याधायकत्वादितिभावः १४॥

मधुभाष्य

१४॥

77

भाषा अनुवाद टीका ॥

ऐसे ही अन्तकाल मे धारणा क्रम से नित्य अभ्यास कारी पुरुष
को मेरी प्राप्ति होती और को नहीं पतावता एवं ववन ही को स्मरण
[illegible] करावते हैं कि हे पार्थ जिस मनुष्य का वित्त भगवतको छो
ड़ि और मे नहीं है ऐसा अनन्य वित्त होय जो निरन्तर या प्रतिदिना
हम को स्मरण करे है उसी समाहित पुरुष को हम अनायास मि
लते हैं और को नहीं प्राप्त होते हैं यह जानो १४ ॥

दोहा

जो मोहि वित अनन्यसें स्मरत निरंतर कोय पारथ ताको सुल
भ मे योगयुक्त नितजोय १४॥

78

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवन्ति
महात्मानः संसिद्धिं परमां गताः १५ ॥

शाङ्करभाष्यटीका

तव सौलभ्येन किं स्यादित्युच्यते शृणु तन्मम सौलभ्येन यद्भवति मामु
पेत्येति मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं न प्राप्नुव
न्ति किं विशिष्टं पुनर्जन्म न प्राप्नुवन्ति तद्विशेषणमाह दुःखालयं दुःखा
नामाध्यात्मिकादीनामालयमाश्रयं आलीयन्ते यस्मिन् दुःखानि तं दुः
खालयं जन्म न केवलं दुःखालयमशाश्वतमनवस्थितस्वरूपं च नाप्नु
वन्तीदृशं पुनर्जन्म महात्मानो यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृ
ष्टां गताः प्राप्ताः १५ ॥

आनन्दगिरिकृतटीका

अनन्यचेतसं समाहितचेतसे [illegible] प्रतीश्वरस्य सौलभ्यमेव वि
मुच्यते किं त्वां प्राप्तास्तेऽप्यावर्तन्ते किं वा पुनरावर्तन्ते चन्द्रलोका
दिवेति सन्देहात् पृच्छति तत्रेति तत्रोत्तरश्लोकेन निश्चयं दर्शयति उ
च्यते इति ईश्वरोपगमने न सामीप्यमात्रमिति व्याचष्टे मद्भावमिति पु
नर्जन्मनोऽनिष्टत्वं प्रश्नद्वारा स्पष्टयति किमित्यादिना महात्मत्वं प्र १५
कृष्टसत्त्ववैशिष्ट्यं यतयस्तस्मिन्नेवेश्वरे समुत्पन्नसम्यग्दर्शिनो भूत्वेति विशेषः

स्वामिकृतटीका ततः किमत आह मामिति ॥
यत्वेवं त्वं सुलभोऽसि
उक्तलक्षणा महात्मानः मद्भक्ता मां प्राप्य पुन दुःखाश्रयमनित्यं च जन्म
न प्राप्नुवंति यतस्ते परमां सम्यक् सिद्धिं मोक्षमेव प्राप्ताः पुनर्जन्म नो दुः
खानां चालयं स्थानं मामुपेत्य न प्राप्नुवंतीति वा
१५ ॥

पिशाचभाष्यटीका

मामुपेत्येति संसिद्धिं परमां मोक्षं १५ ॥

रामानुजभाष्यटीका

गी॰
टी॰ अ॰

79

अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्च पुनरावृत्तिमैश्वर्या
र्थिनः पुनरावृत्तिं चाह मामिति मामुपेत्य पुनर्निखिलदुःखालयमस्थिरं
जन्म न प्राप्नुवन्ति यतस्ते महात्मनः महामनसो यथावस्थितमत्स्वरूप
ज्ञाना अत्यर्थमस्थिरत्वेन मया विनात्मधारणमलभमाना मय्यासक्त
मनसो मदाश्रया मामुपास्य परमं संसिद्धिरूपं मां प्राप्ताः ॥ १५ ॥

अभिनवगुप्तकृतटीका

समाहितत्वेनिश्चीयतेनेनेतिनिश्चय इ उपायः तेनोपायेनेतत्पदमभिप्रायस्य
उपायमत्र सततनाभ्यासायवदेव हारीणीन्द्रियाणि इत्यादीन्येनेन विषयसंगा
भाव उच्यते नत्वविहास्थानाधिष्ठाने आत्मनः प्राणमात्मसारथ्यमित्याश
स्यात्मनि मूर्ध्नि सकलतत्त्वातीते धारयन्निति कायनियमः ओमिति जपति
ति वा नियमः मामनुस्मरन्निति चेतसानन्यगामिना यः प्रयाति दिने दिने
मपुनरावृत्तये गच्छति तथा च देहं त्यजन्कथमेपुन[illegible]रिदंस
कलापत्यान शरीरं मयादिति एवं यो मामनन्यचेताः स्मरति सततमे
व यानितमनुष्ठानं नत्वत्र मुनेः परेब्रह्मलाभे तत्पदे पदेपविरोधो उक्तो नो मरः
तथा चोक्तं व्यापिन्यां शिवसत्तायामुक्तोनितिर्नोमनिष्कला अव्यापिनि
शिवेनामनोन्मनीतिः शिवदायिनीति यदिवा सततनाभ्यासोपियेनैष्ठि
तस्तथापि जन्मस्थिदोषवैबाटैर्निमित्तान्तरस्य एवत्वोपायदाताहृद्यमा
वो जायते न तदायमुत्क्रान्तिलक्षण उपायः संस्कारान्तरप्रतिबंधकउ
कः अतएव यदन्तरमित्यादिनाभिदास्य इत्येतेन प्रतिज्ञा कृता
दाणामात्रस्यापि भगवदनुचिन्तनमयस्य सकलसंस्कारविध्वंसनल
तल्लमङ्गतवृत्तिनिश्वनिपाटयितुं यदाहुराचार्यवर्याः निमेषमपि यद्य
कमिति अतएव प्रयाणकाले स्मरणेन विनावेडने नियंष्टांशका ता
वीतशंकान्कतु मुक्तमनन्यचेताः सततमिति अन्यत्र फलाटैसा
यस्यनेचेतरस्पंधः तस्माद्दुर्लभइतिनस्यनकिंवित्प्रयाणकालेवि
त्वयर्थेषणांतीर्थसेवा इतरायणमायतन संशयः सत्वविशुद्धिस्थवि
तकवेविषयवदादिगुणपकालादिनं अकिंचेमपविश्रुमूपदिग्रहः
त्वेदहमलविहीनेदेहनाशुद्धवस्त्रादिग्रहस्याघः क्लेशोभयथनीयङ्क
थः यत्मागुक्तं तीर्थेश्वपचगृहेवापि तनुमज्ञावयातीमुक्तातं
प्रामोपिपुनरावृत्तिरसौन्यापशंकाह मामुपेत्यति अन्यतस्तु सर्वतः

वपुनरावृत्तिरस्तीतिस्मरणंतरेणश्लोकेनप्रतिपादयिष्यते मांतुप्राप्य
नपुनर्योगिनोजन्मादिजातमाप्नुवंति ।१५

परमार्थप्रपा टीका

सुलभत्वेकिंभवतीत्याह मामिति एवमुक्तलक्षणामहात्मानोमहा
नुभावाः मांपरमात्मानंप्राप्यदुःखालयंसर्वदुःखनिदानमशाश्वतंन
स्थिरंपुनर्जन्मनप्राप्नुवंति यतस्तेपरमांसंसिद्धिंगताः ।१५ ॥

वनमाली टीका ॥

मदंतेनगुणेनवासुदेवंप्रसन्नमपरोक्षीभूतंप्राप्यनतुनिवर्तंतइत्याह
मामितिमांसर्वेश्वरंप्राप्यपुनर्जन्ममनुष्यादिदेहसंबंधंकीदृशंदुःखा
लयंगर्भवासयोनिनिर्गमनाद्यनेकदुःखस्थानमशाश्वतमस्थिरंना
प्नुवंति पुनर्नावर्तंते यतोमहात्मानोमहाशयागंभीराशयाःप्राकृ
तभोगेभ्योनिवृत्तचित्ताइत्यर्थः मांप्राप्यमत्प्रसादात्स्वस्वरूपावि
र्भावरूपांसम्यक् सिद्धिंपरमांनिहतांशेषप्राकृतांशतयाविदेहकै
वल्यरूपांध्वस्तलिंगतयापुनरावृत्तिरूपांगताः परंज्योतिरुपसंपद्य
स्वेनरूपेणाभिनिष्पद्यतसततमपर्येतिजक्षन्क्रीडन्रममाणइत्या
दिश्रुतेः विहारोपदेशादितिसूत्राच्च ।१५

कुसुमवैजयन्ती टीका

नन्वीदृशायेत्वानंतस्तेकिंफलंप्राप्नुवंतीत्यपेक्षायामाह मामुपे
त्येति तोसकलकल्याणगुणार्णवंसर्वसुखसिंधुंसर्वेश्वरमुपेत्य
प्राप्यपुनरस्मिन्संसारेदुःखालयंदुःखानांआध्यात्मादीनांआलयंतेष
स्मिंस्तथासर्वदुःखोत्पत्तिंकेवलंदुःखालयमेवनास्तिकिंतुअशाश्वत
मनित्यंशाश्वतस्तत्फलंवानित्यइत्यमरकोशात् जन्मप्रादुर्भावंतेमत्त्व
रूपगुणशास्त्रादिज्ञानवंतोमद्भक्तानाप्नुवंतियतस्तेलयांमहात्मानेल
नजन्मप्रदानिसंचितक्रियमाणानिकर्माणिभस्मीभूतानिसुरतः
कारणाभावात्कार्यस्याप्यभावस्यादित्यर्थः कीदृशास्तेमहात्मानोम
होदारमानसाः आत्मात्मीयादिसर्वस्वनिरतिशयप्रेमास्पदेसकल

गी०
टी० ग्र० मुक्तिभोगमध्येवसमर्पितवंतइत्यर्थः अपुनरावर्तनं परमां सर्वोत्कृष्टां संसि
द्धिं मुक्तिंगताः सर्वफलरूपं मां प्राप्ता इत्यर्थः १५

मधुसूदनी टीका

भगवंतं प्राप्ताः पुनरा वर्तते न वेति संदेहे नावर्तंत इत्याह ॥
मामीश्वरं प्राप्य पुनर्जन्म मनुष्यादिदेहसंबंधं कीदृशं दुःखालयं गर्भ
वासयोनिद्वारनिर्गमनाद्यनेकदुःखस्थानमशाश्वतमस्थिरं दृष्टनष्टप्रा
यं नाप्नुवंति पुनर्नावर्तंत इत्यर्थः यतो महात्मानः रजस्तमोमलरहिता
न्तःकरणाः शुद्धसत्वाः समुत्पन्नसम्यग्दर्शनाः सलोकभोगांते परमां
सर्वोत्कृष्टां संसिद्धिं मुक्तिं गतास्ते अत्रैव मां प्राप्य संसिद्धिं गता इति वदतो
पासकानां क्रममुक्तिदर्शिना [illegible]
[illegible] १५ ॥

सदानंदी टीका ॥

यस्मादेवं ततो नित्यं समाहितमना मयि अनन्यधीः स्याद्यस्त्वयोग्यस्य
मतप्परायणः मद्भावैस्तवं तत्वं प्राप्य धीरा समुद्भवः नाप्नुवंति पुनः
देहसंबंधं दुःखमंदिरं गर्भवासभगद्वारनिर्गमादिश्रमाकरं दृष्टन
श्रमागारं जन्म दुःखालयं यतः शुद्धसत्वा महात्मानो जातसम्यग्धियो
याः सर्वोत्कृष्टां विमोक्षाख्यां संसिद्धिं मोक्षमागताः १५ ॥

नीलकंठी टीका ॥

त्वत्प्राप्तेः फलं किं स्यादित्यत आह मामिति मामुपेत्य पुनर्द्वितीयवारं जन्म
नाप्नुवंति यज्जन्म दुःखानामालयं भूतेमूढदृष्ट्या किंचित्सुखालय
त्वेऽपि अशाश्वतं नश्वरं तत्कर्मिमर्थः केनाप्नुवंति महात्मानो योगेन
नाशनाय च तथा ब्रह्मलोकगतानां क्रमसमर्थिते ब्रह्मणा सहते सर्वे
संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति प्रति
संवरेवा ब्रह्मणोन्ते परस्य ब्रह्मणो ब्रह्मलोकनाशे १५ ॥

ज्ञानदीपिका टीका ब्रह्मप्राप्तेर्माहात्म्यमाह ॥

ग्रणाश्चतमनवस्थितस्वरूपम् १५

येचानेन क्रमेणमांप्रपन्ना रामकंठीटीका

न्ते॥ महात्मनोयथोक्तानपरिशीलनभावात्महत्त्ववंतिशायीपरमे
श्वरएवात्मायेषांतेनयांतएवमांयथोक्तयाभक्त्यासमाश्रित्यपरां
सिद्धिमभेदसमापत्तिलक्षणांपरमोफलसंपत्तिमितःसंसाराद्गताःसंतः
पुनर्भूयोजन्मदेहान्तरग्रहणंनाप्नुवन्तिनलभन्ते कीदृशंजन्मदुःखा
नामध्यात्मिकादीनांसंग्रहादिप्रकाराणांविस्तारतोनन्तभेदानामा
लयमाश्रयंतथाशाश्वतमवश्यमनुषक्तदेहेन्द्रियादिसर्वस्वविना
शमनात्मत्वात्मप्रमयनिबन्धनात्सर्वदुःखयोगिनाजन्मविनाशा।
दिविकारसंबन्धनावजीवानांसामान्यंपरमकारणमेकोत्मानंमा मा
महत्त्वयाप्रतिपन्नानोपुनरनेसंभवतीतितात्पर्यम [illegible]

[illegible]

[illegible] १५ ॥

नत्वसंतासौम्यन लासिकी [illegible] टीका दासंपन्नाभवतीतिश्रुतेः स्वभुपोसद्भावमापनोपि नथैवभगवद्भावमापन्नाश्चपिजन्मयान्तीतियंघांशुंकास्या तन्निराकरणेयसन्नभिः
यथा पुनः संसरति

ह॥ मामीश्वरंपरमस्वरूपगतिमुपेत्यशाप्याहमेवभूत्वेत्यर्थः योगिनःपु
नर्जन्मनन्तरंदुःखानामाध्यात्मिकादीनामालयंनत्राप्यस्थाश्वतम
नर्जन्मनन्तरंदुःखानामाध्यात्मिकादीनामालयंपुनरशाश्वतमनित्यं
तिमेदष्टनष्टप्रायंजन्मदेहपरिग्रहंनाप्नुवन्तिकृतइत्यतोहेतुग
मेविशेषणमाह महात्मानइति महान्व्यापकोहमेवात्मायेषां।
ते तदुक्तम् विततत्वाद्वतःकवासरणमिति ननुदेहस्यापरिग्रहे
किंस्वरूपाप्राप्यापवतिहत्वीत्यतआह परमामत्युत्कृष्टांसंसिद्धिंसर्वा।
त्मकत्वलक्षणांमदभेदसमापत्तिरूपांमोक्षाख्यांशमाः [illegible]

[illegible]

[illegible] १५ ॥

पंचोली टीका

भगवत्सोलभ्येनयद्भवतितदाह मामुपेत्येति महात्मनोयत

गी
अ॰टी॰

यः परमो प्रकृष्टां संसिद्धिं मोक्षाख्यां गताः प्राप्ता महात्मानो ईश्वरमु
पेत्य मद्भावमापद्य दुःखानामाध्यात्मिकादीनामालयमाश्र
यं अशाश्वतमनित्यं जन्म उत्पत्तिं पुनर्नाप्नुवंति १५ ॥

81

श्रणवीरसमिद्धोधिनी ॥

ननु देवतांतरभक्तो तत्तल्लोकादिप्राप्तेस्तत्तत्सुखमस्त्येवेति
कोविशेषो भवल्लाभे येन तान्परित्यज्य त्वाल्लिप्सा विधेयेत्याह
मामुपेत्येति संसिद्धिं प्रकृतीविमे स्वरूपं च स्वभावश्चेति कोशा
त्संसिद्धिशब्देन स्वभावो भिधीयते तथा च परमां संसिद्धिं परमां श
चुन्नीनंति हिंसंत्यनयेति व्युत्पत्त्या शुद्धात्मे प्रवर्तयित्री संसिद्धिं स्व
भावं गताः प्राप्ता महात्मानो निश्चयात्मकप्रज्ञातिशयशालिनो
तिगंभीरहृदया धैर्यातिशयवंतो निजवर्णाश्रमोचितकर्मविषय
यत्नादिकं कुर्वंतश्च मदर्तिसर्वातिशायिनि परमेश्वरपदवाच्याम
नीयेषामिति वा वैयधिकरण्ये पि पूर्वपदस्य छांदसत्वात् सांव
तादृशाः कर्मयोगिनो मामुपेत्य पुनः संसृत्व मरणे न क्वापि भूत्वा नि
सान्यायेन प्रज्ञाः सं रत्यराज्यसुखं वानुभूय यथाकाले प्राणत्या
गेन वा मत्सारूप्यं प्राप्य पुनर्जन्म पुनर्योनिसंक्रमणं नाप्नुवंति
न प्राप्नुवंति कीदृशं जन्म दुःखालयं दुःखानां निवासभूतं तथा
प्यशाश्वतमविरस्थायि प्रथमापादः देवतांतरलोकान्गोत्वा त
त्रत्यं सुखं वानुभूय पुनरपि जन्म प्राप्य दुःखमेवोपभुज्यते अत्यंत
त्सरलोविद्ययादमेव सर्वलोके प्यतोनित्यसुखदातावस दा
तव्य इति भावः १५ ॥

मधुभाष्य

मामिति परमां संसिद्धिं गताहि न इति तत्र हेतुः महात्मे कस्य ब्रह्म
सदनमारभ्य न पुनरावृत्तिः तथोक्तं नारायणे गापालक
प्रामेक ब्रह्मसदनाद्राजनान्नजनि भुवि तदाप्यभावः सर्वं
प्राप्येव वसुदेवजमिति मां प्राप्य न पुनरावृत्तिरितिस्यायथि

मव्यक्ताख्यात्मसामर्थ्यंदर्शयित्वंप्रलयादिदर्शयति ९५

82

भाषा अनुवाद टीका ॥

जो तुम स्वभक्त को ऐसे अनायास मिलते हो तो फेरि उसका क्या हो
ना है इस शङ्कापर कहते है कि पूर्वोक्त महात्मा लोग मेरी भक्ति से
मेरे को प्राप्त होय कर दुःख का भवन औ अनित्य जो जन्म तिस को फे
रि नहीं प्राप्त होते हैं क्यों कि वे परम सिद्धि को प्राप्त भये अर्थात् जी
वन्मुक्त होय जन्म मरण संसार दुःख से छूटि जाते हैं १५ ॥

दोहा

मोहि मिले फिर जन्म हि दुखगृह अस्थित कोय प्राप्त न होत
महात्म नर परम सिद्धिगत होय १५॥

८३

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मा
मुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते १६ ॥

शाङ्करभाष्यटीका

ये पुनर्मां न प्राप्नुवन्ति ते पुनरावर्तन्ते के पुनस्त्वत्तोऽन्यत् प्राप्ताः पुन
रावर्तन्त इत्युच्यते आब्रह्मेति आब्रह्मभुवनाद्भवन्ति यस्मिन् भूतानी
ति भुवनं ब्रह्मभुवनं ब्रह्मलोक इत्यर्थः आब्रह्मभुवनात् सह ब्रह्म
भुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अ
र्जुन मामेकमुपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते १६

आनन्दगिरिकृतटीका

भगवन्तमुपगतानामपुनरावृत्तौ ततो विमुखानामनुपजातसम्य
ग्धियां पुनरावृत्तिरर्थसिद्धेत्याह ये पुनरिति अपाम सोमममृता अ
भूमेति श्रुतेः स्वर्गादिगतानामपि समानैवानावृत्तिरिति आश
ङ्क्य ते के पुनरिति अर्थवादश्रुतौ कर्मिणामस्तत्वस्यापेक्षिक
त्वविवक्षितत्वात् परिहरति उच्यत इति यतेन भूरादिलोकचतुष्टय
प्रविष्टानां पुनरावृत्तावपि जनादिलोकत्रयं प्राप्तानामपुनरा
वृत्तिरिति विभागो निरस्तः प्रामाणिकत्वादेव हेयत्वमवधेयः न
हि तद्देवेष्वपि प्राप्तानामपि पुनरावृत्तिः शङ्क्यते तेन्याह मामि
ति यावत् संपातमुक्तिवदीश्वरं प्राप्तानां निवृत्ताविद्यानां पुनरा
वृत्तिरप्रामाणिकीत्यर्थः १६ ॥

के पुनरावृत्तिं दर्शयन् निर्धारयति ॥

तदेवं सर्वेषामपि लो स्वामिकृतटीका सर्वे लोकाः पुन नां
ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकः तमभिव्याप्य ... तत्रस्थानां क्षिणा
रावर्तनशीलाः ब्रह्मलोकस्यापि विनाशित्वात् तत्र ... एवं क्रमं मुक्ति
तत्रत्यानामनुत्पन्नज्ञानानां अवश्यम्भावि पुनर्जन्म येवमेवतत्रोत्पन्नज्ञाना
फलाभिरुपासनाभिः ब्रह्मलोकं प्राप्ताः तेषामेव

गी· टी· अ·

नां ब्रह्मणामहमोहो नान्येषां मामेप्रपद्यंते मानानां तु पुनर्जन्मनास्येवे
त्यर्थः। ननु च तत्पस्विनो दानशीला वीतरागास्तितिक्षवः त्रैलोक्याउप
रिस्थानं लभंते शोकवर्जितं मिथ्यादिगुणाणां वा केषां त्रैलोक्याः सकाशा
त् महर्लोकादीनामुत्कृष्टत्वं गम्यते विनाशित्वं च सर्वेषाम विशिष्टक
थमसौ विभागः स्यादित्याशंक्य बहुल्पकालावस्थायित्वनिमित्तः सो
विशेष इत्याशयेन स्वमानेन शतवर्षायुषा ब्रह्मणोहन्यहनि त्रिलो
क्या उत्पत्तिर्निशि निशि च लयो भवतीति दर्शयिष्यन् ब्रह्मणः अ
होरात्रयोः प्रमाणमाह १८ ॥

पिशाचभाष्यटीका [illegible] स्पष्टार्थं
१८

रामानुजभाष्यटीका

ऐश्वर्यगतिं प्राप्तानां भगवंतं प्राप्तानां च पुनरावृत्तावनावृत्तौ च हेतु
मनंतरमाह आ इति ब्रह्मलोकपर्यंता ब्रह्मलोकोदरवर्तिनः स
र्वे लोका भोगैश्वर्यादिरूपाः पुनरावर्तिनः नाशिनः अत ऐश्वर्य
गतिं प्राप्तानामपि पुनः स्यात् नाशित्वसंगाभावान् मां तु पुनर्जन्म न वि
द्यते १९ ॥

विनाशित्व सर्वजनीयं मांस
र्वं तु मृत्युसंकल्पनिखिलजग
त्युत्पत्तिस्थितिलयलीलं पर
मकारुणिकं सदेकरूपं प्राप्ता
नाम्वि +

अभिनवगुप्तकृतटीका

ब्रह्मलोकं प्राप्तानामपि पुनरावृत्तिरस्तीति सर्वैर्व्याख्यातं एतत्तु पगमे
वतदुपरितनलोकगतिर्मुक्तिरित्यभिहितं स्यात् तस्मान्न हृदयंगममिति
संशयमहामोहकलुषीकृतान्तर्दृशामस्माकं प्रतिभातीयमागमा
धिगतार्थव्याख्यावर्तिः आब्रह्मयावद्ब्रह्मपदप्राप्तं तावद्यस्मात्कस्मादि
त्तिर्यगूर्ध्वा यस्माद्भुवनात्पुनरावर्तन्ते चक्रवत्स्थानान्तरमविरतं भ्राम्य
न्तोविपरिवर्तन्त इति १९ ॥

परमार्थप्रपाटीका

अध्यायांतरमिद्धीशास्वनेमृत्वदेवदेहमये तत्प्राप्तानां पुनरावृत्ति
रस्तीत्याह आब्रह्मेति ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकस्तस्मा
भिव्याप्येलोका महर्लोकाद्या अपि पुनरावर्तिनो भवंति ननु त
पस्विनो दानशीला वीतरागास्तितिक्षवः त्रिलोक्या उपरिस्थाने

ल..भंने शोकवर्जितमिति पुराणेष्वाकृत्वा त्वकर्णमुक्तं पुनरावर्तिरिति त
प्रोच्यते सुखेन चिरकालं जीवितमपेक्ष्यसामवेदोक्तं बहुदर्शनं वेदरूप
वैराजशाकुरैवेवनैापसकालेयाघरसामान्मिकामासंटीमस्तोमा
महतोऽस्य च मुपास्य साम्राज्य भौज्य स्वराज्यादिक्रमेण पारमेष्ठ्यं सा
स्मलोके प्राप्तास्येप्याप्युरहोरात्रनिद्रामार्गणादिलौकिकव्यवहारवत्वा
सुश्रावतं न एवं श्रु..तिरपि ध्यानपश्चो योगापतदक्षरमविदित्वा
गार्ग्यस्मिन्लोके जुहोति ददाति तपस्तप्यपि बहूनि वर्षसहस्राण्य
न्तवानेवास्य स लोको भवतीति भाष्यं अत्र वाचक्नवीं प्रति याज्ञव
ल्क्यो वदति भो गार्गि गार्गि कन्ये वाचक्नवि यः पुरुष एतदनुभूयमाने
क्षरं परं ब्रह्म अविदित्वा अज्ञात्वाऽस्मिन्लोके जुहोति यागं करोति दा
दाति तलाभोरमान तपस्यति कृच्छ्रचान्द्रायणादिना एवं च लोकार्थमे
न्तवान्नु प्रायः स लोकोऽस्य पुरुषस्य बहून्यनेकानि वर्षसहस्राण्येव
मानोऽपि अन्तवानेव पुनरावर्तनाय भवति अथोक्तप्रमेयप्रतिपादके
त्रैकशीर्षीयं ब्राह्मणं च अथातः ऐन्द्रो महाभिषेकस्ते देवा अब्रुवन् स
प्रजापतिकाश्यपं वै देवानामित्यादि तथापस्तम्भसंहितास्वपि स
पर्णो सिगरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुरित्यादि ग्रन्थविस्तरभ
या न लिखितं शतश्लोकभाष्ये स्वामिभिः सविस्तरं प्रोक्तमस्ति अथ
येवोऽस्यन्नतत्वज्ञानिनस्तेऽमृतत्वं प्राप्य विस्मृतसकलव्यवहाराः
संसरणाबीजभूतजीवत्वं परिहाय ब्रह्मरूपास्तेषां पुनर्जन्मनाः
स्तीत्याह मामुपेत्येति तथा च विस्मृतदिनरात्र्यादिसकलव्यव
हारत्वमेवमत्वा ...त्रिव्यजके श्रुतिरपि समपश्यामेवं विलयउद
के प्रास्तउदकमेवानुविलीयेतनाहास्योद्ग्रहणायैव स्यादिति तथा
ननस्य प्राणाउत्क्रामन्त्यत्रैव समवलीयन्त इति ॥८॥

वनमाली टीका ॥

समकामस्यागमेवदर्शनहीना
मुक्ता
भवावैतेश्रामानांक्षस्तलिंगात्वादपुनरावृत्तिमुक्तासम्यगभेवदर्शनहीना
नामनपवनदश्रामानांसम्यलोकंगतानामपिलिंगदेहस्यसत्वेनपुनरावृ
त्तिर्भवतीत्याह आब्रह्मेति भवं स्मत्रभूतानीतिभुवनं लोकः आब्रह्मभुवना

गी
टी॰
८५

दित्यत्राभिविधावाकारः ब्रह्मलोकेन सह सर्वेपि लोका सम्यक्क्रमदर्शनश्र
माद्दीनानां सम्यगनुष्ठितब्रह्मचर्यसंन्यासादीनां भोगार्थाः ब्रह्मभवना
दितिपाठे भवनं वासस्थानमिति सएवार्थः मां सर्वेश्वरमशक्तृत्वैभवमु
पेत्य प्राप्य पुनर्जन्म न विद्यते मामुपेत्यत्वक्रमपुनरुक्तिर्दार्ढ्यार्थः अ
र्चिरादिमार्गेण गतानां ज्ञातव्यापकब्रह्मापरोक्षाणां ब्रह्मलोके गताना
मपि तत्रोत्पन्नमेव मुक्तिर्न तत्र चावस्थाने परिच्छिन्नतया श्रुतिः दह
पासकानां ब्रह्मलोके वस्थाने भोगान्ते च मुक्तिः भक्तिं विना केवलं न्या
सादिनैव गतानां पुनरावृत्तिरिति विवेकः १६

अथ भगवैजयन्ती टीका

नन्वेवं भक्तिज्ञानवर्जिताः सकामास्तेषां का गतिः स्यादित्यपेक्षायामाह
आब्रह्मभुवनादिति हेऽर्जुन आब्रह्मभुवनात् इति आकारोऽभिविधौ
ब्रह्मणो भवतं भुवं यस्य भवनं तस्य लोकमभिव्याप्य आब्रह्मभुवनं तस्मात्
याः लोकाः सपाला स्वयस्त्वगीदयः सर्वे पुनरावर्तिनः हि प्रसिद्धं सत्य
लोकादीनि भूलोकपर्यन्तानि स्थानानि विनाशं यान्ति तद्वर्तिनो
जीवाः स्वपुण्यकर्मभोगक्षये सति पुनः पृथिव्यां जन्म प्राप्नुवन्ति तत्रा
पेक्ष भगवद्भक्ता सान्निते तत्र लोकजनित पुण्यकर्मोद्भवसुखभोगभुक्ता
न्तावसानेन तल्लोकपालैः ब्रह्मादिभिः साकं विस्तलोके प्राप्नुवन्ति तस्या
शयः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रवि
शन्ति परं पदमिति स्मृतेः हे कौन्तेय कुन्तीपुत्र त्वं नेन यतो मद्भक्तिं युक्ता
सीति सूचितम् तु पुनः ये सर्वेशाकृतविषयं हित्वा मां सर्वकारणं स
र्वोपि पति सर्वेश्वरं सर्वात्मानमुपेत्य प्राप्य ब्रह्मलोकादि भूलोकान्त
सकलब्रह्माण्डं निरयतुल्यं मन्यमानाः मदर्पितात्मानो मत्कीयभक्ता मा वि
नात्मधारणेप्यसमर्थाः मत्प्रियास्तेषां पुनर्जन्म पुनरावृत्तिर्न विद्यते
न भवति १६ ॥

भगवंतमुपागतानां स
ततो विश्वानामसम्भ
मधुसूदनी टीका
मार्गदर्शिनामपुनरावृत्तिः कथिता यां
गदर्शिनां पुन रा हत्तिरर्थसि
द्धेत्याह ॥ आब्रह्मभुवनात् भवंत्यस्मिन् भूतानीति भुवनं लोकः आभिविधावाकारः

ब्रह्मणः भुवनं ब्रह्मभुवनं
ब्रह्मभुवनादाइति आब्रह्म
भुवनं तस्मात्

ब्रह्मलोकेन सह सर्वेपि लोका मद्विमुखानामसम्यग्दर्शिनां भोगभूमयः पु
नरावर्तिनः पुनरावर्तनशीलाः ब्रह्मभवनादिति पाठे भवन्त्यस्मिन्निति
सप्तम्यर्थः हेअर्जुन स्वतः प्रसिद्धमहापुरुषकिं तद्देवत्वोपासनामपि पु
नरावृत्तिर्नेत्याह मामीश्वरमेकमुपेत्य तु शब्दो लोकान्तरैवेत्तपयोत
न्नार्थः अवधारणार्थो वा तु शब्दः मामेव प्राप्य निर्ह न्यानादे कौन्तेय मात्र
तोपि प्रसिद्धमहानुभाव पुनर्जन्म न विद्यते पुनरावृत्तिर्नास्तीत्यर्थः अत्रा
र्गेन कौन्तेयेति संबोधनद्वयेन स्वरूपतः कारणतश्च शुद्धिशालिन संपन्नतया
त्वविता अत्रेयं व्यवस्था ये क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकं
प्राप्तास्तेषामेव तत्रोत्पन्नसम्यग्दर्शनानां ब्रह्मणा सह मोक्षः ये त्वपंचाग्नि
विद्यादिभिरतत्क्रतवोपि तत्र गताः तेषामवश्यंभावि पुनर्जन्म अतएव
वक्रममुक्त्यभिप्रायेण ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते अनावृत्तिः
शब्दादिति श्रुतिसूत्रयोरुपपत्तिः इतरत्र तेषामिह न पुनरावृत्तिरिमं
मानवमावर्तं नावर्तन्ते इति इहेममिति च विशेषणात् क्रमेणाधिकरणक
ल्पात्मत्र पुनरावृत्तिः प्रतीयते [illegible]
[illegible] १६ ॥

सदानंदी टीका ॥

भगवंतं गतानां च सम्यग्ज्ञानवतां च नृणां मुक्तिस्तद्विमुखानां तु पुनराह
त्तिरुच्यते ब्रह्मलोकेन सहिता लोका ये भोगभूमयः असम्यग्दर्शिनां ते
तिपुनरावर्तिनो विलाः कर्मभिर्निर्मितानो हि स्थायिनः नास्ति कर्हिचि
त् कर्मभिर्निर्मितास्ते च ब्रह्मलोकादयो विलाः मामनंतपदं प्राप्य पुनरा
वृत्तिवर्जिते न विद्यते पुनर्जन्म पुनरावृत्तिलक्षणं १६ ॥

नीलकंठी टीका ॥

त्वल्लाभेपि किं स्यादत आह आब्रह्मेति आब्रह्मभुवनात् ब्रह्मलोकमभि
व्याप्य ब्रह्मलोकेन सहैव सर्वे लोकाः पुनरावर्तिनः पुनरावृत्तिस्वभा
वाः हेअर्जुन शेषं स्पष्टं अत्रेयं व्यवस्था ये क्रममुक्तिफलाभिर्दहरादि
विद्याभिः ब्रह्मलोकं गतास्ते तत्रैव ज्ञानं प्राप्य ब्रह्मणा सह मुच्यन्ते ये तु पं
चाग्निविद्याभिर्ब्रह्मलोकं गतास्तेऽनुपासितपरमेश्वराः पुनरावर्तन्ते
इति १६ ॥

गी.
टी.
प्र.
८६

आनन्दीटीका

ब्रह्मणः षट्त्रिंशकस्य महाविष्णोर्भवनं तेन सहैकरूपतापत्तिस्तामर
ण्यतस्मात् आनन्त्यपर्यन्तम् यावत्तोपायप्रमयेन निर्बीजसमाधिनाख्या
तिरूपेणोकैवल्यमाप्यते तावत् लोकाः लोक्यन्तेह प्राप्यन्ते चन्तर्विंशतत्त्व
मेवानापेक्षिणः जीवाः पुनरावर्तिनः पुनर्जायन्ते म्रियन्ते च मामुपेत्य
पुनर्नोत्पद्यन्ते विवेकख्यात्यामासक्तीभूय शेषतकवदवस्थिता नामपवर्गो
भवतीत्यर्थः तथा चोक्तं ताभ्यां नैवापवर्गो विपर्ययाद्विष्यते बन्धइति
प्रत्यर्थः तावदेव प्रकृतिर्भोगमारभते यावत्र विवेका ख्यातिः विवे
कख्यातिमाचयतीति विपर्ययात् मन्यतानाभावाद्बन्धः स च त्रिविधः
प्राकृतिको वैकृतिको दाक्षिणश्चेतत्र येषां प्रकृतावेवात्मबुद्धिस्तेषां
प्राकृतिकोबन्धः तेषामेषां युगसहस्रमव्यक्तेस्थित्वा पुनरावर्तन्ते वैकृ
तिकोबन्धस्तु तेषां ये देहकाराद्वीनेव पुरुषत्वेन जानन्ति ते हि दशमन्व
भिमानिकाः भौतिकास्तु शतं पूर्णं सहस्रं त्वा
तोसाख्यानेनानुशासनेन पुरुषतत्त्वानभिज्ञाः इतीमय योगि
नरावर्तन्तेश्चर्थः तथा च विश्वधर्मे भवन्तं प्रतिमार्कण्डेयः प्रथमे
पुषापरिच्छिन्नः पौरुषादिवसः स्मृतः सर्वं ब्रह्मा जीवतियावद्ब्रह्मा
गत्यतिः सर्वं विधिसर्वेत्तपद्यापूर्वमुदाहृतम्

इति कारणं संभवतीत्याह ॥

एवं यथोक्तनयेन मन्त्रमाश्रय रामकंटीटीका णमेकं उपायं वर्जयित्वा नान्यत्किंचिदुपाय
परमप्रकृष्टतपो यज्ञदानादि पुण्यकर्म प्राप्य
लमवधिकृत्वा यानि कानि चित्पुण्यकर्माप्याब्रह्मणः प्रजापतेर्लोक
वन्ति ते पुण्यलोकास्ते तत्क्रियानुष्ठानत्वालब्धा पुनरपि जना लोकान्तराणि सम
न
मापुनर्यथोक्तसानिमेलभक्तिमाद्रेकोपायगम्यपरब्रह्मस्वरूपं परमेश्व
रमुपस्यताहात्म्यप्रतिपत्तिपर्यन्तमाश्रित्य पुनर्जन्मसंसारभ्रमादुन्मति
तेविघ्नतयैव मामुपेत्य भयानजापन्नाः इत्युपायजननक्रियायोरकर्म
रेकत्वमवगन्तव्यम

[illegible] १९ ॥

नन्नुशास्त्रेषुब्रह्मलोकस्य ... लासिकी [illegible] टीका र्थोपरिगणिता सोलोकंसामी प्यंसार्ष्टिता सायुज्य
मितिसा ... इत्याशंक्य सायुज्यमेव तद्वदतीत्यदि

त्याह॥—ब्रह्मलोकग्रहणेनविरिंचिलोकायुपलक्षणार्थम् आब्रह्मभुवनाद्ब्र
ह्मलोकादीनभिव्याप्य आब्रह्मपावदब्रह्मपदेशात्मनमितिवा यस्मात्क
स्मात्त्रिविधेगृहीधायस्तादृक्त्वासत्याग्निविद्यादिभिरानवगन्तव
लत्रगताश्चपिलोकाद्युपधिकारिणोजनाः क्रियाणामन्तवत्वात्पुनरा
वर्तिनोभूयोभूयश्चक्रवत्भ्रमिनिश्चमन्तो भवन्तित्तर्हिकिंत्रयस्यैवे
तएवअवधारणेवा मामीश्वरमुपेत्यसयासहशुक्तात्मत्वेजन्मशरी
रपरिग्रहो नविद्यते [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १९ ॥

"नप्रतिपद्यसतोयोगिनः हे कौन्तेय पुनपुनरुत्पननं"

पंचोली टीका

सर्वेभ्योलोकेभ्यः पुनरावृत्तिं दर्शयन्नमेवार्थंद्रढयति आब्र
ह्मेति हेअर्जुनसर्वेलोकाः आब्रह्मभवनात् सहब्रह्मभवेनन
पुनरावर्तिनः पुनरावर्तनस्वभावाः तुपुनः हेकौंतेयमामेक
मुपेत्यपुनर्जन्मपुनः उत्पत्तिर्नविद्यते १९॥

श्रणवीरसमसिद्धोधिनी॥

मत्प्राप्तिरेवापुनरावृत्तेरुपायोनान्यत्किंविदितिप्रतिपिपादयिषु
रुक्तमेवार्थं द्रढयति आब्रह्मभुवनादिति ब्रह्मणोभुवनेवासस्था
नं ब्रह्मभुवनंब्रह्मलोकः प्रकृष्टतपोयज्ञदानादिपुण्यकर्मप्राप्य
स्तमवधिंकृत्वायानिकानिचित्पुण्यकर्मप्राप्याणिलोकांतराणिसं
भवन्तितेपुस्थितायेलोकाजनास्तेपुनरावर्तिनोभवंति तत्तल्लोक
प्राप्त्युपायभूतानांतत्तत्कर्मणामंतवत्त्वात् अतएवोक्तंप्राकअंत
वत्तुफलंतेषांतद्भवत्यल्पमेधसामिति मांपुनरुपेत्यस्ववर्ण॰

श्रमोवितेनकर्मणामनुष्ठानंबलव्यापुनर्जन्मभूयः संसारभू
मावुत्पत्तिर्नविद्यतेनप्राप्यतेकर्माधिकारिभिः कर्मयोगिभिरि
तिभावः विठ्ठलाभेअन्यस्यकर्मणितद्धि· विद्यतेइतिरूपं तथाव्या
ख्यानेनैवमद्रुपायपुनर्जन्मलाभक्रिययोरेककर्तृकत्वात्काम
न्ययसमीचीनता यद्वा नविद्यते नास्त्येव मामुपेत्यभूयोनजायं
तइत्युपायजननाक्रिययोरेककर्तृकत्वमथावगंतव्यं १८॥

मधुभाष्य

१८॥

भाषा अनुवाद टीका ॥

इस तरह और और लोक मे भी उन भक्तों को पुनर्जन्म का अभाव
देखाय कर अनन्तर आवृत्ति निर्धारण करते है कि हे अर्जुन ब्रह्मा
के लोक पर्यन्त प्राप्त होके भी प्राणी पुनर्वार संसारगामी होते है
क्यो कि ब्रह्मलोक का भी एक दिन नाश है और क्रम मुक्ति जो
कहा है सो किसी विरले को उपासना के द्वारा ब्रह्मलोक मे जा
य ज्ञान प्राप्त होय ब्रह्मा के साथ मुक्ति मिलती है परन्तु हे कौ
न्तेय मद्रूप को प्राप्त मेरे भक्त का पुनर्जन्म तो नही होता है १६

दोहा

ब्रह्मभुवन लों लोक फिर अर्जुन जन्महिं देत मोहिमिल
हि जो कौंतिसुत सो फिर जन्म न लेत १६॥

88

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः रात्रिंयुग
सहस्रान्तां तेऽहोरात्रविदो जनाः १७ ॥

शाङ्करभाष्यटीका

ब्रह्मलोकसहिता लोकाः कस्मात् पुनरावर्तिनः कालपरिच्छिन्न
त्वात् कथं सहस्रेति सहस्रयुगपर्यन्तं सहस्राणि युगानि पर्यन्तो
पर्यवसानं यस्याह्नस्तदहः सहस्रयुगपर्यन्तं ब्रह्मणः प्रजापतेः विरा
जो विदुः रात्रिमपि युगसहस्रामहःपरिमाणामेव के विदुरित्याह
तेऽहोरात्रविदः कालसंख्याविदो जना इत्यर्थः १७ ॥

आनन्दगिरिकृतटीका

यस्य स्वाभाविकी देशप्रयुक्ता व ब्रह्मलोकस्यैवार्थे बुद्धिरुदेतीति म
त्वा सद्बुद्धिरयं ब्रह्मलोकसहितानां पुनरावृत्तौ हेतुः प्रश्नद्वारा दर्शा
यति ब्रह्मेति उत्तमे हेतुमाकाङ्क्षापूर्वकमुत्तरश्लोकेन साधयति
कथमित्यादिना यथोक्ताहोरात्रावयवमासर्त्वयनसंवत्सरावयवं श
तसंख्यापुरवच्छिन्नत्वात् प्रजापतेस्तदन्तर्वर्तिनामपि लोकानाय
थायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्यभिप्रेत्याचष्टे सहस्रे
त्यादिना १७ ॥

स्वामिकृतटीका

सहस्रयुगानि पर्यन्तोऽवसानं यस्य तद्ब्रह्मण एव यदहस्तद्ये विदुः यु
गसहस्रमन्तो यस्याः तां रात्रिं च योगबलेन ये विदुः त एव सर्वज्ञा
जनाः अहोरात्रविदः येषां तु केवलं चन्द्रार्कगत्यैव ज्ञानं ते तथाहोरात्र
विदो न भवन्ति अल्पदर्शित्वात् युगशब्दोऽत्र चतुर्युगमभिप्रेत्य चतुर्यु
गसहस्रं तु ब्रह्मणो दिनमुच्यत इति पुराणोक्तेः ब्रह्मण इति च महर्लो
कादिवासिनां अप्युपलक्षणार्थं तत्राय कालगणनाप्रकारः मनुष्या
णामयनं देवानामहोरात्रं तादृशैरहोरात्रैः पक्षमासादिकल्पनया

गी द्वादशभिर्वर्षसहस्रैश्चतुर्युगं भवति चतुर्युगसहस्रं च ब्रह्मणो दिनं ताव
टी-अ. त्परिमाणैव रात्रिः तादृशैरहोरात्रैः पक्षमासादिक्रमेण वर्षशतं ब्रह्म
णः परमायुरिति [illegible] १७ ॥

पिशाचभाष्यटीका

८९ सहस्रयुगपर्यंतं युगसहस्रप्रमाणं ब्रह्मणो यदहस्तैर्युगसहस्रप्रमाणं
विदुः ब्रह्मणो रात्रिमपि युगसहस्रान्तं अहोरात्रविदो जनाः ज्ञानिनः
एवं विदुः ७ ॥

रामानुजभाष्यटीका

ब्रह्मलोकपर्यंतानां लोकानां तदंतर्वर्तिनां च परमपुरुषसंकल्पकृतानां
स्थितिविनाशकालव्यवस्थामाह सहस्रमिति ये मनुष्यादिचतुर्मुखान्तानां
मितसंकल्पकृतामहोरात्रव्यवस्थां विदुस्ते जनाः ब्रह्मणश्चतुर्मुखस्य
दहः सहस्रमिति चतुर्युगसहस्रावसानं विदुः रात्रिं च तथारूपां ७ ॥

अभिनवगुप्तकृतटीका

ननु कथमेवं ज्ञायते यत्सर्वभुवनेभ्यः पुनरावृत्तिर्ब्रह्मलोकादय एव स्तावच्चिर
तरस्थायिनः श्रूयन्ते तदेवं तावत्कथं पुनरावर्तिनः पुनरावृत्तिर्विहितैव चि
रस्थः प्रभवाप्ययधर्मीण इत्याह ॥ १७ ॥ सहस्रेति त्रिभिः स्पष्टार्थम्

परमार्थप्रपा टीका ॥

अथ सत्यलोकव्यवहारमाह सहस्रेति यदहर्ब्रह्मणो यस्य ब्रह्मणः सह
स्रयुगानि पर्यंतोऽवसानं यस्यैवंविधमहः दिनं विदुः तथैव युगसहस्रा
न्तां रात्रिं विदुः एवमहोरात्रे सोपपत्तिकत्वेन ये विदुस्ते जना अहोरात्र
विदः वेदेऽपि सहस्रयुगपर्यंतमहर्ब्रह्मणो यदुच्यत इति अथ मध्ये
सं. कृतत्रेताद्वापरकलिसंज्ञकैश्चतुर्भिश्चरणैरेकैकं महायुगं तानि सह
स्रमितानि ब्रह्मणो दिनं तावत्येव रात्रिः तत्र सूर्यदर्शनादर्शननिमि
त्तत्वात् तत्रत्याः सहस्रयुगपर्यंतं सूर्यं पश्यन्ति तावदेव तेषां जाग
रद्वस्था अनंतरं तावत्कालमेव तेषां सुषुप्तिस्तत्र न पश्यन्ति उक्तं च

यदन्ति दूरगतो तु हिमांशुः क्षितेः सततमाश्रलयं रविमीक्षते भवति तावदयं
शयितस्य तद्युगसहस्रयुगं तु निशाविपर्ययेरीति एवं मेरुशिरस्थितानां देवा
नां सौरवर्षमितमहोरात्रं पितॄणां तु चान्द्रमासेन मितं तथा लंकायमको
टिसिद्धपुरस्थितानां नित्यं त्रिंशद्घटीतुल्यं दिनं तावत्येव रात्रिः एवमेतेषु दे
त्यं चरकालाभावाद्दिनरात्र्योः समत्वं इतरदेशेषु चावशाद्दिनरात्र्योर्ह्रास स्प८
वृद्धी भवेतां तेन प्रतिदेशं भिन्नाहोरात्रव्यवस्था एवं यावत् षष्टिमिताक्ष
लोशाक्षतविंशतिमिता लंबांशा भवन्ति तेनानन्तरं वरादिव्यवहाराभावः स्प
स्प क्रान्तिरपि त्वेवं ऋषये त्वह... भ्यं मन्यते इति विश्वरूपेऽयमहनीसंचरेत परिस्थि
तोऽस्त्वेमागुहायुरयो ह्यभाः शेषाश्चत्वारश्चेनेति भाष्यं विश्वरूपेवहुरूपेऽय
तोऽस्मिन्नहोरात्रे संचरेत स्वव्यवस्थानेनचरत अहस्य कस्य महर्ग्रन्थेनैवम्फ
स्नीग्रहोरात्रं संचरेत स्वस्वव्यवस्थानेन चरत अहस्य कस्य महर्गते नैवम्फ
त्वात् उभयोरहः शब्दवाच्यत्वं तयोर्मध्ये अन्यद्वादित्यमहः अयेति प्रति
लोमं गच्छति अन्यद्दिवाख्यमहः अश्येति आभिमुख्येनागच्छति परिच्छि
त्वोः पर्यायेणानिवसतोः प्राणिनामायुः क्षयपतोर्वा तयोरन्यारात्रिस्तमस
तोऽनाख्यागुहायदार्थं गूहनं करोति अन्या ऊः शेषाश्चत्वारोऽभमानेन रश्चेन
अयोत प्रकाशयति एवं पितृदेवसत्यलोकादिषु स्वस्वाहोरात्रपरिभाष
यामासवर्षादिकल्पनापि तथा च स्वस्ववर्षपरिभाषया ब्रह्मणः शतवर्षमा
युः स महाकल्पः तदुक्तं शतायुः शतानंद एवं प्रदिष्टस्तदायुर्महाकल्पह
त्कक्रमाद्येः यतो नादिमानेषकालस्ततोऽहं न वेद्यानुपद्मोद्भवायेगतास्ता
न इत्यादिमनसि धृत्वोक्तं पुनरावर्तिनः इति तथा अहोरात्रविदः इत्यनेन म
हाकल्पावान्तरकल्पमनुयुगचरणशाकवर्षायनर्तुमासपक्षाहोरात्रया
मनाडीविनाडीप्राणत्रुट्यादिकालावयवाभिज्ञत्वेन गोलतत्त्वं रहस्यं ले १७

वनमाली टीका ॥

ब्रह्मलोकेन सह सर्वे लोकाः पुनरावर्तिनः कालपरिच्छिन्नत्वादित्याह सहस्रे
ति सहस्रं युगानि चतुर्युगानि ... पर्यन्तो वसानं यस्य तत् चतुर्युग
सहस्रं तु ब्रह्मणो दिनमुच्यत इति पुराणवचनं तादृशं ब्रह्मणः प्राजापतेर
हर्दिनं ये विदुस्तथा रात्रिं युगसहस्रान्तां चतुर्युगसहस्रपर्यन्तां विदुरित्यन्व
र्त्ततेऽहोरात्रविदः त एवाहोरात्रविदो योगिनो जनाः येन चन्द्रार्कगत्यैव
विदुर्न तेऽहोरात्रविदः स्वल्पदर्शित्वादित्याशयः १७ ॥

गी० टी० अ०

९०

अमरभैवजयन्ती टीका

ननु कुतो हेतोरा ब्रह्मभुवनाल्लोकाः पुनरावर्तिनः स्युरथ च तेषां पुनरावृ।
त्तिं के जानंतीत्यपेक्षायां तेषामहोरात्रादिप्रमाणेनार्थद्वारा कालपरिछिन्न
रूपं हेतं तज्ज्ञानार्थं चाह सहस्रयुगपर्यंतमिति महाजनतपः सत्यलोक
निवासिनो ये जनाः ब्रह्मणः अन्तर्गतस्य सहस्रयुगपर्यंतं सूर्यगमना।
सावेण परमाणुद्व्यणुकत्र्यणुकलवघटीयामदिनपक्षमासादिक्रमे
ण मनुष्याणां यद्वर्षं तद्देवानामहोरात्रं ताहशैर्देवानामहोरात्रैः पक्ष
मासादिगणनया द्वादशभिर्वर्षसहस्रैश्चतुर्युगं चतुर्युगानां सहस्रं सह
स्रयुगं तस्य पर्यन्तं परिमितं यदहो दिनं तद्विदुर्जानंति तथा तद्देवदिवसा
दिक्रमेण युगसहस्रं चतुर्युगसहस्रपरिमितां तां ब्रह्मसंबंधिनीं रात्रिं
विदुस्त एव जना अहोरात्रविदो दिनरात्रिज्ञातारो न त्वन्ये सोमसूर्यादि
गतिमात्रविदो ब्रह्मणः सहस्रयुगपरिमिताहोरात्रत्वाद्धेतोस्तल्लोकः
त्वपि स्युरित्येवं सत्वा ब्रह्मा तल्लोकस्यातज्जनानां पतनभयात्तत्र परस्व
तन्त्रा न भवंतीति भावः १७॥

ब्रह्मलोकसहिताः सर्वे **मधुसूदनी टीका** लोकाः पुनरावर्तिनः कस्मात्कालपरि
छिन्नत्वादित्याह॥ मनुष्यपरिमाणेन सहस्रयुगपर्यंतं सहस्रं युगानि चतुर्युगानि पर्यंतो
वसानं यस्य तत् चतुर्युगसहस्रांतं ब्रह्मणो दिनमुच्यते इति हि पौराणिक
वचनं ताहशं ब्रह्मणः प्रजापतेरहर्दिनं ये विदुः तथा रात्रिं युगसह
स्रांतां चतुर्युगसहस्रपर्यंतां ये विदुरित्यनुवर्तते तेऽहोरात्रविदः तएवा
होरात्रविदो योगिनः जनाः ये तु चन्द्रार्कगत्यैव विदुः ते नाहोरात्रविदः
स्वल्पदर्शित्वादित्यभिप्रायः

१७॥

सदानंदी टीका ॥

लोकाः कालपरिछिन्नतया सर्वे विनश्वराः मत्प्राप्तिव्यतिरेकेण सत्वं त्वेतेषा
हमायवः सहस्राणि युगान्येव मस्य पर्यवसानकं तदहर्दिनं ब्रह्मणः सह
स्रावतीं रात्रिं विदुस्ते प्रजापतेर्दिनरात्रिं विदुर्ये योगिनो जना अहोरा
त्रविदस्ते स्युर्नेतरे स्वल्पदर्शिनः १७॥

नीलकंठीटीका

आहुतिभाजां कालपरिच्छेदमाह सहस्रेति युगशब्दोऽत्र चतुर्युग
पर्यायः चतुर्युगसहस्रं तद्ब्रह्मणो दिनमुच्यत इति पुराणांतरद
र्शनात् सहस्रं चतुर्युगानि पर्यंतोऽवसानं यस्य चतुर्युगसहस्रं ब्र
ह्मणो दिनं रात्रिरपि तावतीमाह रात्रिमिति अत्रापि चतुर्युगस
हस्रांतां ब्रह्मणो भवति तां चतुर्युगसहस्रांतां ते प्रसिद्धा अहोरात्रविदो
जना विदुः १७ ॥

आनन्दीटीका

एतदेव प्रपंचयति ॥
दिव्यया संख्यया चतुर्युगानां सहस्रं पर्यन्तोऽवधिर्यस्य ९ ॥

अथ कथं ब्रह्मलोकं वासिनो **रामकंठीटीका** पि पुनरावर्तन्ते न पुनर्मत्प्राप्ता इत्यत्र क्रमेण कारण
हा॥ ये नागरस्थमर्त्या अवस्थाहेतुभूतसूर्योदयास्तमयोपलक्षितमेव का
लविशेषमहोरात्रतया मन्यन्ते न ते तत्त्वतोऽहोरात्रस्वरूपज्ञाः ये
तु ब्रह्मणः प्रजापतेर्दिव्यसंख्यया चतुर्युगसहस्रपर्यन्तमवधिर्यं
स्य तावत्प्रमाणमहर्वासरं विदुर्जानंति तेनावमरिमाणमेव रात्रिं
तेऽहोरात्रविदः किमनेनोक्तं भवति यथा मर्त्यानां नाति
कायुष्यवच्छिन्नः कालोऽहोरात्रः न तथा ब्रह्मलोकवासिनां चतुर्युगस
हस्रायावच्छिन्नः कालोऽहोरात्रः ततश्च यथा मर्त्याः स्वाहोरात्रसंख्य
याकलितवर्षशतं पुरुषायुषमतिवाह्य पुनर्देहान्तरं भजन्ते नैव
मवस्था तथा ब्रह्मलोकवासिनोऽपि स्वीयपरिमाणावच्छिन्नाहो
रात्रकलनया वर्षशतं पुरुषायुषमतिवाह्य पुनर्देहान्तरं भजन्ते इ
ति कर्मभूमिभाजां मर्त्यानां ब्रह्मलोकवासिनां च पुण्यकर्मणा महो
रात्रादेः पुरुषायुषपर्यन्तस्य कालस्य ह्रस्वदैर्घ्यकृतो विशेषः न तु
संसारित्वे तेषां कश्चिद्विशेषः ततो यथा मर्त्याः पुनरावर्तन्ते तथा ब्र
ह्मलोकान्तरवासिनोऽपि स्वकालपरिमाणेन पुरुषायुषमतिवाह्य
पुनरावर्तन्ते इमा ब्रह्मभुवनाल्लोकाः पुनरावर्तिनः इत्युक्तं तेन द
मवत्तास्पर्यम् यथोक्तं तावत्पुण्यक्रियाविशेषानुष्ठानलभ्यका
लावच्छेदवद्भोगाधिकरणो ब्रह्मलोकादौ विवेकिना न स्थेयो।

गी॰
टी॰
अ॰

स्याविमलबोधेनभवितव्यं सोपि विशिष्टज्ञानमात्रभोगसंबन्धात्संसा
रेपवयुगसहस्रपरिमाणमपि काललेशमन्तवत्तामर्त्यो होरात्रा
तिरिच्यते इति यथोक्तं युगसहस्रद्वयपरिमाणं कालमहोरात्रत्वेन
ये मन्यन्ते ते होरात्रविदो जना इत्युक्तं [illegible]
[illegible]
[illegible] ॥ १७ ॥

नन्वथं सायुज्यस्य स्यकालपरिच्छिन्नत्वा लासिकी [illegible]गमी टीका

*चतुर्युगानि

वस्तुकित्वं नान्यस्येत्याः छिन्नाश्चावच्छिन्नत्वम्

सायुज्यरूपस्य मद्भावस्यान्यस्य नत्वमुक्तिभाव्याधारोपच्छिन्नतर कालस्याधिनो ये तिनेषां कालपरिच्छेदमाह ॥ +

मनुष्यकालपरिमाणेन सहस्रं युगानि* पर्यन्तो वसानं यस्य तन्मा
हः शंयद्ब्रह्मणोयदहस्तद्ये विदुः प्रमाणेनावधारयन्ति तथा ब्रह्म
णोरात्रिं चतुर्युगसहस्रपर्यन्तां ये विदुस्ते जना अहोरात्रविदः नान्ये
स्वल्पदर्शिनो नालिकाषष्ठ्यवच्छिन्नकालस्याहोरात्रविदः तथा च
वमनुः चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते तत्रैकं भवति ब्रह्म
लोकादि भुवनवासिनामपि स्वल्पपरिमाणेन कालावच्छिन्नतया
निर्देशः अतएवम् आब्रह्मभुवनाल्लोकाः पुनरावर्तिन इति हाद्
शाभिर्दिव्यैर्वर्षसहस्रैश्चतुर्युगं भवतीमत्रमहाभारतम् चत्वा
रः सहस्राणि वर्षाणि तत्कृतयुगम् अस्यतावच्छती सन्ध्या सन्ध्या
ंशश्च तथाविधः[1] तथा वर्षसहस्रे द्वे द्वापरे परिमाणतः तस्यापि द्विशती
सन्ध्या सन्ध्यांशश्च तथापरः सहस्रमेकं वर्षाणां तथा कलियुगस्य
तम् तस्य वर्षशतं सन्धिः सन्ध्यांशश्च तथापरः सन्धिसन्ध्यंशयोर्य
संप्रमाणमुपधारयेति अथ ब्रह्मणो दिनमानं प्रदर्श्यते उदाह
णेन तत्र चतुर्युगपरिमाणं पाश्चैकेन सिद्धान्तशिरोमणौ खख
भ्रदन्तसागरा इत्यादिनोक्तम् खखाभ्रदन्तसागराः ४३२०००० ।
सौरमानेन वत्सराश्च तैर्भिर्गुणिताः १२८००० कृतं नाम प्र
मोयुगचरणः एवं खखाभ्रदन्तसागरा द्विभिर्गुणिताः त्रेता द्वि
थानोद्वितीयोयुगचरणः ८६४००० एवं द्वाभ्यां गुणिताः

[1] त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते तस्य तावच्छती संध्या संध्यांशश्च तथापरः

द्वापरस्तृतीयो युगांघ्रिः ४३२··· कलिर्नाम चतुर्थो युगचरणः एवं
स्वस्वद्वादशांशप्रमितनिजनिजसन्ध्यायुक्तामनुष्यकालपरिमाणेनोक्ताः
एवं चतुर्णां चरणानां योगे यावत्कालः स्यात् ४३२···· तावद्युगस्य
प्रमाणम् एतदेव सहस्रगुणम् ४३२········ जातं ब्रह्मणो दिनम्
सृष्टिकल्पः एतावमेव युगसहस्रमिता रात्रिः ४३२········ संहा
रकल्पः एवं कल्पद्वयपरिमितं ब्राह्ममहोरात्रम् ८६४·······
एवं ब्रह्मणो मासवर्षायुरादिकं सनीयम् एवं महाभारतोक्तक्रमे
ण ब्राह्मणो दिनमुदाह्रियते मनुष्याणां वर्षं देवानामहोरात्रम्
तदेव षष्ट्यधिकमनुष्यवर्षं त्रिशत्या गुणितं जातम् ३६० ततः स
हस्रा ४··· गुणितं जातम् १४४···· कृतयुगपरिमाणम् पुनः
देवानां वर्षम् ३६० ततः शत्या गुणितम् १४४··· आद्यावन्तेवस
न्ध्यायाविद्यमानत्वाद्द्विगुणितम् २८८··· जाता कृतयुगस्य स
न्ध्या कृतयुगप्रमाणम् १४४···· सन्ध्याप्रमाणयोः २८८···
संयोगे जातं सन्ध्यायुतं कृतयुगपरिमाणम् १७२८··· देवानां व
र्षम् ३६० त्रिः सहस्रागुणितम् १०८···· जातं त्रेतायुगपरि
माणमेवं दैववर्षम् ३६० त्रिशत्या गुणितम् १०८··· द्विघ्नम् २१६···
जाता त्रेतायुगसन्ध्या सन्ध्यायुगप्रमाणयोः योगे जाते १२९६···
त्रेतायुगपरिमाणं सन्ध्यायुतम् एवं द्वापरयुगपरिमाणं सन्ध्यायु
तम् ८६४··· कलियुगपरिमाणं ४३२··· एवं ब्रह्मणोऽहोरात्र
परिगणनेन विष्ण्वादीनामप्यहोरात्रं शास्त्रेषु परिगणितम् ।
ननु हि स्वरमयादिरह विनमते [illegible]
[illegible] १७ ॥

देवानां वर्षं एवं मनुष्य
वर्षमानेन देवानां वर्षं
३६०

पंचोली टीका

ब्रह्मलोकपर्यन्तानां कालपरिच्छिन्नत्वात्तत्रगतानामावर्तनेन भ
गवत्स्वरूपस्य कालास्पृष्टत्वात् तत्रगतानामावर्तनेऽपि इति वि
शेषं दर्शयन् ब्रह्मणोऽहोरात्रयोः प्रमाणमाह सहस्रेति य

गी. सं. टी.

ब्रह्मणः प्रजापतेः वैराजस्य सहस्रयुगपर्यंते सहस्रयुगा
नि पर्यंताः पर्यवसानं यस्य अह्नः तदह्नः सहस्रयुगपर्यंतां विदुः
रात्रिमपि तावत्प्रमाणां विदुस्ते जनाः अहोरात्रविदः अतो ब्रह्म
णोपि कालपरिच्छिन्नत्वात्पुनरावृत्तिरस्ति ७ ॥

रणवीरसमिद्बोधिनी ॥

अथ कथं ब्रह्मलोकवासिनोपि पुनरावर्तंते न पुनर्मर्त्यपत्नाः
त्यत्र क्रमेणाकारणमाह सहस्रेति यद्यपि कालविभुर्नित्यता
न्यथानुपपत्त्यान्यायसिद्धैकरूपस्तेव वक्ष्येदः कर्तुं न शक्यते त
थापि तत्पश्वरिनिमेषोन्मेषाद्युपाधिवशात्सूक्ष्मो जायते स्व
मायवस्त्वाद्देवभूतसूर्योदयास्तमयोपाधिवशात्बहुस्थूलो वक्ष्ये
दः कर्तुं शक्यत एव स च सिद्धिः सूर्योदयास्तमयोपलक्षितः काल
विशेषो मनुष्यपरिसंख्याने नाहोरात्रतया व्यपदिश्यते तेन मनु
ष्यसंबंधिनः षष्ठ्यधिकत्रिशतीपरिमिता अहोरात्रास्तेषां वर्षं
भवति तदेव च दैवोऽहोरात्रः विंशतिसहस्रयुक्तं त्रिचत्वारिंशल्ल
क्षवर्षाणि मानुषं चतुर्युगं एकसप्ततियुगं च मन्वंतरं ता
नि चतुर्दश ब्रह्मणोऽहोरात्रः तादृशैरहोरात्रैः पक्षमासादिक्रमे
ण वर्षशतं ब्रह्मणः परमायुरिति तथा च भास्कराचार्यः योक्ष्णो
र्निमेषस्य खराम भागः स तत्परस्तच्छतभाग उक्ता त्रुटिर्नि
मेषैर्धृतिभिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता १ त्रिंशत्
कला नाडीघटिका क्षणः स्यान्नाडीद्वयं तैः खगुणो दिनं च गुर्वक्षरैः
खेंदुमितैरसुस्तैः षड्भिः पलं तैर्घटिका खषड्भिः २ स्याद्वा घटीषष्टि
रहः खरामैर्मासो दिनैस्तैर्द्विकुभिश्च वर्षं चैत्रसमाप्येन समा विभा
गः सुरासुराणामयं प्राकलाविलिप्ताः ३ रवेश्चक्रभोगोर्कवर्षं
दिव्यं युगानं च देवासुराणां तदेव रवीन्दुयुते संयुतिस्तावदन्या
योमीसपतत्रयं चतुर्युगानं ४ मनोरस्यहयांतरं तदर्कसावनं दिनं
तदेवमेदिनीदिनं भवामरस्तमभ्रमः ५ खवस्वाभ्रदंतमानगं

गाश्चियुगमभूद्गतोः क्रमेण सूर्यवत्सदैः कृतादयो युगं त्रयः १
ससंध्यकास्तदंशकैर्निजार्कभागसंमिते युतानि तद्युतो युगं रद
व्ययो युगानि दन्ताः २ मनुः तमानवैर्युगैर्युगैर्युगेऽभिसंयुतैर्भवेत् दि
नेसवोजजन्मनो निशा च तत्प्रमाणिका ३ संधयः सुमैन्दुनां कृता
हैः समाप्तादिमध्यावसानेषु तैर्मिश्रितैः स्याद्युगानां सहस्रं दिने
वेदसः सोपि कल्पो युगांते च कल्पस्य हयं ४ प्रातयुः प्रातानंदपवे
प्रतिष्ठस्तदायुर्मदृकल्पश्रुत्युक्तपाद्यैः यतो नादिमानेष कालः
स्ततोह्नवेध्यत्रपद्मोद्भवा येगतास्तान् ५ इति कौशिकमतेन ला
थिवत्समपि तथावामरः मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः दै
वयुगसहस्रे द्वे ब्राह्मणः कल्पौ तु तौ नृणामिति इत्थं वा पार्थिके
कालावच्छेदे सिद्धे दैवपरिमाणेन सहस्रयुगपर्यंते सहस्रं युगा
नि चतुर्युगानि पर्यंतोऽस्येति सहस्रयुगपरिमाणमहो दिनं ब्रह्म
णः प्रजापतेः संबंधि ये जना विदुः तथैव युगसहस्रपरिमाणां
रात्रिं च ये विदुस्ते जना अहोरात्रविदः कथ्यंत इति शेषः नतु सूर्या
स्तमयोपलक्षिताहोरात्रज्ञा अपि किमुक्तं भवति यथा मनुष्या
णां षष्टिघटीपरिमितः कालोऽहोरात्रस्तथा ब्रह्मलोकवासिनां च
तुर्युगसहस्रद्वयावच्छिन्नः कालोऽहोरात्रः ततश्च यथा मर्त्याः
स्वाहोरात्रपरिसंख्यया परिकल्पितं वर्षशतं पुरुषायुषमति
वाह्य देहांतरं भजंते तथा ब्रह्मलोकनिवासिनोपि स्वयोक्तपरि
माणावच्छिन्नाहोरात्रकल्पनया वर्षशतं पुरुषायुषमतिवाह्य
पुनर्देहांतरं भजंतीति कर्मभूमिभाजां मर्त्यानां ब्रह्मलोकनिवा
सिनां च पुण्यकर्मकारिणामहोरात्रादेः पुरुषायुषपर्यंतस्य
कालस्य ह्रासदैर्घ्यकृतो विशेषः न तु संसारित्वे तेषां कश्चिद्विशेषः
ततो यथा मर्त्याः पुनरावर्तंते तथा ब्रह्मलोकांतरनिवासिनोपि
स्वकालपरिमाणेन पुरुषायुषमतिवाह्य पुनरावर्तंते इत्या
ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन इत्युक्तं तेनेदमत्र तात्पर्यं

पुण्यक्रियाविशेषाणांतदनुष्ठानतत्फलकालावच्छेदतत्क्रमोणाधि
कारिणश्चब्रह्मलोकादौबुद्धिमतांस्थैर्यस्याविप्रलब्धेननभाव्यं
सोपिहिसंसारएवकिंतुमोक्षारणीकृत्यस्ववल्गीश्चमोविततवि
हितकर्माण्यनुष्ठायतत्फलंवमच्छेवसमर्प्यनित्यमहास्थैवा
प्रमाकार्येति २०॥

मधुभाष्य

सहस्रयुगेत्यादिना सहस्रशब्दोऽनेकवाची ब्रह्मपदं सावि
स्वरूपस्यरजनीतिश्रुतिः हिपदाद्प्रलयप्रवाहविवक्षितः
अव्यक्ताद्व्यक्तयःसर्वाइत्युक्तेः उक्तंचमहाकोमै अनेकगुण
पर्यंतमहाविश्वोत्तदातिथा रात्र्यादौलीयतेसर्वमहत्यादे
वजायतेइतिच यःससर्वेषुभूतेष्वितिवाक्यशेषाच्च अव्य
क्तोभगवान् यंप्राप्यननिवर्तंतेइमामुपेत्येत्युक्तस्यपरामर्शा
त् अव्यक्तंपरमंविश्वमितिप्रयोगाच्च गारुडे धामस्वरूपं तेजः
स्वरूपंचशब्दः प्रासैर्यमेतिकथ्यतेइत्यभिधानात् परमता
पनमाह २०

भाषा अनुवाद टीका ॥

और जो कहो कि तपस्वी ज्ञानी विगतराग औ क्षमाशील लोग त्रैलो
क के ऊपर शोकरहित स्थान को प्रस्थान करि वास करते है इस पुरा
ण के वचन से महर्लोक आदि लोकों की और लोक से उत्तमता
मालूम होती है परन्तु विनाश तो सबको है इस पक्ष मे सब की अ
पकृष्टता ही है हां विशेष यही कि वे लोक बहुत दिन तक स्थिर
रहते है और ब्रह्मा की अपने वर्ष से सौ वर्ष की आयु है और प्र
त्रैलोक अर्थात् स्वर्ग मर्त्य पाताल ये ब्रह्मा के प्रात दिन मे उत्पन्न औ
प्रति रात्रि मे प्रलय होते है ब्रह्मा का एक दिन मनुष्य के हजार च
तुर्युग का होता और उतनी ही रात्रि है और मनुष्य का एक वर्ष
देवतो का रात्रि दिन है इस हिसाब से देवतो के बारह हजार वर्ष
मे चारि युग होते है जो यह जानते सोई सर्वज्ञ है और जो चन्द्र सू
र्य की गति को राति दिन जानते वे नहीं जानते है १७ ॥

दोहा

युगसहस्र पर्यंत जो ब्रह्मा को दिन जान दोसहस्र युग अंत सों
रात दिवा अनुमान १७॥

९५

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे रा
त्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके १८

शाङ्करभाष्यटीका

यत एवं कालपरिछिन्नास्तेऽतः पुनरावर्तिनो लोकाः प्रजापतेरहनि
यद्भवति रात्रौ च तदुच्यते अव्यक्तेति अव्यक्तादव्यक्तं प्रजापतेः स्वा
पावस्था तस्मादव्यक्तात् व्यक्तयो व्यज्यन्त इति व्यक्तयः स्थावरजङ्ग
मलक्षणाः सर्वाः प्रजाः प्रभवन्त्यभिव्यज्यन्ते अह्न आगमोऽहरागमः तस्मिन्नहरा
गमे काले ब्रह्मणः प्रबोधकाले तथा रात्र्यागमे ब्रह्मणः स्वापका
प्रलीयन्ते ले सर्वा व्यक्तयस्तत्रैव पूर्वोक्तेऽव्यक्तसंज्ञके १८

आनन्दगिरिटीका

अक्षरार्थमुक्त्वा तात्पर्यार्थमाह यत इति यत्प्रजापतेरहस्तद्युग
सहस्रपरिमितं यावत् तस्य रात्रिः सापि तथेति कालविभागमभिप्रा
यमनुसृत्य ब्राह्मस्याहोरात्रस्य कालपरिमाणं दर्शयित्वा तत्रैव वि
भज्य कार्यं कथयति प्रजापतेरिति अव्यक्तमव्याकृतमितिशङ्कां
वारयति अव्यक्तमित्यादिना जातिप्रतियोगिभूताव्यक्तौ व्यावर्त
यति स्थावरेति अहरागमेत्यत्र प्रबोधकालेऽत्यादिशति अभिव्यज्यन्त इ
ति पूर्वोक्तमव्यक्तसंज्ञके स्वापावस्थं ब्रह्म प्रजापतिशब्दिते तस्मि
न्निति यावत् १८॥

स्वामिकृतटीका

ततः किमत आह॥
कार्यस्याव्यक्तरूपं कारणमव्यक्तं तस्मादव्यक्तात्कारणरूपात् व्यज्य
न्ते अभिव्यज्यन्ते इति व्यक्तयश्चराचराणि भूतानि प्रादुर्भवन्ति कदा अ
हरागमे ब्रह्मणो दिनस्योपक्रमे तथा रात्र्यागमे तस्मिन्नेवाव्यक्तसं
ज्ञके कारणरूपे प्रलयं यान्ति यद्वा ते अहोरात्रविद इत्येतन्न विधी
यते किन्तु ते प्रसिद्धा अहोरात्रविदो जनाः यद्ब्रह्मणोऽहर्विदुः त
स्याहरागमे अव्यक्ताद्व्यक्तयः प्रभवन्ति या च रात्रिं विदुः तस्या
रात्र्यागमे प्रलीयन्त इति द्वयोरन्वयः [illegible]

गी.
टी.ग्र.

[illegible] १८

पिशाचभाष्यटीका

अव्यक्तात्प्रकृतेः व्यक्तयः महदाद्याः प्रभवन्ति अहनि अह्निसंजायंते रात्र्यागमे रात्रौ प्रलीयन्ते लयं गच्छंति तत्रैवाव्यक्तसंज्ञिके प्रकृतौ १८ ॥

रामानुजभाष्यटीका

तत्र ब्रह्मणो अहरागमे त्रैलोक्यान्तर्वर्तिनो देहेन्द्रियभोग्यभोगस्थानरूपा व्यक्तयः समनन्तरमेव देहावस्थाद् अव्यक्तात् संभवन्ति तत्रैवाव्यक्तावस्थानविशेषे तदनन्तरमेव देहरात्र्यागमसमये प्रलीयन्ते १८ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १८

परमार्थप्रपा टीका

अथ यदर्थमेतावानुपक्रमस्तदाह अव्यक्तादिति द्वाभ्यां कार्यस्याव्यक्तरूपकारणात्मके तस्मादव्यक्तात्कारणरूपात् सकाशात्सर्वाः नानानामरूपकर्मात्मकाः व्यक्तयः स्वरूपाणि अहरागमे ब्रह्मणो जाग्रदवस्थायां लक्षिते दिनारंभे प्रभवन्ति प्रादुर्भवन्ति तथा तस्यैव सुषुप्तलक्षिते रात्र्यागमे तत्रैवाव्यक्तसंज्ञके विलीयंते यस्य कस्यचित्कार्यस्यावश्यं कारणे लयः इति प्रसिद्धं अस्मिन्नर्थे शातपथ्यः श्रुतयः पूर्वं दर्शिताः एव इदानीमरुणकेतुकाः श्रुतयश्च श्रुतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्रिरजायत ततः समुद्रो अर्णवः समुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वः
४० इति भाष्यं श्रुतं सत्यसंकल्पः सत्यं यथार्थभाषणं अभीद्धाद्दीप्तात् प्रकाशमानात्परमेश्वरात् अध्यजायत अधिकलेनात्कर्षेणाजायत प्रथमं जगत्स्रष्टव्यमिति सत्यसंकल्पः अनेनैव बहु स्यां प्रजायेयेति सत्यप्रतिज्ञात्वेनाभ्यर्थः किंभूतात् अभीद्धात् तपसः तपो रूपात् स तपस्तप्यत स तपस्तप्त्वेति श्रुतेः ततो रात्रिरजायत रात्रिशब्देन कालः उपलक्षितः सृष्टेर्निमित्तभूतः कालोऽस्ति ततः तेनैव ततः समुद्रयति आप्नोतीति समुद्रः आकाशादिगाढि

पदार्थः आसीत् ततोऽर्णवः सागर आसीत् ततः पूर्वोक्तकारणरूपकाला
त्संवत्सरः सृष्ट्यादौ तावदहोरात्रनिमित्तभूतः समयोपाधिरूपः संवत्सरा
त्मकः प्रजापतिरजायत तस्मएव संवत्सरः प्रजापतिः षोडशकल इतिश्रु
तेः ततोऽहोरात्रादिकं धाता स्रष्टा यथापूर्वं प्राचीनदिनादौ यथाऽकल्प
यत् तथैवाद्यतनेदिनादावकल्पयत् कल्पितवान् किं तत् अहोरात्राणि
तत्कारणभूतौ सूर्याचन्द्रमसौ दिवं पृथिवीमन्तरिक्षमाकाशं स्वः स्वर्लो
कं च किंभूतः मिषतो जागरादेः पश्यतो विश्वस्य सर्वलोकस्य वशं वश
वर्ती स्वतन्त्र एव यथापूर्वं दर्शयतीत्यर्थः अत्र यादृशप्रपञ्चस्य कालनिक
लमुपपादितं तथा नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्य
ग्रमिति भाष्यं जायमानः प्रादुर्भूतोऽह्नां केतुः सूर्य उषसां प्रातःकालाना
मग्रमुदयाचलमस्तकमुपेत्य प्राप्य नवो नवो भवति नवीनः पूर्वोत्पन्नयते
तथा कस्त्वोपतिष्ठतु अथैष एषोऽको भवति यतः प्रोदेति सूर्योऽस्तं यत्र
पगच्छति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तदेवं श्रुतिरियं सएवा
घसउस्थ इति भाष्यं पूर्वप्रक्रान्तो वत्सरादिकमात्मानुभवेतोपयुज्यते तोकिं
त्यसेदेव विपरीकरोतीत्यत्रोपपत्तिश्रुतिं विदर्शयति तदेषस्योकोभ
वतीति तत्रार्थे एषस्योको वेदोपजीव्यः प्रसिद्धो मेत्रोस्तीत्याह सूर्यस्य
ति सूर्यो यत्रास्तं गच्छति यतश्च उदयं प्राप्नोति ततः किं वस्त्विति विचार्यमाणे
पक्षसूर्यः प्राणात्मकात् प्राणात् स्वात्मनः सकाशादुदयं प्राप्नोति ततस्ता
स्मिन्नेव प्राणेऽस्तमेति लयं प्राप्नोति एवं सति द्योतयत्यस्थात् प्रकाशयतीति
देवास्तस्य राया स्तउदयास्तलक्षणं धर्मं नेसर्गिकं चक्रिरे मेनिरे कथंस
एवसूर्याय समुदितं तथा सप्तकस्य इतरदिन इति अत्रैतदुक्तं भवति प्र
त्यहमनुभूयमानो सूर्योदयास्तौ न पारमार्थिकौ किंत्वापेक्षिकौ नेत्रग
नातुदयास्तौ सूर्यैकल्पेते न वस्तुतः न ह्यहमस्तं इतीत्यस्तमितो वति सूर्यो
वेति तदुक्तं विचार्यमाणेतरणा विवाहनीति १८ ॥

वनमाली टीका

परमायुः
पञ्चाकाहोरात्रैः पक्षमासादिगणनया मानुषाणां वर्षशतं प्रजापतेः
विनिकालपरिहृतत्वान्नलोकान्तरनराहिस्तिंशुक्तं वत्सरोऽवचीनानां तदह

गी॰ टी॰ अ॰ मोक्षपरिच्छिन्नत्वात्सूक्ष्मतरोऽपुनरावृत्तिरित्याह अव्यक्तादिति दैनंदिनसृष्टिप्र
लययोरुपक्रान्तत्वात्तत्राकाशादीनां सत्त्वादव्यक्तपदेन त्रिगुणसाम्यावस्थ
प्रधानं नोच्यते किंतु प्रजापतेः स्वापावस्थैव तस्याश्चाव्यक्तात् प्रजापतिस्वापा
कालावच्छिन्नतयास्थितात् प्रधानात् अहरागमे प्रजापतेः प्रबोधकाले प्र
भवंत्यभिव्यज्यन्त इत्यर्थः रात्र्यागमे तस्य स्वापकाले सर्वा व्यक्तयः प्र
९६ लीयन्ते तिरोभवंति यतश्चाविर्भूतास्तत्रैवाव्यक्तसंज्ञके यद्वाहोरात्रेऽहोरे
वगस्यते अव्यक्ताद्देवेव तदहरागमे सृष्टिकाले समागते लक्षणयास्त
व्यवहारनिमित्तकारणाद्रूपात्तथा न महदादयः पदार्थाः प्रभवंत्यभिव्यज्यं
ते रात्र्यागमे प्रलयकाले समागते तत्रैवाव्यक्तसंज्ञके ईशे सर्वपदार्थाः प्र
लीयन्ते सहस्रयुगशतो द्विपरार्द्धात्मकाललक्षणकः प्रकृतिर्यामयाव्याकृता
क्षिप्रभ व्यक्ताव्यक्तस्वरूपिणी पुरुषस्याप्यभावेन लीयन्ते परमात्मनि परमात्मा च
सर्वेषामाधारः पुरुषोत्तमः सर्वविस्तारमावेद्य ... गीयते द्विपरार्द्धात्मकः
कालः कथितो हि समयात्तव तदहस्तस्यैव त्रयविस्तारो शेषस्य कथ्यते व्य
क्तेच प्रकृतौ लीने प्रकृत्यां पुरुषे तथा तत्र स्थिते निशा चान्या तत् प्रमाणा
महामुने नैवाहस्तस्य न निशा नित्यस्य परमात्मनः उपचारस्तथाप्यस्य त
स्येशस्य द्विजोच्यते इति वैष्णवोक्तेः अतो ज्ञानेच्छाकृतीनां भगवति नित्य
त्वेपि जीवादृष्टादेरपि सत्वेन न सदा सृष्ट्यादिस्तत्कालाभावात् एके वहा
रीब्रह्मसृष्टिकालसहिता सिसृक्षाप्रलयकालसहिता च जिहीर्षा १८

अनुभवैभवजयनी टीका ॥

एवं सत्यलोकादिमहर्लोकपर्य्यन्तानां लोकानां विनाशित्वमुक्त्वेदानीं त्रि
लोकान्तर्वर्तिनां जनानामपि ब्रह्मणो दिने दिने एव यातः स्यादित्याह अव्य
क्तादिति अत्राव्यक्तशब्दः स्वापावस्थात्रैलोक्यं भवति न तु प्रधानं दैनंदि
नसृष्टिप्रलययोरुपक्रमात् तदाकाशादीनां पंचभूतानां स्थितत्वाच्च अह
रागमे ब्रह्मणो जागरणसमये अव्यक्तात्स्वापावस्थाच्च तस्मात् विदेहात्मका
शान्तर्वाः समस्ताः व्यक्तयः शरीरेन्द्रियभोग्यभोगोपकरणान्यभिव्यक्ता
भवति प्रकर्षेणाभ्यंते रात्र्यागमे च तस्मिन्नेव प्रसिद्धिनां ते प्राभवति अव्यक्त
संज्ञके स्वापावस्थे तत्रैव ब्रह्मणः एवं तासः सर्वाः व्यक्तयः प्रलीयन्ते

+यथोक्तैरहोरात्रैः पक्षमासादिगणनया पूर्णं वर्षशतं प्रजापतेः परमायुरिति कालपरिच्छि
न्नत्वेनानित्योऽसौ तेन तल्लोकात्पुनरावृत्तिर्युक्तैव ये तु ततोऽर्वाचीनास्तेषां तदहर्मात्रपरिच्छि
न्नत्वात् तत्तल्लोकेभ्यः पुनरावृत्तिरिति किमु वक्तव्यमित्याह+
भवंति १८ ॥

मधुसूदनी टीका

+अत्र दैनंदिनसृष्टिप्रलययोरेव वक्तुमुपक्रांतत्वात्तत्र चाकाशादीनां सत्वा
दव्यक्तशब्देनाव्याकृतावस्था नोच्यते किंतु प्रजापतेः स्वापावस्थैव स्वाप
वस्थः प्रजापतिरिति यावत् अहरागमे प्रजापतेः प्रबोधसमयेऽव्यक्ता
त्स्वापावस्थारूपाद्व्यक्तयः शरीरविषयादिरूपा भोगभूमयः प्रभवंति
व्यवहारक्षमतयाभिव्यज्यंते रात्र्यागमे तस्य स्वापकाले पूर्वोक्ताः सर्वा
अपि व्यक्तयः प्रलीयंते तिरोभवंति यतश्चाविर्भूतास्तत्रैवाव्यक्तसंज्ञके का
रणे प्रागुक्ते स्वापावस्थप्रजापतौ परमायु विनाशित्वेपि संसारस्य न नि ^प्रादुर्भावात्प्रादुर्भूतस्य च पुनः [illegible]
वृत्तिः क्लेशकर्मादिभिरवशतया पुनः पुनः क्लेशादिवशेनैव तिरोभावा
संसारे विपरिवर्त्तमानानां सर्वेषामपि प्राणिनामस्वातंत्र्यादवशानामे
वजन्ममरणादिदुःखप्रबंधसंबंधादलमनेन संसारेणेति वैराग्यात्मम
र्थस्य समानतामनुपेतेन न च पुनः पुनः प्रादुर्भावात्कृतनाशाकृताभ्या
गमपरिहारार्थं चाह १८ ॥

सदानंदी टीका ॥

एवम्भूतैरहोरात्रैः पक्षमासादिसंख्यया पूर्णं वर्षशतं तस्य परमायुरिती
इति तस्य कालपरिच्छिन्नतयानित्यत्वमिति ते योगजन्मतया सतिकृ
तस्तत्कास्थिरा गतिः तल्लोकप्राप्तिर्येते त्याह सर्वजगद्गुरुः स्वापाव
स्था विधेरस्मिंल्लोके ह्यव्यक्तशब्दितः २ विधेः प्रबोधसमये स्वापर्यवस्था
त्मनस्तनः शरीरविषयाद्यात्मव्यक्तयो भोगभूमयः व्यवहारक्षमते
न प्रभवंत्यहरागमे स्वापकाले विधे रात्र्यागमे तत्रैव कारणे अव्यक्त
संज्ञके सर्वा लीयंते व्यक्तयस्तथा १८ ॥

नीलकंठी टीका ॥

किं ब्रह्मणो क्रियायते किं वा राज्ञाविमतत्राह अव्यक्तादिति अत्र दैनंदिन
सृष्टिप्रलययोः प्रकृतत्वादव्यक्तशब्देन नाव्याकृतं वियदादिकारणं।
मित्यादौ तदाप्याकाशादीनां सत्वात् किं तर्हि प्रजापतेः स्वापावस्थैव
ह्यव्यक्तशब्दार्थः अयं भावः प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजं

गमप्रपंचः सर्वोपि तदीये स्वाते ब्राह्मनाम्बेलीयते रात्र्यागमे तथाहि व
सागमे पुनस्तत एव यथापूर्वमाविर्भवति एवं दृष्टिसृष्टिमायेनास्मक।
स्मिन्नेवाव्यये विपरीतदिमप्रपंचोः स्वप्नस्थ मोलीयते प्रसन्नलोपे यथा स्वप्ने श
उद्भवतीति १८ ॥

आनन्दीटीका

अव्यक्तात्मूलप्रकृतेः व्यक्तयः महदादयः अहरागमे पौरुषे दिवसे
ततो हैरण्यगर्भके [illegible] ति १८ ॥

इदानीं तत्स्य ब्राह्मो रात्रस्य स्वरूपस्य
नताशुपपा

रामकंठीटीका

तिपादनद्वारेण मन्मोहो रात्रं तु स्वरूपता
द्योपदेशणनोविवेक
नैर्मल्यायोपदेशुमाह

अव्यक्तादीश्वरोज्ञाविततजगत्कारणभावाद्गुणसाम्यात्मनः प्रधानाः प्रा
भिधानात्मराणां युगसहस्रपरिमाणब्रह्मादिवसाविर्भावे सति म
र्वीव्यक्तयः सर्वभावानां सर्वे विशेषाः प्रभवन्ति प्रादुर्भवन्ति यथा सूर्यो
दयात्महते दिवसे सर्वप्राणिनां सर्वक्रियाविशेषाः प्रभवन्ति तथैव
युगसहस्रपरिमाणे ब्रह्मनिशागमे तत्रैव यथोक्ते व्यक्तसंज्ञके प्रली।
यन्ते व्यक्तरूपतां परित्यज्य शक्तिमात्रत्वेनावतिष्ठन्ते यथेह सर्वेशाणिय
नां सूर्यास्तमयात्संजाते निशागमे सर्वेन्द्रियप्रवृत्तयोन्तरेव प्रलीयन्ते इ
दमत्र तात्पर्यं रहोदयास्तमययोः सर्गप्रलययोश्चपर्यायेण प्रवर्तता
रतिसत्वेनास्तिकश्चिद्भेदः केवलं कालेवरादिवितश्वरभावाद् एवं स
र्वीकृतकस्यता विशेषविभ्रमस्य स्वानदायथोक्तस्यानित्यानत्याका
लानवच्छिन्नसमेस्वात्मसमे प्रतिपत्तिर्विवेकिभिरेष्टीकार्येति एतद्
वनिगमयति १८ ॥

ननुब्रह्मादीनां म. लौकिकी [illegible] टीका होरात्रे किं हृत्तमित्याह ॥

कार्यस्याव्यक्तं रूपं कारणमव्यक्तम् तस्मादव्यक्तात्कारणरूपाद्व्यक्तयः का
र्याणि प्रकाशनादिह्व चराचराणि भूतानि स्वस्वकालापेक्षयाहरागमे ब्र
ह्मादीनां दिवसोपक्रमे प्रादुर्भवन्ति तथा रात्र्यागमे तत्रैवाव्यक्तसंज्ञके
स्वस्मिन्स्वस्मिन्कारणरूपे प्रलयं यान्ति तिरोभवन्ति [illegible]
[illegible] १८ ॥

पंचोली टीका

प्रजापतेरहर्निशागमेचयद्भवतितदाहअव्यक्तादिति सर्वाःव्यक्त
यःस्थावरजंगमलक्षणाःप्रजाःअहरागमेब्रह्मणोदिनादौअव्य
गी० क्तात्कारणाद्व्याकृताद्ब्रह्मणःस्वप्नावस्थास्वरूपात्प्रभवंतितथारात्र्या
गमेब्रह्मणःस्वापनकालेतत्रैवपूर्वोक्तेअव्यक्तसंज्ञकेप्रलीयंते
लयंप्राप्नुवंति १८

98

भाषा अनुवाद टीका ॥

जिस से कालगति के पराधीन सब लोकहैं इस से पुनरावृत्ति
होतीहै सोई कहते हैं कि कार्यरूप जगत के अव्यक्त कहे सूक्ष्म
रूप कारण स्वरूप ही कोप्रकृति कहते हैं उसी कारण रूप प्र
कृति से ब्रह्मा के दिन मे चराचर सकल उत्पन्न होते और रात्रि
आने से फेरि उसी प्रकृति मे लयपाते हैं १८ ॥

रणवीरसमिद्धोधिनी॥

अथ तस्य ब्राह्मस्याहोरात्रस्य स्वरूपप्रतिपादनद्वारेणमर्त्यादीना
वतुल्यहृतोततामुपदेशमाह अव्यक्तादिति अव्यक्तादीश्वरात्म
कापात् अहरागमेयुगसहस्रपरिमाणेब्राह्मदिवसप्राडुर्भावे
सति सर्वाव्यक्तयः सर्वपदार्थानां विशेषाः प्रभवंति प्राडुर्भवंति
तथा तावत्परिमाणेब्रह्मणोरात्र्यागमे तत्रैवाव्यक्तसंज्ञकेऽव्य
क्ताभिधानेतत्वेपरमेश्वरेप्रलीयंतेव्यक्ततांपरित्यज्यप्राक्तिरूपे
णावतिष्ठंते अत्रवेदंतात्पर्यं यथासूर्योदयास्तमयाभ्यांक्रमेण
दिननिशयोः प्रवृत्तौसत्यांसर्वप्राणभृतांसर्वेक्रियाविशेषाःस
वोइंद्रियप्रवृत्तयश्चप्राडुर्भवंतिक्रमेणसंलीयंतेच एवंब्राह्मेदि
नैरात्र्येक्रमेणजगदुत्पत्तिविलयाविति सूर्योदयास्तमययोः
सर्गप्रलययोश्चक्रमेणसर्वदाप्रवहतोरनित्यत्वेनाक्लिकश्चिदि
भोगः केवलंह्रासदैर्घ्यकल्पनाकृतोभेदभ्रमइति एतदुक्तंभव
ति भूलोकवासिनामिवब्रह्मादिलोकवासिनामपिसमानतया
पुनःपुनर्जन्ममरणरूपसंसारात्मकंदुःखंपरिज्ञायकर्मभूमौ
स्थितैःस्ववर्णाश्रमोचितविहितकर्मणामनुष्ठानेनप्राप्येति
त्यक्त्वैवमहाश्चोवास्थाकार्येति १८॥

मधुभाष्य

१८॥

99

भाषाअनुवाद टीका

इससें पुनरा
तिस सें काल गतिके पराधीन सभलोक हैं
वृत्ति होतीहै कोई कहते हैं कि कार्यरूप जगतके अव्यक्त
कहे सूक्ष्मरूप कारण स्वरूपहीको प्रकृति कहते हैं उसी
कारणरूप प्रकृतिसे ब्रह्माके दिनमे चराचर सकल उत्प
न्न होते और रात्रिआनेसे फिर उसी प्रकृतिमें लय पाते हैं
१८ ॥

दोहा

अव्यक्त हिंसे व्यक्त सभहो हिं दिवसके मांहि राति हि होत स
लीन यह अव्यक्त नाम मे तांहि १८ ॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्यागा
मेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥

शाङ्करभाष्यटीका

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बन्धमोक्षशास्त्रप्रवृत्तिसा
फल्यप्रदर्शनार्थं अविद्यादिक्लेशमूलकर्माशयवशाच्चावशो भूतग्रा
मो भूत्वा प्रलीयत इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमाह भूतग्रा
म इति भूतग्रामो भूतसमुदायः स्थावरजङ्गमलक्षणो यः पूर्वस्मिन् क
ल्पे आसीत् स एवायं नान्यो भूत्वा पुनः अहरागमे प्रलीयते पुनः पुनः
रात्र्यागमेऽहःक्षयेऽवशोऽस्वतन्त्र एव पार्थ प्रभवति जायते स एव अहरागमे

आनन्दगिरिकृतटीका

ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलय
ते तस्मादन्यो भूयो भूयो ब्रह्मणोऽहरागमे भूत्वा पुनरात्र्यागमे परवशो विन
श्यति तदेवं प्रत्यवान्तरकल्पं भूतग्रामविभागो भवेदित्याशङ्क्यानन्तरश्लो
कतात्पर्यमाह अकृतेति प्रतिकल्पं प्राणिनिकायस्य भिन्नत्वे सति अकृता
भ्यागमादिदोषप्रसङ्गात्तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमेकत्वमाश्रित्य १२
मित्यर्थः यदि स्थावरजङ्गमलक्षणप्राणिनिकायस्य प्रतिकल्पमन्यथा
त्वं तदैकस्य बन्धमोक्षाविनाभावात्कारणहयात्मनो बन्धमोक्षयोरस्य
ज्ञानस्य प्रवृत्तिरफला प्रसज्येते अन्यस्यापि फलार्थमपि प्रतिकल्पं प्रा
णिवर्गस्य नवीनत्वानुपपत्तेरित्याह बन्धेति कथं पुनर्भूतसमुदायोऽ
स्वतन्त्रः सन्नवशो भूत्वा भूत्वा प्रविलीयते तत्राह अविद्यादीति आदि
शब्देनास्मितारागद्वेषाभिनिवेशा गृह्यन्ते यथोक्तक्लेशपञ्चकं मूलं प्रति
प्रतिलभ्य कल्पं प्रतिलभ्य धर्माधर्मात्मकं कर्मराशिरुद्भवति तद्वशादेवा
स्वतन्त्रो भूतसमुदायो जन्मविनाशावनुभवतीत्यर्थः प्राणिनिकायस्य ज
न्मनाशाभ्यामालोकयर्थसिद्धमर्थमाह इत्यत इति संसारे विपरिवर्तमानानां
प्राणिनामस्वातन्त्र्यादवशानामेव जन्ममरणप्रबन्धसम्बन्धात् अलम्

गी॰ टी॰ अ॰ नेन संसारेरोगाति वैराग्यं तस्मिन् प्रदर्शनीयं तदर्थमेवं च भूतानामहो
रात्रमाहृतिवचनमित्यर्थः समनन्तरवाक्यमिदमाचरामुख्यते रात्र्यागमे ल
108 यमनुभवतोऽहरागमे च प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तल्प पारव
श्यमित्याशयवानाह ग्रहइति ॥१९॥

तत्र च कृतनाथाख्य स्वामिकृतटीका ताभ्यागमशंकां वारयन् वैराग्यार्थं सृष्टिप्रलय
हस्याविच्छेदं दर्शय ति ॥
भूतग्राम इति भूतानां चराचराणां प्राणिनां ग्रामः समूहो यः प्रागासीत्स एव
वायं अहरागमे भूत्वा भूत्वा रात्र्यागमे प्रलीयते पुनरपि अहरागमेऽवशः क
र्मादिपरतंत्रः प्रभवति नान्य इत्यर्थः [illegible] ॥१९॥

पिशाचभाष्यटीका

भूतग्रामो भूतसमूहः भूत्वा भूत्वा प्रविलीयते उत्पद्योत्पद्य विनश्यति अव
शः परवशः प्रभवति उत्पद्यते अहरागमो ह्यागमः ॥१९॥

रामानुजभाष्यटीका

भूतग्राम इति सर्वं एवायं कर्मवशो भूतग्रामः अहरागमे भूत्वा भूत्वा रात्र्या
गमे प्रलीयते पुनरहरागमे प्रभवति तथा वर्षशतावसाने तु पयुगसहस्रा
पर्यंतालोका न्ते ब्रह्मलोकं ब्रह्मा च पृथिव्यप्सु लीयते आपस्तेजसि लीयन्त इत्यादिक्रमे
णाव्यक्ताक्षरतमःपर्यन्तमेव प्रलीयते एवं मद्व्यतिरिक्तस्य कृत्स्नस्य का
लव्यवस्थया मत्त उत्पत्तेर्मयि प्रलयाच्चोत्पत्तिलयादिकम वर्जनीयमि
त्यैश्वर्यगतिं प्राप्तानां पुनरावृत्तिरपरिहार्या मामुपेतानां तु न पुनरावृत्तिप्रसं

अभिनवगुप्तकृतटीका

ये खल्वदीर्घदृष्टयस्ते ब्रह्मणोऽपि रात्रिंदिने पश्यन्ति प्रलयोदयतया यथाच
हरहस्त एव विशुद्धा निर्जानिजामेव चेष्टामनुरुन्धते प्रतिरात्रि चैतेषामेव नि
वृत्तपरिस्पन्दानां शक्तिमात्रत्वेनावस्थानं एव तस्य प्रलये एव पुनः पुन
र्भावः नान्येभ्य उपसृज्यन्ते अपि तु त एव जीवाः कालकृतस्तु चिरक्षिप्र
प्रत्ययात्मा विशेषः एष च परिच्छेदः प्रजापतौ नाममात्रेण तत्स्वतोऽपि

प्रभवाप्ययधर्माणाप्येवतिष्ठितम

परमार्थप्रपा टीका ॥

एवं सत्यहिनानुदिनहोमव्यावस्थार्थ्येयेत्ति की एवंयेजीवास्तावद्रा
त्र्यागमेः स्वस्वकारणेलीनाभवंति तएवपुनर्दिवसारंभेदेहधारि
णोभवंतीत्याह भूतग्रामइति सोभूतग्रामोरात्र्यागमस्वकारणेऽप्र
लीयमानोभूत्वा एवायंदिनादौभूत्वाभूत्वाभूयःप्रादुर्भावंप्राप्य
पुनरात्र्यागमेप्रलीयतेऽवशः कर्मपरतंत्रः सन्पुनरहरागमेप्रभा
वन्तिदेहधारित्वमवलंबन्ते तदुक्तमनुकूलागमे वहिर्मुखं एवं पश्यन्ति
दृश्यज्ञानमेतन्मुखं एवं पश्यन्ति चित्स्वरूपं मध्येनयोः स्वप्नमयीचर
हिमनादिरेवमनसः स्वभावइति टिप्पणिकास्वपि अनिमित्ताः केनचि
त्स्वरेणस्वामाः पदार्थाः अभवंस्मकस्मात् तस्मिन्स्वरेणजनितो
जनस्यसत्यानुभूत्यासुखदुःखभोगः अनिमित्तः एवंवदाविरास्तेनह
स्वप्नेवः सवजागराहै आसीत्त्वरायोस्तमितः सप्तभावनादिसंस्कारव
शाद्धिचेतइति १९ ॥ ॥

वनमाली टीका

आसुविनाशिनोपिसंसारस्य नविहतिः क्लेशकर्मादिवशात्तयापुनः
पुनःप्रादुर्भावात्प्रादुर्भूतस्यचपुनः कर्मादिवशेनैवतिरोधानात्सं
सारेपरिवर्तमानानां विवशानांजन्ममरणादिदुःखप्रबंधसंबंधादल
मनेनसंसारेणेति वैराग्यायत्यर्थमाह भूतेति भूतसमूहः स्थावरजंग
मरूपोयः पूर्वस्मिन्कल्पेस्थितः सएवायं तस्मिन्कल्पेप्रादुर्भूतो नतत्र
१८ निकल्पमस्मिन्नस्मात्सत्कार्यवादानभ्युपगमात् सूर्याचंद्रमसौधाता
यथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वरिति श्रुतेः य
थर्तावृतुलिंगानिनानारूपाणिपर्यये दृश्यन्तेतानितान्येवतथाभावा
युगादिष्विति स्मृतेश्च महत्तत्वाद्याघटत्वाद्यंताः प्रकृतेरवस्थाविशेषा
स्तेनत्कारणैरभिव्यज्यन्ते दण्डादिना घटत्वाद्यवस्थाव्यक्तिरेव
घटाद्युत्पत्तिः मुद्गरादिनाततिरोधाने कपालत्वचूर्णत्वाद्यवस्थाभिव्य
क्तिघटादीनांनाशः तत्रये पूर्वकल्पे जीवन्मुक्ताब्रह्मादयस्तेऽपि
कारान्ते प्रारब्धकर्मक्षये विमुच्यन्ते तन्नामकाश्चान्ये तदधिकारक

गी॰ त्यांतरेणाममुक्तानां पुनः संसारः जडवर्गस्तु सएवेतिभावः ॥१८॥
टी॰ अ॰

ज्ञानमेवजयन्ती टीका ॥

ननुये प्रलीनास्तेषां पुनरुत्पत्तिर्न संभवति यतः कृतनाशाकृताभ्या
गमप्रसङ्गः स्यादिति चेत्तत्राह भूतग्राम इति हे पार्थ यः पूर्वस्मिन् स्थित
स्स एवायं मंगलिनिर्दिष्टस्तपो भूतग्रामश्चेतनाचेतनात्मकभूतसमू
होऽहरागमे भूत्वा भूत्वा पुनः पुनर्जन्म प्राप्य प्राप्य अवशः कर्माधी
नस्सन् रात्र्यागमे प्रलीयते पुनरहरागमे प्रभवति स एवोत्पद्यतेऽ
तो न कृतनाशाकृताभ्यागमप्रसङ्गो भवति एवं सत्यलोकादिभूलो
कान्तानां नानाविधैश्वर्ययुक्तानां ब्रह्मादिस्थावरपर्यन्तानां [illegible]
[illegible] सर्वेषां जीवानां कर्माधीनत्वेनोत्पत्तिविनाशयोरवर्ज
नीयत्वस्यादतः सर्वं प्राकृतविषयं विहाय ये मां भजन्ति त एव श्रेष्ठाज्ञ
नादिरहितास्सुखिन इत्यभिप्रायः पार्थत्वमनेन हेतोश्शुभूतग्रामस्थत्वमनाश्रय
तस्तत्त्वमथायाः पुत्रत्वेन मद्भक्त्यात्मा ह्यायिकारी स्वीति सूचितं ॥१९॥

मधुसूदनी टीका ॥

भूतग्रामो भूतसमुदायः स्थावरजंगमलक्षणो यः पूर्वस्मिन् कल्पे स्थितः
स एवायं [illegible] एतस्मिन् कल्पे जायते नापि तत्प्र
तिकल्पमन्योऽन्यश्च प्रसृत कार्यं वादानभ्युपगमात् सूर्याचन्द्रमसौ धा
ता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वरिति श्रुतेः
समाननामरूपत्वादावृत्तावप्यविरोधोदर्शनात् स्मृतेश्च तथा स्थित्याद्य
अवशः स्वविद्याकामकर्मादिपरतन्त्रः हे पार्थ स्पष्टमितरत् [illegible]
[illegible]
[illegible]
[illegible] ॥१९॥ ॥

सदानंदी टीका

एवमाब्रह्मविनाशित्वेप्यस्यनास्तिपरितियः संसारदीर्घरोगस्यपेव
क्लेशैः पुनः पुनः जायमानस्य तत्त्वेषां संसारे भ्रमतोऽनन्तानां भवानेना
जरामृत्युजन्मादिदुःखचक्रतः कदापि नास्ति विश्रान्तिरिति वैराग्य
सिद्धये प्रकृताभ्यागमो दोषः कृतनाशस्तथापरः स्यादिदामती

10

हरिर्जायमानाविनश्वरा वेधमोत्तव्यवस्थायाः सायकेशास्त्रमप्यथ वि
फलंस्याघदाहरिणादिमेमेवसमता पतद्दोषापनुत्त्यर्थमाहेवश्रीरमा
पतिः भूतग्रामोयएवासीत्सर्वकल्पमपवर्ग्ह चराचरात्मकोनानाभू
त्वाभूत्वाप्रलीयते निशागमेदिनादोवसएवायंप्रजायते स्वाविद्यादिप
राधीनोभूतग्रामोनेकधा अविद्यादिक्लेशमूलकर्माशयवशाद्य
भूतग्रामःपरायत्तोजायतेलीयतेपुनः सएवेतिविरागादिसिद्धयेहरि
रोच्यते १९ ॥ ॥

नीलकंठी टीका ॥

कृतहानाकृताभ्यागमदोषापनुत्तये बंधमोत्तशास्त्रप्रवृत्तिसाफल्याय च
अविद्यादिवशादवशोयंभूतग्रामःपुनःपुनर्भूत्वापुनःपुनःप्रलीयतेइ
त्याहैवराग्यायाह नायं भूतग्रामइति अहरागमेभूत्वाभूत्वारात्र्यागमे
प्रलीयतइतियोजना सएवभूत्वाप्रलीयतेनान्यः अभिनवोभवतीम
र्थः कुतःयतोऽवशः अविद्याकामकर्माधीनस्तस्मात्स्वीनर्थबीज
भूतायाअविद्यायाविद्ययाउच्छेदेजन्ममरणप्रवाहविच्छेदायाव
तितव्यमित्यर्थः १९ ॥

आनन्दीटीका

पतद्देवोऽपदेशोस्थैर्याय निगम

भूतानांमहदादीनांग्रामसंघातः सएवनतुकश्चिदन्योनवोनवः १९ यति ॥
[illegible]
[illegible] ॥

रामकंठीटीका

भूतग्रामःसएवायमिति सएवायंचतुर्दशविधप्रपंचेनप्रविभक्तो
भूतग्रामःचराचरप्राणिवर्गोयथोक्तक्रमेणसर्गादौभूत्वाभूत्वापुनः
पुनरभिव्यक्तिमासाद्यरात्र्यागमेवसराविसंतेप्रलयकालेप्रलीयतेस
ग्मवति अहरागमेसर्गादौतप्रभवत्यभिव्यक्तिमासादयति इति
[illegible] १९ ॥
[illegible]

लासिकी [illegible] टीका कृताभ्यागमशंकां वारयन्वैराग्यार्थंसृष्टिप्रलयप्रवा
तत्रचकृतनाशा
भूतानांचतुर्दशविधानांप्राणिनांग्रामःसमूहःयःपूर्वस्मिन्काले।
प्राविद्ये... भूत्वाभूत्वापुनःपुनराविर्भूय।
...रीयति॥ ग्रामीत्सएव नतुप्रतिकल्पमन्योमन्यो

गी॰
टी॰
भ्र॰

103

रात्र्यागमे स्वस्मिन्कारणे प्रलीयन्ते तिरोभवन्ति तथाहरागमे वशः
कामकर्मक्लेशादिपरतन्त्रः प्रभवन्ति व्यक्तिमासादयन्ति नात्मेयेऽप
रस्यन्ते: पितरप्रवर्त्तीवा: तथाचश्रुतिः सूर्याचन्द्रमसौधाता यथा
पूर्वमकल्पयत् दिवंचपृथिवींचान्तरिक्षमथोस्वरिति [illegible]
[illegible]
[illegible]
[illegible] १९ ॥

पंचोली टीका

अविद्यादिक्लेशमूलेककर्मवशादवशः भूतग्रामः भूत्वाभूत्वाप्रली
यते हेऽर्जुन अहनाम्नागमे अहतप्रमाणप्रमेनेगेवारयन्तु संसा
वैराग्यप्रदर्शनाय सृष्टिप्रलयप्रवाहस्यावश्यकत्वमाह भूतग्रामे
ति हे पार्थ स एवायं भूतग्रामः भूतसंघातः स्थावरजंगमलक्षणः
भूत्वाभूत्वारात्र्यागमे अवशः अस्वतंत्रः प्रलीयते अहरागमे पुनः
पुनः प्रभवति १९ ॥

रणवीरसमिद्धायिनी

उक्तमेवार्थंविनिगमयति भूतग्राम इति स एवयः प्राक्तनेऽप्यह
भूयलीनो भवति प्रथमेव भूतग्रामश्चतुर्विधः स्थावरप्राणि
वर्गो भूत्वाभूत्वाऽहस्यारंभे पुनः पुनरभिव्यक्तिमासाद्य रात्र्याग
मे सहस्रयुगपरिमाणाव्यक्तनिकाभिधाने प्रलयकाले अवपाते
तेऽवशः सन् प्रलीयते तिरोभवति अहरागमे युगसहस्रपरिमितब्र
ह्मदिवसे सर्गकाले च प्रभवति व्यक्तिमासादयति एवमेव दि
मनुष्याणां भूमौ सूर्योदयास्तमयाभ्यां दिनरात्र्योर्विषयेऽपि यद्
तिप्राउर्भावतिरोभावौ सिद्धौ ततश्च प्राणो दोषात्रो मनुष्याद्देश
यान्नातिरिच्यते अनुक्तं सत्यं वानतिरिक्ततायां मनुष्याणां मि
वत्पूर्वदेहत्यागे देहान्तरप्राप्तिवदूर्ध्वलोकवासिनामपि पुण्य
कर्मणां फलभोगेन क्षये पुनः संसारमायाति ततश्च स्वर्गा

वितकर्मणां फलं मय्येव नित्ये परमेश्वरे समर्पणादव्ययं अत
एवमत्रतिपन्नानां न पुनरावृत्तिरिति स्थितं २८ ॥

मथभाष्य

२८ ॥

109

भाषाअनुवाद टीका ॥

अब विषयों से वैराग्य होने के अर्थ सृष्टि औ लय का प्रवाह देखाव
ते हैं कि हे पार्थ जो चराचर प्राणी मात्र हैं वे ये तेई अवश कर्म
के आधीन वारम्वार होते औ जाते हैं जव ब्रह्मा का दिन भया तव प्र
गट जव राति आई तो फेरि प्रकृति मे लीन हो गये ऐसे ही हेरफे
र लगा रहता है १९ ॥

दोहा

जीव निकर सो पार्थ यह होय होय होपलीन रजनि आगम में
नयो प्रकट दिवस में हि चीन १९ ॥

105

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः यः
स सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० ॥

शाङ्करभाष्यटीका

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्ट ओमित्येकाक्षरं ब्रह्मेत्यादिना अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षयेदमुच्यते पर इति अनेन योगमार्गेणेदं गन्तव्यमिति परस्तस्मादिति परो व्यतिरिक्तो भिन्नः कुतस्तस्मात् पूर्वोक्तादव्यक्तात् तुशब्दोऽक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः भावोऽक्षराख्यं परं ब्रह्म व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह अन्य इति अन्यो विलक्षणः स चाव्यक्तोऽनिन्द्रियगोचरः परस्तस्मादित्युक्तं कस्मात् पुनः परः पूर्वोक्ताद्भूतग्रामबीजभूतादविद्यालक्षणादव्यक्तादन्यो विलक्षणो भाव इत्यभिप्रायः सनातनश्चिरन्तनो यः स भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति २०

आनन्दगिरिकृतटीका

अक्षरं ब्रह्म परममित्युपक्रम्य तदेवमुपयुक्तं किमिदमक्षरमुक्तमित्याशङ्क्य वृत्तमनूद्यानन्तरग्रन्थसङ्गतिमाह यदुपन्यस्तमिति अक्षरस्वरूपेण निर्दिदिक्षिते तस्मिन् पूर्वोक्तयोगमार्गस्य कथमुपयोगः स्यादित्याशङ्क्य तत्प्राप्त्युपायत्वेनेत्याह अनेनेति गन्तव्यमिति योगमार्गोक्तिरुपयुक्तेति शेषः पूर्वोक्तादव्यक्तादिति सम्बन्धः तुशब्दस्य व्यतिरिक्तविषयत्वे तुशब्देन वैलक्षण्यमुक्त्वा पुनरन्यशब्दप्रयोगात् पौनरुक्त्यमित्याशङ्क्याह व्यतिरिक्तत्व इति तुना द्योतितं वैलक्षण्यमन्यशब्देन प्रकटितं यतो भिन्नोऽपि भावभेदेषु सालक्षण्यमालक्ष्यते ततश्चाव्यक्ताद्भिन्नत्वेऽपि प्रलक्षणेन सालक्षण्यमाशङ्क्य तन्निवृत्त्यर्थमन्यपदमित्यर्थः यद्वा परशब्दस्य प्रकृष्टत्वार्थत्वे पुनरुक्तिशङ्कैव नास्तीति द्रष्टव्यम् अव्यक्तानादिभावविशेषणार्थत्वे पुनरुक्तिं शङ्कित्वा समर्थयते यः स भाव इति सर्वेषु हि विनश्यत्सु न विनश्यति सत्त्वविनाशहेत्वभावात् स्यात्तस्याविनाशित्वमर्थसिद्धं नश्यद्धि कारजातं पुरुषान्तं विनश्यति ष्वमहतीत्यर्थः २० ॥

गी॰
टी॰ अ॰

स्वामिकृतटीका

लोकानामनित्यत्वं प्रपंचयित्वा परमेश्वरस्वरूपस्य नित्यत्वं प्रपंच-
यति परइति द्वाभ्यां तस्मात्तु चराचरकारणभूतादव्यक्तात्परः तस्यापि कार-
णभूतो योन्यस्तु विलक्षणोऽव्यक्तः चक्षुराद्यगोचरो भावः सनातनोऽनादिः
स तु सर्वेषु कार्यकारणलक्षणेषु भूतेषु नश्यत्स्वपि न विनश्यति [illegible]
[illegible] २० ॥

पिशाचभाष्यटीका

परः उत्कृष्टस्तस्मादुक्तग्रामाद्भावः पदार्थः अव्यक्तो नित्यसिद्धः अव्यक्ता-
त्प्रकृतेः सनातनः नित्यः यो भावः सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० ॥

रामानुजभाष्यटीका

अथ कैवल्यप्राप्तानामपि पुनरावृत्तिर्न विद्यत इत्याह परइति तस्मादव्य-
क्तादचेतनप्रकृतिरूपात्पुरुषार्थतया परः उत्कृष्टो भावो ह्यन्यो ज्ञानैकाका-
रतया तस्माद्विसजातीयः अव्यक्तः केनचित्प्रमाणेन न व्यज्यत इत्यव्यक्तः
स्वसंवेद्यस्वासाधारणाकार इत्यर्थः सनातनः उत्पत्तिविनाशरहिततया
नित्यो यः सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु नश्यत्सु तत्र तत्र
स्थितोऽपि न नश्यति २० ॥

अभिनवगुप्तकृतटीका

सर्वतो लोकेभ्यः पुनरावृत्तिर्न तु मां प्राप्येति स्फुटयति २० ॥

परमार्थप्रपा टीका ॥

अथ सर्वकारणीभूतस्य परमेश्वरस्य सकलव्यवहारातीतस्य शाश्वतत्वमा-
ह परइति तस्मात्कार्यकारणसंघातरूपादव्यक्तात्मकाशात्परः उत्कृ-
ष्टस्तत्कारणीभूतः तस्मादन्यस्तद्विलक्षणोऽव्यक्तश्चक्षुराद्यगोचरः स-
नातनोऽनादिर्यो भावस्थालकः पदार्थोऽस्ति स सर्वेषु भूतेषु नश्यत्सु स-
न्न विनश्यति योऽवशिष्यते सोऽस्य स्वरूपमिति स्मृतेः तदुक्तमप्येवं वल्ली-
ष्विंद्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमं सत्त्वादपि महानात्मा मह-
तोऽव्यक्तमुत्तमं अव्यक्तात्परः पुरुषो व्यापकोऽलिंग एव च यं ज्ञात्वा मु-

च्यते नैतद्वस्तु तत्त्वं वा गच्छतीति अर्कशाखायामपि अप्रशंसस्य महतो महि-
त्वमनन्तस्य महतोस्तु विन्दु नानारूपविस्तृतेसंभरेतेऽप्रसिद्धत्वतीवसंततो भूयि-
तइति भाष्यं अस्य महतः सर्वोत्कृष्टस्य महित्वं व्यापकत्वं अप्रपंचस्य आह्वा-
५ किंभूतस्य महतः स्वमहिम्नाधर्मकास्तु विन्दुप्रनास्तु अमत्यस्य अमर ...गामि ५
कस्य सनातनस्य यो नेत्यपर्याहारः येन महित्वेन कृत्वा नानारूपप्रा-
णिनामनन्तापरेहरूशिश्रविस्तृतेभरणकृतेनेदं ततः संभरेतेप विस्तृर्णो असि-
वनाजिह्वयाग्रासेकलयंत्यो वसतीदं ते स्पूर्णयंत्यो भूयिष्ठा भवन्ति तथा
अतः भक्षयंत्यो गिलंत्यो अचेतनं नाशरीरेषु यज्ञलक्षणादिकर्मतदं तगतेनैवे-
नैव प्रकृष्टेणेत्यर्थः २० ॥

वनमाली टीका ॥

किं विनापुनरावृत्तिस्वत्कामात्मपेस्य पुन
ब्रह्मलोकगतानामपि हरिभक्ति ... परइति द्वाभ्यां तस्मात्स्थूलसूक्ष्मादि
जैस्मनविघनश्येनहि ह्रियेति परइति द्वाभ्यां तस्मात्स्थूलसूक्ष्मादि
नानारूपादाकाशस्थराद्दिगोचरात्‍व्यक्तस्थराघगोचरः भावः सत्ते
यो नो भिन्नः परउत्कृष्टो नियामकतया सनातनः सदैवाकारः नशाहेमि
याद्विनाश्च पादेयत्वाव्यक्तावादिनोवैलक्षण्यंस्ववयति सर्वेषु भूतेषु
नष्टपत्स्ववस्थांतरं प्राप्नुवत्स्वपिन विनश्यति नावस्थांतरं प्राप्नोति सदेक
रूपरूपायविलवप्रभविस्नवइतिवेत्यवोक्तेः तस्मात्तद्भवस्यवात्मथा
भावरूपनाशोत्पत्त्यादिभावात्तत्राप्यगतानां नपुनरावृत्तिरिति भावः २०

उत्तमवैजयन्ती टीका ॥

एवं यथैव ययागतिमितागजनागजनादिकंलभंनेनतथाकेवलस्येयेप्राप्तास्ते
नैवप्राप्नुवंतीत्याशयेनाह द्वाभ्यां परस्तस्मात्विति तपुनस्तस्माद्व्यक्ता-
हिरण्यगर्भदेहात् देहस्याचेतनप्रकृतिकार्यत्वात्कार्यकारणयोरभे
दविवक्षयाऽचेतनप्रकृतिरूपादित्यर्थः उत्कृष्टोऽन्यो विजातीयस्तद्वि
लक्षणः भावः प्रकृतिवियुक्तश्चेतनपदार्थः सनातनः जन्मशून्यत्वेन
नित्योऽव्यक्तः प्रत्यक्षादिप्रमाणेन नव्यज्यते इत्यव्यक्तः नव्यक्तोऽव्यक्तः
स्वानुभवैषः ईदृशो यो भावः प्रकृतिसंबंधरहितः प्रसंगात्स्वरू-
पः सः सर्वेषु आब्रह्मभुवनं लोकपर्यन्तेषु भूतेषु वियदाद्यचेतन- ति २०
वैषु नष्टपत्सु सत्सु स्वस्वकारणेलयंगतेषु सत्सु न विनश्यति नाशंन प्राप्नो-

गी॰ + एवमवस्थानां भूतानां नत्ववर्तिनो जन्मनश्च मधुसूदनी टीका ॥ तु निविनाशप्रदर्शनेनाक्षरभुवनाल्लोकाः पु नर्
तद्व्याख्यातं अधुना मायोपाध्यन्तः कौन्तेय पुनर्

टी॰ अ॰ विद्यते इत्यत + तस्माच्चराचरस्थूलसूक्ष्मप्रपंचकारणभूतात् हिरण्यगर्भाख्यादव्यक्तात्परो व्यति-

व्याचष्टे द्वाभ्यां ॥ + रिक्तः श्रेष्ठो वा तस्यापि कारणभूतः व्यतिरेकेपि सालक्षण्यं स्यादिति ने-
त्याह अन्योऽत्यन्तविलक्षणः न तस्य प्रतिमा अस्तीति श्रुतेः अव्यक्तोऽरू-
पादिहीनतया चक्षुराद्यगोचरो भावः कल्पितेषु सर्वेषु भावेषु सद्रूपे-
णानुगतः अत एव सनातनो नित्यः न तु हैरण्यगर्भादनित्यादव्यक्ता-

+ नित्यात् पादेयत्वे नित्यस्याव्यक्तस्य वैलक्षण्यं दर्शयति एतादृशो यो भावः स
हिरण्यगर्भादिषु सर्वेषु भूतेषु नश्यत्स्वपि न विनश्यति उत्पद्यमानेषु
पि नोत्पद्यते इत्यर्थः हिरण्यगर्भस्य तत्कार्यस्य भूताभिमानिनो वा तदुत्प-
त्तिविनाशाभ्यां फलाविवेकोत्पत्तिविनाशेन वृतन्दनभिमानवतोऽका-
र्यस्य परमेश्वरस्येति भावः २० ॥

सदानंदी टीका ॥

एवंक्लेशवतां जनानां स्वकैश्वर्यं तं भगवद्भक्तिहीनानां आवृत्ति-
मधुना तद्ये भगवद्भक्तिनिष्ठास्ते यं प्राप्यास्मिन्भवांबुधौ न पतन्ति वि-
मुक्तास्तत्स्वरूपं दर्शयन्नाह तस्माच्चराचरस्थूलजगद्धेतोर्विधेयं-
रः अतिरिक्तोऽथवा श्रेष्ठो हेतुभूतो विधेरपि न तस्य प्रतिमास्तीति
श्रुत्यात्यन्तविलक्षणः अव्यक्त इंद्रियातीतो रूपस्पर्शादिवर्जितः अ-
पालेषु समस्तेषु कार्येष्वनुगतोऽक्षरः नित्यो य ईदृशो भावो नूर्ध्व-
त्वप्यविलेषु च भूतेषु जायमानेषु न नश्यति न जायते स हृदि हिरण्य-
गर्भस्य कार्यस्यान्नाभिमानिनः तदुत्पत्तिविनाशाभ्यां पूर्वोक्तस्यानाप्त-
जन्मनो अधिष्ठानस्य सत्यस्याव्यक्तस्याकृत्रिमस्य च परमेश्वरस्य
स्तो नोऽस्ति जन्मादिविक्रियाः २० ॥

नीलकंठी टीका ॥

एवंविधभूतानां नानामाहत्यं विवाद्याय यस्मान्नानामाहतिनीलितं त-
तेः परमव्यक्तस्यप्रपंचं तं वस्तु लक्षयति परस्तस्मादिति त्रिभिः परः इति
तस्मादव्यक्तात् भूतग्रामबीजभूतादविद्यालक्षणादन्यात् अन्योऽत्यन्त-
विलक्षणो भावः सत्ता तथा ब्रह्मरामाभिमतं सन्मात्रमात्मानं वारयति न तस्य

तामासादिभ्यो व्याहृतत्वात् अस्य च सर्वानुगतत्वात् सनातनो नित्यै
कद्रूपः उपाधिमान् हि उपाधिविक्रियया नित्यं विक्रियत इव भाति अ
यं त्वनुपाधित्वान्नित्यैकरूप एव यः स भावः सर्वेषु भूतेषु वियदादिषु न
श्यत्स्वपि न विनश्यति केवलसत्तारूपत्वात् एतेन तस्य कालत्रयाबाध्य
त्वेन सत्यत्वं चोक्तं २० ॥
तदेवं प्रकृतिलयपर्यन्तं बन्धं आनन्दीटीका उपदिश्य यत्कैवल्यधाम तदेवोपदिश
ति तस्माद्भूताभूतप्रलीयमानाव्यक्तविंशतिसंख्यानादव्यक्तादप्रलीयमा
नो नित्यः परः प्रकृतेरतिरिक्तः अव्यक्तः पुरुषाख्यः सनातनः प
रिणामशून्यः भावः सत्तामद्रूपः स तः सर्वेषु भूतेषु लिंगाद्येषु प्र
पु^ कृत्यादिसर्गान्तेषु नश्यत्स्वपि न विनश्यति २० ॥ नं^
एतदर्थप्रतिपादनप्रसंगेन सर्गप्र रामकंठीटीका लयस्वरूपं प्रतिपादानीमत्र तिपुत्रायेन कारणेन तनुहनरा वं तेनेतत्प्रतिपादयितुमा
ह- तस्मादव्यक्तसंज्ञाज्जगत्कारणत्वेनावभासितात्पदार्थान्तरप्राधाना
ख्यात् परः पुनरन्यो विलक्षणो भावः परमार्थसमदार्थो वियन्निति शे
षः कीदृशोऽव्यक्तोऽव्यक्तः व्यक्तकारणत्वेन प्रधानापेक्षयाव्यक्तं प्रधा
नात्मकं वस्तु यस्मात्तथाविधं विवर्त्तितेश्वरस्वरूपतामाववशात्किलाव्य
क्तव्यवहारोऽयं प्रतीयते यदि वाऽव्यक्तोऽव्यक्तस्येति विशेषणेन प्रप
ञ्चाख्येयमत्र सदृशो भावो निरोदितप्रकाशात्मकतयैव सर्व तमा^
मिदं प्रकाशयन्नव्यक्त एव मायावशात् सर्वस्य तथा प्रतिपन्नभावादि
व्यक्तः तथा सनातनः सदा सर्वकालं भवतीति सनातनो नित्यः की
दृशोऽसौ समस्तेषु जडचेतनभेदेन द्विप्रकारेषु वाऽन्तरभेदादपरिमित
प्रपंचेषु भूतेषु प्राणिषु नश्यत्स्वक्रमप्रकारेण प्रधाने प्रलयमनुभ
वत्सु न नश्यति नित्योदिता॰ हैन चित्प्रकाशात्मकत्वादिव्यपदेशात्
याति ऽतोऽन्यत्वाभावता तत्कस्मात्त्रोपलभ्यत इत्याह २० ॥
एवं प्रलयं गतानामप्युत्पत्तिकी ...मीटी॰ विधाहृतानां सं "क्ता सारूप्यं गतानामागतं प्रतिपाद्य इदानीं भगवद्भावमापन्नानां मुक्तानां गतागताभावं विवक्षुरात्मनः प्रलयकालेऽपि विनाशाभावमाह ॥+
+ तथा ह्यभूतवैलक्षण्यार्थः तस्माद्भूतग्रामबीजभूतादव्यक्तात्प्रधाना
त्वोऽदृश्यो विलक्षणः परः स्वात्मान्याऽदृष्टो भावः सद्रूपश्चात्माख्योऽव्य
क्तोऽतीन्द्रियः सनातनो विनाशहेतुषु सत्स्वपि विनाशानर्हो योऽस्ति स
र्वात्मा सर्वेषु भूतेषु स्थावरजंगमात्मकेषु प्राणिषु विनश्यत्स्वपि
न विनश्यति तस्मात्तद्भावमापन्नानां प्रलये न विनाशप्रसंगः

गी॰ [illegible]
टी॰ [illegible]
ग्र॰ [illegible] २० ॥

पंचोलीटीका

एवं ब्रह्मण अहोरात्रे कालान्तरमित्यादिना आगमापायौ दर्शितः इत-
नौ तस्य स्वरूपमाह परस्तस्मादिति द्वाभ्यां तु पुनः तस्मात् पूर्वो-
क्तादव्यक्तात्परः प्रकृष्टः सनातनः चिरंतनः अव्यक्तः इंद्रिया-
द्यगोचरः भावोऽन्यस्तस्माद्भिन्नलक्षणः व्यक्ताद्भिन्नलक्षणो यः स
सर्वेषु ब्रह्मादिस्थावरान्तेषु नश्यत्सु न विनश्यति २०

रसावीरसमिद्धोधिनी॥

अथ परमेश्वरमेव धारणां विधाय स्ववर्णाश्रमोचितकर्मनि-
ष्ठस्य प्रयाणकाले परमेश्वरसायुज्यं च गतस्य पुनरावृ-
त्तिर्यथा भवति तथा प्रतिपादयितुमेवाह परइति तस्मादु-
क्तलक्षणाद्ब्रह्मलोकाधिपतेः प्राणानंदात्मकात्परस्तु उत्कृ-
ष्टोऽन्यो विलक्षणो यो भावः परमेश्वरलक्षणः पदार्थो विद्यते
अतिशयः कीदृशः अव्यक्तः अव्यक्तस्य स्वकर्मनिष्ठानैः स्वमतैः
दृश्यः तदितरैस्तु अदृश्यः तथा सनातनः सनासर्वकाले
भवतीति सनातनो नित्यः स सर्वेषु भूतेषु ब्रह्मादिकीटपर्य-
न्तेषु चराचरप्राणिषु नश्यत्सु महाप्रलये तथा न प्राप्तेषु म-
प्रलये सत्स्वपीति यावत् न विनश्यति प्रलीनत्वादिव्य-
पदेशं न प्राप्नोति एतदुक्तं भवति प्राणानंदस्य देवयुगसह-
स्रपरिमाणावच्छिन्नादेशराजकलनया चरमत्वेषु कपायु पम-
तिवायविनाशमति तस्मालोके प्राणानां सभूतानामपी या-
तेन विनाशोनदेहांतरप्राप्तिन्यायसिद्ध मम तु नित्यत्वेन वि-
नाशाभावे सति स्वकर्मानुष्ठानद्वारा मत्सारूप्यं प्राप्तानां च त-
याभावे यायाते पुनरावृत्तिरपि न्यायसिद्धेति नात्र देहन्वेषयो-
भवितव्यमिति २०॥

मधुमाख

२०॥

भाषा अनुवाद टीका ॥

सकल लोक की अनित्यता दिखाय अब दो श्लोक से परमेश्वर का नित्यत्व विस्तार करि कहते है कि सोई चराचर की कारण रूप प्रकृति से पर अर्थात् इनका भी कारण स्वरूप औ इससे भिन्न वस्तु आदि का अगोचर भाव जो अनादि पुरुष सो यावत् कार्य कारणरूप भूत मात्र का नाश होने से भी नष्ट नहीं होते हैं २०

दोहा

तापर और अव्यक्त है व्यक्त सनातन जोय जो सम भाव है
नष्ट में नष्ट हि होत न सोय २० ॥

110

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्रा।
प्य न निवर्तन्ते तद्धाम परमं मम २१ ॥

शाङ्करभाष्यटीका

अव्यक्त इति योसावव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावं आहुः
परमां प्रकृष्टां गतिं यं भावं प्राप्य गत्वा न निवर्तन्ते संसाराय तद्धाम स्थानं
परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः २१ ॥

आनन्दगिरिकृतटीका

यथोक्तेऽव्यक्ते भावे श्रुतिसम्मतिमाह अव्यक्त इति तस्य परमगतित्वं सा।
धयति यः प्राप्स्यति योसावव्यक्तो भावो वाच्य दर्शितः स येनाक्षरं पुरुषं वे
द सत्यमित्यादिश्रुतावक्षर इत्युक्तः तं वाक्षरं भावं परमां गतिं पुरुषान्न परं
किञ्चित् सा काष्ठा सा परा गतिरित्याद्याः श्रुतयो वदन्तीत्याह योसाविति पर
मपुरुषस्य परमगतित्वमुक्तं व्यनक्ति यं भावमिति तद्विष्णोः परमं पदमि
ति श्रुतिमत्र सम्वादयति तद्धामेति २१ ॥

स्वामिकृतटीका

यद्वाह अविनाशीप्रमाणं द
यो भाव अव्यक्तः अतीन्द्रियोऽक्षरः अवेप्रनाशश्च इति तथाक्षरात्संभवती
ह विश्वमित्यादिश्रुतिष्वक्षर इत्युक्तः तं परमां गतिं गम्यपुरुषार्थमाहुः
पुरुषान्न परं किंचित् साकाष्ठा सा परा गतिः इत्यादिश्रुतिः परमगतित्वमा
ह यं प्राप्य पुनर्न निवर्तन्त इति तच्च ममैव धाम स्वरूपं अहमेव परमा गतिरि
त्यर्थः २१ ॥

पिशाचभाष्यटीका

अव्यक्तोऽक्षर इति अव्यक्तः प्रत्यक्षादिप्रमाणागोचरः अक्षर इत्युक्तस्तम
व्यक्तमाहुः यं भावं प्राप्य न निवर्तन्ते संसारं भवतरंति तत्परमं धाम २१

रामानुजभाष्यटीका

अव्यक्त इति योऽव्यक्तोऽक्षर इत्युक्तः येनाक्षरमनिर्देश्यमिति कूटस्थोऽक्षर

गी· टी·अ· इत्यादिश्रुतेर्वेदविदः परमां गतिमाहुः अयमेव यः प्रयाति स जन्देहं स या
तिपरमां गतिमित्यत्र परमगतिशब्देन दिष्टोत्तरः प्रकृतिसंसर्गविमुक्तस्व
रूपेणावस्थित आत्मेत्यर्थः यमेवंभूतं स्वरूपेणावस्थितं प्राप्य न निवर्तन्ते त
न्मम परमं धाम परमं नित्यं मम स्थानं अचेतनप्रकृतिरेकं नित्यं मम स्थानं
तत्संसृष्टजीवरूपा प्रकृतिर्द्वितीयं नित्यं मम स्थानं अचित्संसर्गविमुक्तस्व
रूपेणावस्थितं परमं नित्यं मम स्थानमित्यर्थः तदेवापुनरावृत्तिरूपं अथ
वा प्रकाशवाची धामशब्दः प्रकाशश्च ज्ञानमभिप्रेतं प्रकृतिसंसृष्टानाम
रिच्छिन्नज्ञानरूपादात्मनो परिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परं धाम

अभिनवगुप्तकृतटीका [illegible] ।। सर्वश्लोक उक्तार्थम् २१

परमार्थप्रपा टीका ।।

अथाविनाशित्वे प्रमाणं दर्शयति अव्यक्त इति योयं पूर्वमव्यक्तः सनात
नो भाव उक्तः स अक्षर इत्युच्यते न क्षरतीत्यक्षरस्तमक्षरं परमां गतिमा
हुः तं कं यं प्राप्य योगिनो न निवर्तन्ते तन्ममैव परमं सर्वोत्कृष्टं धाम स्वरू
पमपि ज्ञातेन ज्ञानेनैवेत्यर्थः २१ ।।

वनमाली टीका ।।

अव्यक्त इंद्रियागोचरः केवलमौपनिषदो न क्षरति न विकारं प्राप्नोतीत्य
क्षर इत्यत्राव्यक्तस्तमाहुः श्रुतयः स्मृतयश्च पुरुषान्न परं किंचित्सा
न्यनु· काष्ठा सा परा गतिरिति मत्तः परतरं नान्यत्किंचिदस्ति धनंजयेति च परा
मां गतिं परमं प्राप्यं मामेवाहुरित्यर्थः निरस्ताविद्याः संतः तं प्राप्य सि
द्धा न निवर्तन्ते तेन संसारिणो भवंति तद्धाम स्वरूपं परमं सर्वनियामक
मनेन सह्णं मम स्वरूपं राहोः शिर इतिवद्भेदषष्ठी यद्वा धाम लोको
वैकुंठाख्यः प्राकृतस्वभाववर्जिते लक्ष्म्याकौशोष्ठनित्यप्राकृतेभ्यश्च
प्राप्या भगवल्लोकाः [illegible] पि देव आसीत्तदेवानां देहं देहपत्रे देवाना
परमेष्ठिमनन्तहिंसाः सापि मन्यो वा जाग्रवांसः समिधे यत्र पूर्वे साध्याः
संति देवाः न हि क्लाः परमपदं सदा पश्यंति सूरयः सोपुनः पारमा

प्रोतिनहिंस्राः परमंपदमितिनिदिश्यते: इहैवनृऋषिभिस्तस्यपुत्रोयत्रब्रम
वस्थितः यत्रगत्वानशोचंतितिनहिंस्राः परमंपदंयमाहुः सर्वभूतानांप्र
कृतेः प्रकृतिंध्रुवं अनादिनिधनंदेवंप्रभुंनारायणंपरं ब्रह्मणःसदा
नातस्यपरंस्थानंप्रकाशते नदेवाअपि पश्यंतिसर्वतेजोमयंशुभ
अप्रस्यकानलट्टोप्रततस्थानेविस्तामहात्मनः स्वैर्येवप्रभयाराजनदुः
प्रेक्ष्यंदेवदानवैः यत्रभूतेश्वरस्तातसर्वप्रकृतिरात्मभूः आसयस्तवेधू
नातिसूक्ष्मियाभिर्राजते नात्रब्रह्मर्षयस्तातज्ञानपद्मरूपिणः आमुव
तिगतिंहितांपतीनांक्रतूमनम नतंजेष्णुतीषिसर्वाणिआप्यभास्वा
तिर्णोऽव स्वयंप्रभुरचिंत्यात्मातत्रप्रतिराजते यतयस्तत्रगच्छंतिम
किंनारायणंहरिं येरणतपसायुक्ताभाविताःकर्मभिःशुभैः योग
सिद्धामहात्मानस्तमोमोहविवर्जिताः तत्रगत्वापुनर्नेमंलोकमा
योनिभारत स्वयंभुवंमहात्मानंदेवदेवंजनार्दनं स्थानमेनत्का
हाभागध्रुवमत्ययमव्ययं अविराहितानतप्यतइतिमहाभारता
युक्तेस्य नचजयविजययोःपुनराहृतिःप्रसिद्धा तयोःप्रकृतिभा
गासहविलोकद्वारपालकत्वेनप्रकृतस्यस्पृहाविलोकेप्रागमत्वात् ध
स्तलिंगदेहानामेवहिमहावैकुंठेगमनेनवतेषांपुनःप्राकृतदेहसंभव
ना पकैस्यवलोकस्यसभागंविशेषोलोकांतरमेववेदेतन २८

कृस्नमवैजयन्ती टीका ॥

किंच अव्यक्तइतिचेवतत्त्वमनिर्दिश्यंकूटस्थोःनरुच्यतेइत्यादिपुया
भावोऽव्यक्तोऽस्मातिसूक्ष्मत्वाएकस्वरूपत्वात्प्रत्यक्षाद्यगोचरः अणोल
षष्मात्माचेतनसोवदितव्यइतिश्रुतेः अक्षरमक्षटेकरसस्वरूपइतिप्रकृ
तिरहितात्मस्वरूपोमयोक्तः कथितःतेभावमात्मानंपरमांनिमह
पेगतिप्राप्यवेदान्ततो आकुर्वंतिनवीश्वरमज्ञाजीवमेवपरमांग
तिकेनदेहेनुनावर्ततीत्यपेक्षायामाह यमितिं यंभावंप्रकृतिविधुक
मात्मस्वरूपंप्राप्यनिवर्ततेतेनरूनास्त्वतःसकाशात्पुनःसंसारेन
प्राप्नुवंतीत्यनेनैवदेहेनेत्यर्थः ननुतदेवकृतइत्यत्राहतदितियतोरे
नोर्ममकेशशायपरतिकरवंदितचरणपीठस्यसर्वेवेदान्तवेध
स्यजगदभिन्नाभिन्ननिमित्तोपादानकारणस्यसर्वेश्वरस्यनतमारथ्येलात्र

गी० कृतिसंबंधरूपेणात्म स्वरूपेणावस्थितं परमं प्रकृतिपुरुषाज्जीवाद्

टी० अ० त्कृष्टं नित्यमुक्तस्वरूपं धाम स्थानं येन न शान्तिं न नित्यमेव मम विष्णोः

स्थानमित्यर्थः २१ ॥

मधुसूदनी टीका ॥

यो भाव इहाव्यक्त इत्युक्तोऽक्षर इति चोक्तोऽपि श्रुतिषु स्मृतिषु च तं भाव

माहुः श्रुतयः स्मृतयश्च पुरुषान्न परं किंचित्सा काष्ठा सा परा गति

रित्याद्याः परमामुत्पत्तिविनाशशून्यस्वप्रकाशपरमानन्दरूपां गतिं पुरुषार्थ

विश्रान्तिं यं भावं प्राप्य न निवर्तन्ते पुनः संसाराय तद्धाम स्वरूपं मम विष्णोः परमं

सर्वोत्कृष्टम मया मितिराहोः शिर इति वेद्रूटकल्पनया षष्ठी अतो

हमेव परमा गतिरित्यर्थः

२१ ॥

सदानंदी टीका ॥

यो भाव इहवाव्यक्त इत्यक्षर इतीरितः न मम उत्पत्तिविनाशाभ्यां शून्य

मानंदमव्ययं पुरुषार्थस्य विश्रान्तिं संज्ञाहुः परमां गतिं श्रुतयः स्मृ

तयश्च पुरुषान्न परं त्विति यं भावं प्राप्य भूयो न निवर्तन्ते जन्मने न त्

त्स्वरूपं परं विष्णोर्मम सर्वोत्तमो न मे अतोऽहमेव वेदान्तगम्यास्मि

परमा गतिः २१ ॥

नीलकंठी टीका ॥

अव्यक्तो न व्यज्यत इति दृश्यत्वेन निरस्तं प्रलये सुप्ते व्याप्नोतीति विषया

परिच्छेद्यमनसः के तं भावं परमां गतिं ब्रह्मलोकान्तां गतिरपरमा

कार्यत्वात् इयं तु परमा कार्यकारणातीतत्वात् आहुः एतस्य परमा गति

रित्यादयः श्रुतयः यं भावं प्राप्य न निवर्तन्ते पुनः संसारेन पतंति नद्धिति

विधेयापेक्षं क्लीवत्वं स एव मम विष्णोः परमं पदमिति श्रुतिप्रसिद्धं निष्कलं ब्रह्म २१ ॥

तद्धिष्णोः परमं पदमिति श्रुतिप्रसिद्धं निष्कलं ब्रह्म २१ ॥

आनंदी टीका

परत्वं वेदवेद्यो वदन्नीत्यादिय इत्युक्तेनाव्यक्तः पुरुषः परोऽक्षरः प्र

त्वाद्रस्वात्मकः तमाहुः परमां गतिम् ततः परमसद्भक्तत्वे नास्ति
सर्वेषां तत्रैव परिनिष्ठितत्वात् ततविलक्षतीनो प्रकृतिरिवासो गत
परमते: विश्रान्तिपदत्वात् पदं केनचिदपि वर्णयति यं प्राप्य न निव
र्तन्ते तद्धाम परमं मम मम परमात्मस्वरूपस्य षड्विंशस्य महाविभोः न
तु धाम परमं मितिस्वाभिन्नम् ततब्रह्मादिस्थानवत् स्थानिनो मयः को
पि देशः स्मर्यः [illegible] २१ ॥

रामकंठी टी॰ लभ्यत इत्याह ॥
ऊनोत्पन्नाभावात्तत्कस्माज्ज्ञेप
अचिन्त्यस्वमायाशक्तिमोहितानामनियथास्थितेन तु निमेन रूपेणाप्र
थमानत्वादव्यक्तः परमार्थतः पुनरक्षरेण नक्षरतीति स्वात्मस्वरूपाप्र
च्यवतत्वात् यद्वैव वियोगभावत्वात् परमां गतिमनुत्तरां शाश्वतमाहुः त्व
विदः अत एव कीदृशं तं यं प्राप्य सायात्मत्वेन प्रतिपद्य प्रशान्तमा
यान्तरस्य हाय योगायोगिनो न निवर्तन्ते पुनः संसारसरणिनाव
तरन्ति यतस्तथा वियोगभावत्वात् परमस्वरूपः परमकारणं
स्य परमेश्वरस्य धाम तिमोदितः प्रकाशो निरुपमं स्थानं वा तत एवं
विधं मायेयप्रपञ्चात्तेन पुनरावर्तन्ते इति [illegible]
[illegible] २१ ॥
[illegible]

लास्तिकी [illegible] टी॰ प्रलयकाले विनाशो माभूत् सृष्टिकाले त्वभिव्यक्तिरूपा
नन्दात्मभावमापन्नानां पुनराहृतिरस्तीत्यत आह ॥
योऽव्यक्त इति भावो मयोक्तः शाश्वतः सोऽक्षरः स्वस्वभावादप्रच्युतो वि
मर्शाख्य स्वात्माद्यकः नाम्य: विमर्शरहितो भावः न तु तत् स्वभावम
वभासस्य विमर्शविरहे यथा प्रकाशोऽर्थेपरके पिस्फटिकादिजडोपम
इति तमेवात्तरं विमर्शाख्यं परमां गतिमनुत्कृष्टं मोक्षस्य प्राप्यपाय।
माहुः श्रुतयः स्वतपस्य तथाच श्रुतिः शान्तात्मस्वयमेतेनिनामयः प
स्याविमुक्तये इति पुरुषान्नपरं किंचित्सा काष्ठा सा परा गतिरिति
व यमक्षरस्वरूपं भावं शाश्वतात्मत्वेन प्रतिपद्य योगिनो न निवर्तन्ते।
पुनः संसारसरणिं नावतरन्ति तमक्षरस्वरूपं मम परमेश्वरस्य सर्वा
त्मकस्य परमं धाम स्वरूपं न तु मत्तो भिन्नम् अत आत्मभूतानां विदे
हमुक्तानां वैष्णवात्ममापन्नानां सृष्टिकाले न पुनराहृतिरस्ति [illegible]

श्री॰
गी॰ टी॰
अ॰

[illegible]
[illegible] २१॥

पंचोली टीका

अविनाशिप्राप्तिमार्गं दर्शयन्नाह अव्यक्तेति यो सोऽव्यक्तः अक्षरः इत्युक्तः तमक्षरसंज्ञं परामुत्कृष्टां गतिमाहुः यं अक्षरं प्राप्य संसारायनिरंतरागत्न निवर्तन्ते तद्धाम स्थानं परमुत्कृष्टं मम विष्णो पदम् २१

113

रसावीरमसिह्वोधिनी॥

एतदेव विनिगमयंस्तस्याप्त्युपायं निश्चयद्वारेणाह अव्यक्त इति तमाहुः परमां गतिमित्युत्तरवाक्यस्थेन तच्छब्देन यच्छब्द आक्षिप्यते यत्तदोर्नित्यसंबंधात् तथाच यो भावः अव्यक्तः अक्षर इत्यनेन प्रकारेणोक्तः प्रतिपादितः पाठान्तरे इति शेषः कोऽर्थः शरीराभावाद्रूपादिरहितत्वादव्यक्तः साक्षादिंद्रियैरनुपलभ्यः अक्षरो नित्यः सदैकस्वभावत्वात् अथच अव्यक्तोऽपींद्रियैरमतरुत्य न्तरः शरीरी शरीरवत्तथापींद्रियरमणं संभवतीति शरीरीति पर्यवसितं उक्तदमनायपंचेंद्रतशरीरोपीत्यर्थः तं परमं स्वरूपाविर्भावं तमेव परमं सर्वोत्कृष्टां गतिं प्राप्यमाहुः बुद्धिमंत इति शेषः अत एव च यद्धाम प्राप्य जनाः न निवर्तन्ते तत्परमं सर्वोत्कृष्टं मम धाम स्थानं भवतीत्यर्थः अथ चैतमपरथा व्याख्या मद्धामं अव्य परममित्युत्तरार्धं प्रतिपूतकोऽयमुत्तरेण रूपव्यापारविविषद्वयविधायकोवेदभागोऽक्षरमाहात्म्यं इति प्रतिपादितं तत्पर्यायाक्षरएव वाच्यं इति कोऽर्थः प्रागुक्तनयेनाक्षरमाहात्म्याभिधेय पदेवैदोव्यक्तमाहेनाप्यभिधीयते ततश्चाव्यक्ताक्षरमाहात्म्य योगाविति स्थितं कुत्यति श्रेयस्य प्रकारैवैविस्मृतितिष्ठन्ते अत विष्णोः परमकारणात्सर्वैश्वरात्स्वरतिस्रवतेप्रकटीभवतीत्य तां तवैव अतः परमेश्वरादव्यक्तः प्रकटीभूत इत्यव्यक्तः य

निःश्वसितं वेद इति श्रुतिरत्र प्रमाणं एवं वाव्यक्ताद्व्यक्तयः सर्वाः
व्यक्ता अपि अहरागमे ब्राह्मदिवसस्फूर्तौ सत्यां सर्वा व्यक्तयो जीवजा
तयो व्यक्ता उद्भवन्ति प्रकटा भवन्ति उत्पद्यन्ते तथैव रात्र्यागमे ब्राह्मनि
शायां प्रवृत्तायां सत्यां तत्रैव तस्मिन्नेव यजुर्वेदे अव्यक्तसंज्ञके न व्य
क्तो व्यक्तः अप्रकटः परमेश्वरे एव प्रलीयन्त इति यावत् तादृशे संज्ञ
यस्य तस्मिंस्तादृशे सति परमेश्वर एव प्रलीने सतीति यावत् ताः स
र्वा व्यक्तयः सर्वभूतानि प्रलीयन्ते तेन तद्धिता भवन्ति स एवायं य एव पू
र्वकल्पे प्रभूत्य नष्ट आसीदित्यर्थः भूतग्राम इत्यत्र दृष्टाविर्योभीति
१४ कः सर्गो ब्राह्मादिवसेषु भूत्वा भूत्वा पुनः पुनः प्रकटीभूय रात्र्यागमे
दिवसरूपकल्पावसाने सति प्रलीयते तत्तद्धितो भवति दिनागमे च
रात्रिरूपकल्पक्षये प्रभवति प्रकटीभवति कीदृशोवशः अस्य स
र्वेश्वरस्य विसर्गे वशः आयत्तोस्वतन्त्र इति यावत् अत्य पराव्याख्याय
वैश्वरस्य विसर्गे वश आयमोस्वतन्त्र इति यावत् जीवानां चयजुर्वेदः प्रभवः परंपरया
स्तनार्थी विनास्वीकर्तव्या जीवानां च यजुर्वेदः प्रभवः पादिते एवं प्रकारेण
भवतीत्यन्ता हवन्ति भूतानीत्यत्र प्राक्प्रतिपादितं परं प्राप्नुवन्तीति न जिहितं यजुर्वेदे
तमव्यक्तसंज्ञकं यजुर्वेदं परमां गतिं परं प्राप्नुवन्ति तत्त्वं प्राप्य इति शेषः अ
ति परमां तां परमां गतिमुपायमाहुः यजुर्वेदं तत्त्वज्ञा इति शेषः म
तपवर्च तत्परमं धाम तेजो ममैव संबंधि भवति मयि
तपवच तत्परमं धाम्नः तेजो धाम तेजो ममैव संबन्धि भवति मयि
व स्वकीयस्तेजोधाता तेषु मामेव शरणं प्रपन्नेषु महावीरेषु समर्पि
तोस्तीति तात्पर्यं किं तत् यं यद्धाम तेजः प्राप्य पुनस्त्वं प्राप्य न निवर्त
ते संग्रामान्महावीरा इति शेषः प्राप्नुनजितैव जीवन्त एव भयशोक
मोहादिहेतोरणमध्यान्न पलायन्ते किं तु प्राप्नुं जित्वा तेरेव हता वा
संतो रणभूमिं त्यजन्तीति संग्रामकाले तु समये संग्रामादनिवर्तिन
इति यद्धामतेजो योनानुप्राणितामहावीराः प्राप्नुं जित्वा राज्यसुखं
वानुभूयांते महलोकान्न प्रत्यावर्तन्त इत्यर्थः २१॥

114

ਸਪੁਮਾਛ

੨੮॥

भाषा अनुवाद ॥

अब परमेश्वरके अविनाशित्वमे प्रमाण दर्शाय कर कहतेहैं किंजोभा
वरूप इन्द्रिय अगोचर प्रवेश नाश शून्य अक्षर स्वरूप परमेश्वर जि
ससे इस विश्वका उद्भव है औ श्रुति सब जिसको अक्षर कहती है कि
पुरुषान्न किञ्चित्पर सा काष्ठा परागतिः जोसब के पर और जिससे
पर कोई नहीं ऐसे श्रुति जिसको उत्कृष्ट गति कहती हैं और जिसको
पाय कर फेरि संसार गति नहीं होती वही मेरा स्वरूप है इससे
मैंही परमगति हों यह जानो २१ ॥

दोहा

अक्षर कहइ अव्यक्त जो परम गति कहो ताहि   जाहि मिलें नहि
फिरत हे सो परम धाम मम आहि २१ ॥

115

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्या
न्तःस्थानि भूतानि येन सर्वमिदं ततं २२ ॥

शाङ्करभाष्यटीका

तल्लब्धेरुपाय उच्यते पुरुषः पुरि शयनात् पूर्णत्वाद्वा स परः पार्थ परो
निरतिशयो यस्मात् पुरुषान्न परं किञ्चित् स भक्त्या लभ्यस्तु ज्ञान
लक्षणयानन्यया आत्मविषयया यस्य पुरुषस्यान्तःस्थानि मध्यस्था
नि कार्यभूतानि कार्यं हि कारणस्यान्तर्वर्ति भवति येन पुरुषेण सर्व
मिदं जगत्ततं व्याप्तं आकाशेनेव घटादि २२ ॥

आनन्दगिरिकृतटीका

नन्वव्यक्तादतिरिक्तस्य तल्लक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसा
धारणो हेतुरेषितव्यो यस्मिन् प्रेक्षापूर्वकारी तत्प्रेप्सया प्रवर्तेतानिहे
परस्य पुरुषस्य सर्वकारणत्वं सर्वव्या
प्नोति तत्राह तल्लब्धेरिति यस्येति निरतिशयत्वं विशदय
पकत्वञ्च विशेषणद्वयमुदाहरति भक्तिर्भजनं सेवा श्रद्धादिगुणा
ति यस्मादिति तच्छब्दोऽध्याहरणीयः ज्ञानाभक्तेर्विषयतो वैशिष्ट्य
माह लक्षणयेति आवर्तयति ज्ञानेनेति भक्तिस्तत्प्राप्तौ पर्याप्तेत्या
माह अनन्ययेति कोऽसौ पुरुषो यद्विषया भक्तिस्तत्राह कार्य
णां कैवल्यावस्थाचेष्टे यस्येति कथंभूतानां तदवस्थत्वं तत्राह येनेति २२ ॥
हीति स पर्यगादिति श्रुतिमाश्रित्याह

स्वामिकृतटीका

क्रमेणेत्याह स एवाहं परः पुरुषोऽ
नन्यभावभक्त्यैव गोपायुर मेवाह यस्य कारणभूतस्या
न्तःस्थापकं नभक्त्यैव लभ्यो नान्यथा परत्वमेवाह येन सर्वमिदं जगत्ततं व्याप्तं २२
तमेवम्भूतानि स्थितानि येन च कारणभूतेन सर्वमिदं जगत्ततं
[illegible]

गी·
टी·अ·

116

[illegible] २२ ॥

पिशाचभाष्यटीका

पुरुषःसपरइति यस्यांतस्था[illegible]भूतानि अंतस्तिष्ठंतीत्यर्थः येनाव्यक्तेनइदंसर्वंततंव्याप्तं २२

रामानुजभाष्यटीका

ज्ञानिनःप्राप्यंतस्मादत्यंतविभक्तमित्याह पुरुषइति मत्तःपरतरंना न्यत् मयिसर्वमिदंप्रोतं मामेभ्यःपरमव्ययंइत्यादिनानिर्दिष्टस्य यस्यांतस्थानिभूतानियेनचपरेणपुरुषेणसर्वमिदंततं सःपरःपुरुषो नन्ययाभक्त्यालभ्यः आत्मयाथात्म्यविदःपरमपुरुषनिष्ठस्यचसा धारणमर्चिरादिकांगतिमाह द्वयोरप्यर्चिरादिकागतिःश्रुतौश्रु ता साचापुनरावृत्तिलक्षणा यथापंचाग्निविद्यायांतद्यइत्थंविदुः येचेमेरण्येश्रद्धांतपइत्युपासते तेर्चिषमभिसंभवंत्यर्चिषोहरित्यादौअ र्चिरादिकयागत्यागतस्यपरंब्रह्मप्राप्तिरपुनरावृत्तिश्चोक्ता सएता न्ब्रह्मगमयतिएतेनप्रतिपद्यमानाइमंमानवमावर्तंनावर्तंतइति नच प्रजापतिवाक्यादितपरविद्यांगभूतात्मविषयात्तद्यइत्थंविदुरितिग तिश्रुतिः येचेमेरण्येश्रद्धांतपइत्युपासतेइतिपरविद्यायाःपृथक्छ्रु तिवैयर्थ्यात् पंचाग्निविद्यायांइतितुपंचम्यामाहुतावापःपुरुष वचसोभवंतीतिरमणीयचरणाःकपूयचरणाःइतिपुण्यपापहेतुः को मनुष्यादिभावोऽयमेवंभूतानामेतरसंस्पृष्टानामात्मनस्तन्नम त्रिंगमात्रमितिचिदचितोर्विवेकमभिधायतद्यइत्थंविदुस्तेर्चिषमभि संभवंति इमंमानवमावर्तंनावर्तंतइतिविविक्तचिदचिद्विषयत्वनीत्यात्मनया प्राप्यतयाचतद्यइत्थंविदुस्तेर्चिरादिनागच्छंति नचपुनरावर्तंतइत्युक्ता त्मप्राप्ते आत्मयाथात्म्यविदःपरमपुरुषनिष्ठस्यसएतान्ब्रह्म गमयतीतिब्रह्मप्राप्तिवचनात् अविद्यापुरुषं आत्मवत्स्वब्रह्मात्मक तयाब्रह्मशेषतैककरसमित्यनुसंधेयं परशेषतैकरसंत्वचयआत्मा।

नितिष्टन्यस्यात्मा शरीरमित्यादिश्रुतिसिद्धं २२ ॥ ॥

पूर्वश्लोकउक्तार्थस्य २२

अभिनवगुप्तकृतटीका

तत्त्वं व्यक्तं सर्वत्र
उक्तप्रकारं कालसंकलनाविवर्जितं तत्त्वं वासुदेवं
गतेनेव ध्यमकेऽदः प्राप्यत्वात् न च भक्तिलभ्यमित्यावेदितं प्राक्
नत्र संख्ये चैतन्य हि स्वयत्नलब्धविनाशरूपं सदा तथा भूते तत्र कः पु
नः शरीरस्य वृत्तिः शरीरस्य बाधः सहि मध्येन तत्स्वभावविच्छेदा ये
त्वः न च सद्यातनविच्छेदी विश्रान्तिरिति विश्वनिश्चलकपर
वेयत्वात् तत्स्वभावस्य परमेश्वरस्य तत्त्वावष्टम्भस्य येन स्वभा
वविच्छेदः कोपि कदाप्यस्ति अतो युक्त मेकं मामध्येयं ध्यातुं वि ... २१
पवं च सततमभ्यासेन येषां क्लेशो विनैव भगवदामित्त्वेषां हततमुक्तं

परमार्थप्रपाटीका

इति स एव परउत्कृष्टः पुरुषः एतावान
अथ तमेव विशिनष्टि पुरुषइति श्रुतेः स वा पुरुषः अनन्यया अ
स्य महिमा ततो ज्यायांश्च पूरुष इति यस्मात् तः यन्मध्ये सर्वा
व्यभिचारिणा भक्त्या लभ्यः पुनः सकइत्याह इदं दृश्यजातं तादात्म्यभावेन तत्तं वि
णि भूतानि संतितथा येन सर्वमिदं ... वेत्यर्थः २२ ॥
स्तारं ... प्राप्तं जलेन तरंगादिवत्

वनमाली टीका ॥

प्राप्यो हमि
सर्वोत्तमत्वं धीपूर्वकोपिविशिनष्टि प्रेमप्रवाहरूपया भक्त्यैव प्राप्यो हमि यान
त्याह पुरुषइति समस्तनिरतिशयगुणः पुरुषः सोहमेवानन्यया न भक्त्यैव लभ्यो
विषयेतरे विषयोयस्या तया अविच्छिन्नप्रेमप्रवाहरूपया भक्त्यैव लभ्यो
नान्यथा सकरस्य पल्ले यामाहयस्यपुरुषस्यांतः स्थानि भूतानि सर्वा
२४ णिपाकाशादीनि भूतानि गुणाधायनेइत्यर्थः येन पुरुषेणेदं सर्वमीवन्न
जातमकं जगत्तत्त्वमेयस्य किं विद्यतेऽस्मिन् दृश्येन व्याप्यते नपिवा अनेत
वहिश्चतत्सर्वं व्याप्य नारायणः स्थितः इत्यादिश्रुतेः सर्वसद्गुणसमूहो
नगाड इत्यादिकर्त्ता सर्वेश्वरो नन्यभक्तिं विनाऽप्राप्य इति भावः २२

२ गी॰ टी॰ अ॰

117

अथ वैजयन्ती टीका ॥ नत्यतिपद्यार्थदानीतानिनां
एवं कैवल्यार्थिनां प्राप्यं केवलमात्मस्वरूपं भक्त्यैव लभ्यमित्याह पुरुषः स परः
यत्प्राप्यं परमात्मस्वरूपं तत्त्वनन्यया भक्त्या लभ्यं सर्वेश्वरे मासा
पार्थेति हे पार्थ समर्थस्त्वमेनं यतस्त्वमनन्यया भक्त्या लभ्यं समर्थो न भवेदिति निश्चितम् ये
वष्टिमकरोस्तत्वतोऽन्यः कोपीदृशः किंचिदस्ति मयि सर्वमिदं प्रोत
मामेभ्यः परमव्ययमत्तः परतरं नान्यत्किंचिदस्ति मयि सर्वमिदं प्रोत
मित्यादिना मया कथितः स परः पुमान्नाचेतनप्रधानात्किंतु ह्युत्कृष्टः पुरु
षः परमप्राप्यो हे अनन्यचेताः सततमित्यादिनोदितयानन्यये
कांतिकया भक्त्यैव लभ्यो लभ्यांशकेरायोगामिश्रयात्र डःशक्यइस
र्थः ननु तस्य किं लक्षणमित्यपेक्षायामाह यस्येति यस्मादेकात्व
य॰ स्य जगतः प्रभवः प्रलयस्तथेत्यादिनोक्तलक्षणस्यांतर्मध्येतिष्ठंती
स्येतस्यानि भूतानि चेतनाचेतनानि भवंति ननु तर्हि किमाकाशः
ति॰ स्याघतस्तस्याप्यन्तस्थानि भूतान स्युरित्यपेक्षायामाह येनेति येन प
रमपुरुषेणेदं चेतनाचेतनात्मकं सर्वं जगत्ततं व्याप्तं आकाशस्या
चेतनासावयवेपदार्थे व्याप्तिस्त[illegible]पि निरवयवे चेतने तदसं
भवत्वात्तत्त्वद्भक्ताः कस्मिन्काले प्रयाताः सन्तोऽपुनरावृत्तिं यान्ति
त्वद्भक्तिरहिताश्च कस्मिन् याताः संतः पुनरावृत्तिं प्राप्नुवन्तीत्याशं
कायां कालशब्दोपलक्षितमग्निधूमनामकं मार्गद्वयमाह २२ ॥

इदानीमनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभ इति प्राग्
क्तं भक्तियोगमेव तत्र प्राप्त्युपायमाह॥

मधुसूदनी टीका

स परो निरतिशयः पुरुषः परमात्माहमेव अनन्यया न विद्यतेऽन्यो विष
यो यस्यां तया प्रेमलक्षणया भक्त्यैव लभ्यो नान्यथा। स क इत्यपेक्षा
यामाह यस्य पुरुषस्यांतःस्थानि अंतर्वर्तीनि भूतानि सर्वाणि कार्या
णि कारणांतर्वर्तित्वात्कार्यस्य अतएव येन पुरुषेण सर्वमिदं का
र्यजातं ततं व्याप्तं यस्मात्परं नापरमस्ति किंचित् यस्मान्नाणीयो न
ज्यायोस्ति कश्चित् वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषे
ण सर्वं यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा अंतर्बहिश्च तत्स
र्वं व्याप्य नारायणः स्थितः स पर्यगाच्छुक्रमिति आदिश्रुतिभ्यः सगु
णब्रह्मोपासकास्तत्पदं प्राप्य न निवर्तंते किं तु क्रमेण मुच्यंते तत्र

नलोकभोगाभ्यागु[illegible]मत्रसम्यग्दर्शिनां तेषां मार्गौ येन ज्ञायते न तत्सम्य
ग्दर्शिनामिव नष्टनये ह्रेतुपासकानां तल्लोक[illegible]ग्राप्तये देवयानमार्गउपा
दिश्यते पितृयानमार्गो यस्यासक्त नस्यत्तनये २२ ॥

सदानंदी टीका ॥

तस्मात्सोसाधनेन त्वमममक्तिरितीयेते सर्वोत्कृष्टः सपुरुषः परमात्मा
हमेवच श्रेमलनुलगायाभक्त्यातान नलक्षणायैववा लभ्योमिनान्यथाका
मकोटिभिः संचितैरपिवरुणः सर्वकोत्सीन्याकोदृत्यामाहमामतिः य
स्यापिष्टानभूतस्यान्तर्वर्तीनी वाविलान्यपि भूतानि कल्पितान्येव येन वि
स्वमिदंततं आकाशेनेवकुंभादिसोहमेववमहेश्वरः २२ ॥

नीलकंठी टीका ॥

एवं तेषां प्रयाणामिन्नेव ब्रह्मलोकान् जगत्कारणमुपासनीयमितोस्मदिमाह पु
रुषस्ति नशाहः एवंवेलल एवयोननार्थः हेपार्थ येयं भक्त्याराधनेन
उपासनेनेतियावत् कीदृशपाग्रनन्यया नास्त्यमोयस्यांसानया उपास्यो
पासकभेदमंतरेणाग्रहं यहहरूपयेत्यर्थः तयाभक्त्यायो लभ्यः सपरः पूर्वो
क्तादव्याह्वनानन्नगमादक्षरादसः कारणात्मेतियावत् लभ्यत्वादेवासाम
न्नमपि नह्यात्मावलभ्यस्वेतिश्रूयते अस्यकारणात्वमेव यस्येति य
स्यपुरुषस्यांतस्थानि वीजेडमरवत्सर्वाणि वियदादीनि स्थावरजंगमा
निवयेनचवरदेसर्वं ततंव्याप्तमनुपादानत्वात् सभक्त्यालभ्यनइतियोजना २२

आनंदी टीका

स्वरूपमाह ॥ सपरः पुरुषः परमः प्रकृतिसा
माश्यमनपुनर्जन्मलभन्ते योगिनो येन सपरः पुरुषः परत्वेन महूपक्षद्विंशकःपा
येतेभ्यः पुरुषेभ्योन्यः तिमपुरुषपुरुषस्वभावः परत्वेन सर्वोत्कयोगेन लभ्य
स्यभक्त्यालभ्यत्वनमयेतिविनस्यानम विषयत्वेन सर्वोक्तं[illegible]
मर्थः अस्यैवोपदेशार्थो यो यत्लक्षणात्माह स्वरूप[illegible]
[illegible]
[illegible]
[illegible]
परमपदप्राप्तियोग्याह ॥

रामकंठी टीका

नयाविधानां योगिनामपुनरावृत्तिकारणं प्रतिपादितम् तस्यैवयथोक्तस्यभावस्याह
स्यपुनिर्गमयंस्तत्राप्युपायंस्मारयन्नाह ॥

२२

गी॰
टी॰
ग्र॰

यएवयएषोक्षरस्वरूपोभावः सपरः सर्वेभ्योभूतातिरिक्तप्रभावत्वान्निरति
शयः पुरुषशब्दवाच्यः सर्वशरीराणि व्याप्यस्मात्पुरुषः परमात्माकी
दृश उक्तवत्समाराधनप्रकारेण येशाष्यानन्येन प्रतिलभ्यो गिनः श्रीकृ
ननानाविधसमाधिभेदाः पुनर्भूयोजन्मसंसारे नयोगन्तिं नलभन्ते।
नथापस्यैकस्यान्तः सामान्यसेविलक्षणादृष्टिस्थितानि सर्वाणिव
रभूतानि न हि तेषामेव ममोमभिन्नरूपतया स्फुरतामहयैकविभ्रा
शानुप्रवेशमन्तरेण सत्तासद्भावः अनएव यत्र यस्मिन्सकलजगमद्
यं सार्धं सामान्याधारे सर्वमिदं प्रतिष्ठितं कृतं व्यवस्थानम् सपुनरि
भूतो ममात्मा प्रतिपादितो नरो नरप्रकृष्टानन्तादित्यानि पर्यन्तवत्तरव
रूपयामेवयालभ्यः प्राप्यः कीदृश्यानन्ययानत्स्वरूपव्यतिरेकेण सर्वा
वस्यास्वः विद्यमानमन्यदालम्बनं यस्यास्तयानन्यया विषयेति
[illegible]
नन्वात्मभूतविदेहस्तु लासिकी [illegible] २२ ॥

मापद्यन्तेचेत्तर्हिकि
मितिनजीवन्नपव
तैवेष्वात्मप्रपलभ
नेश्वनवाह ॥

[illegible]टीका किमापत्स्यमानादेहं परित्यज्यैवे

सप्रसिद्धः परोत्तरात्मापत्तयापूर्णत्वाद्वा उत्कृष्टः पुरुषउत्तमः पुरु
विश्वात्माईश्वराख्यः तरत्तरात्मनो व्यतिरेके अनन्ययानविद्यते स
र्तिनिवारणादियस्यांनया एकान्तयाभक्त्यानुरागेन लभ्यः प्राप्तं शं
परत्वमेवाह यस्योत्तमपुरुषस्यान्तर्मध्ये भेदेनस्थितानि भूतानि येन
वकारणभूतेन सर्वमिदं जगत्ततं स्वरूपतयाव्याप्तम् अतः परयाभ
क्ताविनाजीवन्मुक्तिर्दुर्लभा [illegible]
[illegible]
[illegible] २२

पंचोली टीका

नत्प्राप्त्युपायमाह पुरुषइतितपुनः सपरः निरतिशयः पुरुषः
पूर्णाश्वअनन्यया आत्मविषयया भक्त्याज्ञानलक्षणयालभ्यः यस्य
कारणरूपस्यांतः स्थितानि मध्येस्थितानि भूतानि भूतकार्याणि भू
पाणि महदादिशब्दवाच्यानि येन सर्वमिदं जगत् व्याप्तं यस्य सर्वगतं हि कं का
रणादिकार्यं व्याप्यते २२

अथ तत्स्वरूपप्रतिपादनपूर्वकं तत्प्राप्तेः सुकरमुपायं कथयति
पुरुषइति सोऽहंपरः पुरुषः पुरुषोत्तमः अनन्याविषययासाधार
णयाचभक्त्यासर्वात्मत्वस्याराधनयालभ्यः प्राप्योऽस्मि सः कः
यस्य ममांतः स्थानि उदरदरीगतानि सर्वाणि भूतानि भवंति येन
चमया इदं सर्वं भूतकदंबकं ततं व्याप्तमधिष्ठितमित्यर्थः परमे
श्वरविषयदृढभक्तिपूर्वस्ववर्णोचितेष्टादिव्यापारेप्रवर्तमानैः
कर्मयोगिभिर्भक्तिरपिसुलभैवेतिभावः २२॥

मधुभाष्य

पुरुषइति यत्कालाद्यभिमानिदेवतागता आहत्यनाह
नीगच्छंतिता आह २२॥

119

भाषा अनुवाद ॥

इस परमेश्वर की प्राप्ति मे भक्ति ही सबसे बढि के परम उपाय है इसको कहते है कि सोई परमपुरुष मे अनन्त भक्तिसे मे मिलताहू और अब प्राप्तव्य पुरुष की श्रेष्ठता कहतेहैं कि जिस पुरुष मे ये भू त सकल स्थितहैं और जो कारण रूपसे समस्त जगत मे व्याप्त रहा है सोइ मैहूं २२ ॥

दोहा

हे पार्थ परपुरुषसो अनन्यभक्त मिलेंजोय जाकेअंतर्भूत सभजासें विस्तर होय २२॥

118

यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः प्रया
तायान्तितंकालंवक्ष्यामिभरतर्षभ २३ ॥

शाङ्करभाष्यंटीका ॥

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां
तन्ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति यत्र काल इत्यादि विवक्षि
तार्थसमर्पणार्थमुच्यते आवृत्तिमार्गोपन्यास इतरमार्गस्तुत्यर्थः यत्रे
ति यत्र काले प्रयाता इति व्यवहितेन सम्बन्धः यत्र यस्मिन् काले त्व
नावृत्तिमपुनर्जन्म आवृत्तिं तद्विपरीतां चैव योगिन इति कर्मिणश्चो
च्यन्ते कर्मिणस्तु गुणतः कर्मयोगेन योगिनामिति विशेषणात्
तत्र विभज्यते योगिनः यत्र काले प्रयाता मृता योगिनो नावृत्तिं या
न्ति यत्र काले च प्रयातास्ते आवृत्तिं यान्ति तं कालं वक्ष्यामि भरतर्षभ २३

आनन्दगिरिकृत टीका ॥

ननु ज्ञानायत्ता परमपुरुषप्राप्तिरुक्ता न च ज्ञाने मार्गमपेक्ष्य फलाय
कल्पते विदुषो गमनकालनिषेधोक्तेः तथा च मार्गोक्तिरयुक्तेत्याशं
क्य सगुणशरणानां तदुपदेशोऽर्थवानित्यभिप्रेत्याह प्रकृतानामिति
वक्तव्य इति यत्र काल इत्याद्युच्यते इति सम्बन्धः सचेद्वक्तव्यस्तर्हि
किमित्याख्यानादिभावेन सविशेषं ब्रह्म ध्यायतां फलाय ये मूर्द्धन्य
नाडीसम्बन्धे देवयाने पथ्युपास्यतया वक्तव्ये कालो निर्दिष्टस्तेन ता
ह विवक्षितेति सोऽयं मार्गस्तदुपलक्षितोऽपि कालोक्तिरित्यर्थः पितृ
यानमार्गोपन्यासस्तर्हि किमिति क्रियते तत्राह आवृत्तिमिति मार्गा
न्तरस्यावृत्तिफलत्वात्तदपेक्षया महीयान्
मितिस्तुतिर्विवक्षितेति भावः योगिन इति ध्यायिनां कर्मिणां च न
तेनाभिधानमित्याह योगिन इति कथं कर्मिषु योगिशब्दोवर्तता
मित्याशंक्यानुष्ठानगुणयोगादित्याह कर्मिणस्त्विति गुणतो योगि
न इति सम्बन्धः तत्रैव वाक्योपक्रमस्यानुकूल्यमाह कर्मयोगेनेति
अवशिष्टान्पदद्वयाणि व्याचष्टे वाक्यार्थमाह यत्रेति योगिनोध्या
यिनोऽत्र विवक्षिताः ये आवृत्तावपि कर्मिणः कर्मिण इति विभा
नः कालप्राधान्येन मार्गोपन्यासः तत्रैव प्रयाता इत्य

तदेवं परमेश्वरोपासकाः तत्पदं प्राप्य न निवर्तन्ते अन्ये त्वावर्तन्त इत्युक्तं तत्र केन मार्गेण गता नावर्तन्ते केन वावर्तन्त इत्यपेक्षायामाह +
देवयाने पञ्चानमवतारयति तं कालमिति २३ ॥

गी· टी· अ·

119

स्वामिकृतटीका ॥

+ तदेवं परमेश्वरोपासकास्तत्पदं प्राप्य न निवर्तन्ते [अन्ये] त्वावर्तन्त इत्युक्तं त
त्र केन मार्गेण गता नावर्तन्ते केन वावर्तन्त इत्यपेक्षायामाह यत्रे
ति यत्र यस्मिन् काले प्रयाता योगिनोऽनावृत्तिं यान्ति यस्मिंश्च काले
प्रयाता आवृत्तिं यान्ति तं कालं वक्ष्यामीत्यन्वयः अत्र च रश्म्यनुसा
री अतस्मायनेऽपि दक्षिणे इति स्मृतिन्यायेनोत्तरायणादिकालवि
शेषमरणस्य न विवक्षितत्वात् कालशब्देन कालाभिमानिनीभि
रातिवाहिकीभिर्देवताभिः प्राप्यो मार्ग उपलक्ष्यते अतोऽयमर्थः यस्मि
न् कालाभिमानिदेवतोपलक्षिते मार्गे प्रयाता योगिन उपासकाः
कर्मिणश्च यथाक्रममनावृत्तिमावृत्तिं च यान्ति तं कालाभिमा
निदेवतोपलक्षितं मार्गं कथयिष्यामीति अग्निज्योतिषोः कालाभि
मानित्वाभावेऽपि भूयसामहरादिशब्दोक्तानां कालाभिमानित्वात्साह
चर्यात् आम्रवनमित्यादिवत् कालशब्देनोपलक्षणमविरुद्धं २३ ॥

पिशाचभाष्यम् टीका ॥

यत्र काले त्वनावृत्तिमपुनरागमनं आवृत्तिं पुनरागमनं यान्ति तं कालं व
क्ष्यामि भरतर्षभ २३ ॥

रामानुजभाष्ये टीका

यत्रेति अत्र कालशब्दो मार्गस्याहःप्रभृति संवत्सरान्तकालाभिमानि
देवताभूयस्तया मार्गोपलक्षणार्थः यस्मिन्मार्गे प्रयाता योगिनोऽना
वृत्तिं पुण्यकर्माणश्चावृत्तिं यान्ति तं मार्गं वक्ष्यामीत्यन्वयः २३ ॥

अभिनवगुप्तकृत टीका

इदानीमुत्क्रान्त्यायं पवर्गं
तेषां कश्चिद्विशेष उच्यते अ
मीतः आवृत्तिर्भोगाय २३

परमार्थप्रपा टीका ॥

अथ ये प्राप्य न निवर्तन्त इति सर्वमुक्तं तत्र मद्उपासकानां योगिनां च पु
नरावृत्त्यनावृत्त्युपलक्षकत्वात् तस्य भावेन मार्गद्वयमसौ तत्राह यत्रेति
भो भरतर्षभ योगिनो यत्र यस्मिन् काले प्रयाता उत्क्रान्तदेहाः सन्तः अना
वृत्तिमपुनर्जन्म आवृत्तिं च पुनर्जन्म यान्ति प्राप्नुवन्ति तं कालं वक्ष्यामि अ

नावृत्त्यावृत्त्यफलदं कं समयं वक्ष्यामि २३ ॥

वनमाली टीका

भगवंतं प्राप्तानामपुनरावृत्तिरितरेषां पुनरावृत्तिरित्युक्तं तत्र येषां मार्गे
वक्ष्ये प्रतिजानीते यत्रेति त्वनावृत्तिं योगिनः कर्मयोगिनश्च प्रयाताः संतो यत्र
कालाभिमानिदेहे शुक्ले दर्शिते मार्गे वक्ष्यामीत्यर्थः यद्यर्चिरादि
मार्गगतानामप्याब्रह्मभुवनेत्यनेन पुनरावृत्तिरुक्ता तथापि पितृ
यानगतानां सर्वेषां पुनरावृत्तिर्देवयानगतानां भगवद्भक्तानामेव मध्य १
नान्येषामिति भावः यद्वा पुनरावृत्तिनां सर्वेषां कर्मिणां पितृयानेनैव ग
तिर्न तु अर्चिरादिमार्गेण अर्चिरादिमार्गे ते सपतान् ब्रह्म गमयतीति पर
ब्रह्मप्राप्तिश्च तेः आब्रह्मलोकेत्युक्तिः भगवद्विमुखानां ब्रह्मलो
कगतानामपि पुनरावृत्तिः वस्तुतो भगवद्विमुखानामर्चिरादिमार्गेण
तत्र गमनस्यैवासंभवात् अतो ब्रह्मलोकगताः क्रमेण मुच्यन्ते । म॰
एव न त्वावर्तंते किं तर्हि लोकांतराः कर्मिण एवावर्तंत इति भावः २३

ननु त्वदुक्ताः कस्मिन्का लिन्याताः संतः पुन अस्मभैवमयन्ती टीका ॥ ले प्रयाताः सन्तोऽपुनरावृत्तिं यान्ति त्वदुक्ति रहिताश्च क रावृत्तिं प्राप्नुवन्तीत्याशंकायां कालशब्दोपलक्षितमग्नि धूमनामकं मार्गद्वय माह ॥

त्रिभिः यत्र काले त्विति हे भरतर्षभ भरतवंशश्रेष्ठ यत्र यस्मिन्काले काला
भिमानदेवतालितः अर्चिरादिप्रमादौ वा मार्गे कालशब्देनात्र कालाभि
मानीदेवतोच्यते यतः अनंतरमेव वक्ष्यमाणयोरग्निधूमशब्दयोः काल
वाचकत्वाभावात् ननु यद्येवं तर्हि दैवोक्तिमकृत्वा कालोक्तिः कथं
क्रियते भगवतेति चेन्न बहूनामहरादीनां राश्यादीनां च कालवाचित्वा
त्कालोक्तिरविरुद्धैवेति प्रयाताः प्रकर्षेण स्थूलदेहत्यक्त्वा भूलोकात्प
लोकं गच्छंतो योगिनो ध्यानोङ्ग्रादिमायनवेतस्तु निष्ठयेनानावृत्तिमपु
नरावृत्तिमेव आवृत्तिं पुनरावृत्तिमेव च यान्ति अर्चिरादिमार्गेणाधू
मादि[illegible]मार्गेण च गच्छंति तं कालं मार्गं वक्ष्यामि अनंतरमेव क
थयिष्यामि २३ ॥

सगुणब्रह्मोपासका गास्तावत्तत्र सम्यग्दर्शिना मधुसूदनी टीका ॥ तत्पदंशापनन निवर्तंते किं तु क्रमेण मुच्यंते तत्र न ह्योक्रमो नातेषां मार्गोपेक्षा विद्यते न तु सम्यग्दर्शिनामिव नदनपेक्षस्तुपासकानां त नातेषां मार्गोपेक्षा विद्यते न तु सम्यग्दर्शिनामिव कालाभिमानिदेवतोपा । लोकशमये देवयानमा र्गोऽपदिश्यते पितृयाणो मार्गोपन्यासस्तु तत्स्तु तये ॥
श्रयेण तत्र मरणानंतरं यत्र यस्मिन्काले कालाभिमानिदेवतोपा कर्मिणश्चानावृत्तिमा
लक्षिते मार्गे प्रयाता योगिनो ध्यायिनः

˄या

वी· हुतिं च यांति देवयानेन पथि प्रेताप्यायिनोनाहुतिं यांति पितृयानेन पथि
टी·ग्र· प्रयाताः स्वकर्मिणआहुतिं यांति यद्यपि देवयानेपि पथि प्रयाताः पु
२ नरावर्त्तंत इत्यस्मिन् आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिन इत्यत्र तथा
120 पि पितृयाने पथि गता आवर्त्तंत एव न केपि तत्र क्रममुक्तिभाजः दे
वयाने पथि गतास्तु यद्यपि केचिदावर्त्तंते प्रतीकोपासकास्तडि
ल्लोकपर्यंतं गता हिरण्यगर्भपर्यंतममानवपुरुषनीता अपि पं
चाग्निविद्याद्युपासका अतत्क्रतवो भोगांते निवर्त्तंत एव तथापि
दहराद्युपासकाः क्रमेण मुच्यंते इति भोगांत इति सर्वेषामेवाव
र्त्तंते अत एव पितृयानः पंथा नियमेनाहुतिफलत्वान्निकृष्टोयं तु
देवयानः पंथा अनाहुतिफलत्वादति प्रशस्त इति स्तुतिरूपपद्
नैकेषांविदो हतावप्यनाहुतिफलत्वस्यानपायात् ते देवयानं
˄काले पितृयानं˄ च कालाभिमानिदेवतोपलक्षितं मार्गं वक्ष्यामि इत्युप? भर
तर्षभ अत्र कालशब्दस्य मुख्यार्थत्वे अग्निर्ज्योतिर्धूमशब्दानामनु
पपत्तिः गतिसृतिशब्दयोः श्रुतितदनुरोधेनैकस्मिन्कालपदपर्य
लक्षणाश्रिता कालाभिमानिदेवतानां मार्गद्वयेपि बाहुल्यात्
अग्निधूमयोः तद्दिनरात्र्योः सतोरपि अग्निहोत्रशब्दवद्देशेनाप्युप
लक्षणं कालशब्देनान्यथा प्रातरग्निदेवताभावात् तत्प्रवेश्वचास्य
शास्त्रमित्यनेन तस्य नामेयपतानस्मात् आम्नवणमिति वलौकि
कोदृष्टांतः [illegible] २६ ॥

मधुसूदनी टीका ॥

प्रणवे ब्रह्मबुद्धीनां प्रकृतानां च योगिनां तेषां कालांतरे मुक्तिभाजां
ब्रह्मात्मनाधुना वक्ष्य उत्तरो मार्गो यस्त्वन्यादृशि गिरास्फुटे उत्तरस्तत
नं४ ये चात्र पितृयानप्रदर्शि यस्मिन्मार्गे स्थिता यांति योगिनो ह्यपुनर्भवं
यस्मिन्यांति पुनर्जन्म कर्मिणस्तमहं ब्रुवे २६ ॥

नीलकंठी टीका ॥

एवं कृतानां नामेकारवदाराममुरगाव्यर्थविरो क्रममुक्तिभाजां ब्रह्मप्रतिपत्त
ये उत्तरो मार्गो वक्तव्यस्तमाह यत्रेति आवृत्तिमार्गोपमासोः नाहि

+ तदेवमपुनरावृत्तिप्रकारमुपदिश्य वित्तस्पष्टधूमिजपिनद्भातरधारणादित्यसंचारक्रमेण तद्देशावधुपूर्वक पुनरावृत्तेर्यं कालक्रमविशेषमुक्तौ तिपदप्रदर्शनार्थमाह +

मार्गद्वयमर्थः योगिन इति योगिनः कर्मिणश्चोच्यन्ते तेषां यथा योगं मार्गद्वयविभागः शेषं स्पष्टं २३ ॥

आनन्दीटीका

+ यत्र यस्मिन्नहनि सूर्यसंचारोपाधिके स्थूलकालापेतालक्ष्ये आध्यात्मिके वक्ष्यमाणप्राणादिसंचारोपाधिके सूक्ष्मे काले योगिनोऽभ्यस्त प्राणसंचाराः प्रयाता ऊर्ध्वरेचकक्रमेण प्राणानुत्क्रामितमुपक्रान्ताः अनावृत्तिं शुक्लोऽपुनरावृत्तिं यान्ति प्राप्नुवन्ति वक्रा शक्त्रनभ्या सेन ततः स्खलिताश्चेत् आवृत्तिं आमायां भूमेरयोगमनाम्नातरा वर्तते जन्म प्राप्तिं यान्ति भरतसत्तम तं कालं वक्ष्यामि २३ ॥

रामकेदीटी· अथात्र वयत्राह ॥

अथान्यदुत्क्रान्तिविषयं योगोपदेशं यत्र यस्मिन् वक्ष्यमाणकाले प्रयातः संन्यस्तदेहाः सन्तो योगिनोऽनावृत्तिं तथावृत्तिं विशिष्टभोगाधिकरणयोग्यशरीरादिसंबन्धं यान्ति प्राप्नुवन्ति तं कालं वक्ष्यमाणक्रमेण योगिनामेव स्वलभ्यका लान्तरेण भजन्ते तेनादर्शं वक्ष्यमाणक्रमेण योगिनामेव स्वलभ्यका लमुपदेक्ष्यामित्याह २३ ॥

नन्वेतत्कथं परेणज्ञातासिकी [illegible]नीटी· यतो देहत्यागसमये पतेयोगिनो विदेहमोक्षमापन्नाश्रमी योगभ्रष्टानामित्यत आह ॥

यत्र काले· वक्ष्याविशेषे प्रयाताः सन्तो योगिनो नियमात्मनि समा हिताः अनावृत्तिं मुक्तिमावृत्तिं भोगायजन्मयान्ति प्राप्नुवन्ति तं का लमवस्थाविशेषं वक्ष्याम्युपदिशामि हे अर्जुन [illegible]

रात्रिके देहत्यागसमये [illegible]ति विनाश्यन्ते विदेहमोक्ष न ग्राहिणीमव

स्थां दर्शयति २३ ॥

पंचोलीटीका

मरणावलम्बनं सगुणब्रह्मोपासकाः क्रमेण कालान्तरमुक्ति भाजो नावर्तन्ते तेषां ब्रह्मप्राप्तये अनावृत्तिरुत्तरमार्गो वक्तव्यः अन्ये त्वितरेषां केवलकर्मिणामावृत्तिमुक्तो दक्षिणमार्गो वक्तव्यः इति स मार्गद्वयं वक्तुं प्रतिज्ञां करोति यत्र काले इति हे भरतर्षभ भरतश्रेष्ठ यत्र· योगिनः सगुणब्रह्मोपासकाः कर्मिणश्च

गी॰
अ॰ टी॰

यत्र काले प्रयाता मत्ता अपुनरावृत्तिं आवृत्तिं च आप्नुवंति तं
कालं क्रमेण वक्ष्यामि २३

प्रमाणवीरसमिद्धोधिनी॥

एवं ब्रह्मादीनां परमेश्वरं पारमणीकृत्य स्ववर्णाश्रमकुलजात्या पुवि
हितं तत्तद्यज्ञादिकर्म कृतवतां तत्फलं च तस्मिन्नेव परमेश्वरे समर्प्य प्रारूजितवा
न्यसत्वादिकं वानुभूय प्राग्जन्मार्जितकर्मानुसारेण तदवसाने
सति वरणे रिपुभिः संमुखं हतानां वा मृत्युमप्राप्य पुनर्जन्माभावः
तथा महाश्रयेणैव रणं प्रतिप्रस्थितानां भयशोकमोहाद्यनभिभू
तत्वादिष्वनिर्विवेकसंग्रामभूमेः पलायनाभावस्यानावृत्तिः तथा
मामवगणय्य परमेश्वरव्यतिरिक्तदेवतांतराण्याश्रितानां स्ववर्णा
श्रमाद्युचितं कर्म कृतवतां मात्सर्यस्वभावानां जनानां तत्तत्कर्मानुसारेण
तांस्तान्स्वर्गादिलोकान्प्राप्य तत्र सुखं वानुभूय पुण्यावसाने च पुन
र्जन्म देवतांतराश्रयेणैव रणं प्रतिप्रस्थितानां निश्चयराहित्याभावा
स्योभयशोकमोहादिभिः कृतावेशानां तेषां रणात्पलायनं वा
वृत्तिरिति प्रत्येकं द्विविधे अनावृत्त्यावृत्ती परमेश्वरभक्तितदवगण
नदेनके अभ्यासस्वाध्यायेन तद्भेदैरित्यनेकेव प्रतिपादिते अधुना कु
लविशेषप्रस्थितानां च ते भवत इति वक्तुं प्रतिजानीते यत्र काले ति
ति यत्र यस्मिन्कालविशेषे प्रयाताः संग्रामं प्रतिकृतप्रस्थानास्त
वनेयसति स्वकर्मानुसारेण स्वपुरुषार्थमतिवाय सन्मुखं रणे
रिपुभिर्हतत्वेन वा देहत्यक्ता वा योगिनः प्रतिपादितस्वरूपक
र्मकोपालसमतो भयलक्षणयोगारूढाः अनावृत्तिमावृत्तिं च
वीतिकलक्षणां यांति प्राप्नुवंति हे भरतर्षभ मम दाकुलोत्पन्नत्वेन
देयार्द्रसीति संबोधनाभिप्रायः तं कालं समयविशेषं वक्ष्यामि
प्रयाणात्पूर्वं तेकथयिष्यामीति यावत् २३॥

मधुभाष्य

यत्रेत्यादिना कालइत्युपलक्षणम् अभ्यादेरपि वक्ष्यमाणत्वा

तज्योतिरर्चिः तेर्विषमभिसंभवंतीतिहिश्रुतिः तथाचु
नारदीये अग्निंप्राप्यततश्चार्चिततःप्राप्याह्नादिकमिति
अभिमानिदेवताश्चाप्यादयः कथमन्यथा अहश्चापूर्व
माणापक्षमितिप्रुच्यते दिवादिदेवताभिस्तुपूजितोब्रह्म
यातिह्रीतिचशास्त्रे मासाभिमानिभ्योऽयनाभिमानीचष्ट
ष्ठक तथोक्तंगारुडे पूजितस्त्वयनेनासौमासैःपरिहृतः
नह्रीति अहद्रभिजिता शुक्लंपौर्णिमास्या अयनंविष्णुवास
ह तथोक्तंब्रह्मवैवर्ते माह्नामध्यंदिनेनाथशुक्लेनवसह
र्णिमा सविष्णावायनेनासौपूजितः कैपावंब्रजेदितिच
पुनेस्वतीमोपायेज्ञात्वानुष्ठायप्रसति तथाहस्कान्दे हर
नीज्ञात्वावसोपायेअवष्टायवसायनं नकश्चिन्मोह्नः
माप्नोति नचान्यातनवैगातिरिति ॥२२॥

122

भाषा अनुवाद

इस प्रकार से भगवत उपासक परमपद प्राप्त होके फेरि संसारग
तिमे नही आवते हैं यह तीनि श्लोक से कहा अब कौन मार्ग से गमन
करिके फेरि आवते और कौन मार्गगामी फिर नही आवते यही प्र
काश रूपसे कहते हैं कि हे अर्जुन योगी जन जिस काल मे गमन
करि आवते और जिस मे गमन करि नहीं आवते सो काल तुम से क
हूंगा यद्यपि देहत्याग मे उत्तरायण काल श्रेष्ठ और दक्षिणायन नि
कृष्ट है तो भी व्यासस्त्र मे कहा है कि भगवत भक्त दक्षिणायन
मे उत्तम गति को जाते हैं यहां योगी कहे कर्मी औ काल से तदभि
मानिनी देवता लेने है २३ ॥

दोहा

अनावृति आवृति को प्रापत योगी होहि जेहिं काल तेंहि का
लको कहौं भरतवर तोहि २३॥

123

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं त
त्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः २४

शाङ्करभाष्यंटीका

तं कालमाह अग्निर्ज्योतिरिति अग्निःकालाभिमानिनी देवता तथा ज्योतिर्देवतैव कालाभिमानिनी अथवा अग्निर्ज्योतिषी यथाश्रुते एव देवते भूयसा तु निर्देशो यत्र काले तं कालमिति आम्रवणवत् तथाहर्देवताहरभिमानिनी शुक्लः शुक्लपक्षदेवता तथा षण्मासा उत्तरायणं तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्र न्यायस्तत्र तस्मिन् मार्गे प्रयाता मृता गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासकाः ब्रह्मोपासनपरा जनाः क्रमेणेति वाक्यशेषो न हि सद्योमुक्तिभाजां [illegible] सम्यग्दर्शननिष्ठानां गतिर्वा क्वचिदस्ति न तस्य प्राणा उत्क्रामन्तीति श्रुतेः ब्रह्मसंलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते २४ ॥

आनन्दगिरिकृतटीका

यथोपक्रमे व्याख्याय यथाश्रुते व्याख्याति अथवेति कथं तर्हि देवतानामभिनेत्रीणां ग्रहणे कालप्राधान्येन निर्देशः क्रियते तत्राह भूयसान्त्विति मार्गद्वयेऽपि कालाद्यभिमानिन्यो देवताः कालशब्देनोच्यन्ते कालाभिमानिनीनां भूयस्त्वात् कालशब्देन सर्वासां देवतानामुपलक्षणं विवक्षित्वा कालकथनमित्यर्थः यथाम्राणां भूयस्त्वाद्धियमानेष्वपि द्रुमान्तरेषु आम्रैरेव वनं निर्दिश्यते तद्वदित्युदाहरणमाहाम्रेति एवं किमिति ननु मार्गविदुषां भोगभूमीर्वा तत्पच्छेदे रुपादानं आतिवाहिकास्तल्लिङ्गादिति न्यायेनोत्तरत्रेति देवताग्रहणमित्याशंक्याह सामीप्यमिति सामीप्यात्तत्रेति तेषां अग्न्यादीनां समीपमित्यर्थः सत्यालम्बनमाह इति स्थित इति तेषां अग्न्यादीनां परं वा ब्रह्म परमस्वरया सत्यालम्बनम विद्यावतो अवच्छिसमसौ ब्रह्मकार्योपाधिकं परं वा ब्रह्मास्मीति विद्यावतो परब्रह्मविदामतएव क्रमेणास्तु मुक्तिर्निर्गुणमप्रपञ्चं ब्रह्मास्मीति मुख्यार्थत्वात् परब्रह्मविदां न इति २४ ॥ नन्ति ब्रह्मोपासनेनेति ननु ब्रह्मशब्दस्य मुख्यार्थत्वात् विरोधादित्याह न वाहर्थ्यधिकरणविरोधादित्याह न वेत्यंगतिरुच्यते न

तत्रानावृत्तिमार्गमाह अग्निरिति

गी. टी. अ. 124

स्वामिकृतटीका

अग्निर्ज्योतिःशब्दाभ्यां तद्विषममभिसंभवतीत्यग्न्युक्तार्चिरभिमानिनी देवतोपलक्ष्यते अहरिति दिवसाभिमानिनी शुक्ल इति शुक्लपक्षाभिमानिनी उत्तरायणरूपाः षण्मासा इत्युत्तरायणाभिमानिनी एतच्चान्यासामपि श्रुत्युक्तानां संवत्सरदेवलोकादिदेवतानामुपलक्षणार्थं एवंभूतो यो मार्गः तत्र प्रयाता गताः भगवदुपासका जनाः ब्रह्म प्राप्नुवंति तथा च श्रुतिः ते ऽर्चिषमभिसंभवति अर्चिषो ऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकमित्यादि [illegible] २४ ॥

पिशाचभाष्यटीका

अग्निर्ज्योतिरहः दिवा शुक्लः पूर्वपक्षः षण्मासा उत्तरायणं एते अत्रास्मिन्मार्गे प्रयाताः शरीरं त्यक्त्वा गच्छंति ब्रह्म ब्रह्माणं ब्रह्मविदः हिरण्यगर्भोपासकाः अग्निर्ज्योतिर्ब्रह्मलोकाभिमुखस्यातिवाहकदेवतो ऽग्नेरहरित्यहरभिमानिनी देवता असावातिवाहिकी ॥ अग्नेः परमतिवहति शुक्लपक्षाभिमानिनी देवता सा अह्नः परमतिवहति उत्तरायणाभिमानिदेवता सा शुक्लपक्षात्परमतिवहति उत्तरायणमेव योगिनं ब्रह्म प्रापयति २४ ॥ नी

रामानुजभाष्यटीका

अग्निरिति अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति संवत्सरादीनां प्रदर्शनम् २४ ॥

श्रीमिनवगुप्तकृतटीका

उत्तरेणोर्ध्वेनायनं षाण्मासिकं तत्प्रकाशादिधर्मकत्वादृतु नादिकैः शब्दैरुपचर्यते २४

परमार्थप्रपाटीका ॥

तत्र प्रथमं सोपासकानामवसाने ऽर्चिर्मार्गमाह अग्निरिति तत्रार्चिर्मार्गोपलक्षकाः पंच संति तत्र प्रथमं संस्काराग्निर्द्वितीयो दीप्तिमत्तमः पवमर्चि

मार्गदर्शकोऽग्निः तत्र श्रुतिः अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयु-
नानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम इति भा-
ष्यं तत्र मन्त्रस्यार्थो जीवमग्निमुपास्य प्रसादितमग्निं स्वनियोगं प्रा-
र्थयते भो देव दीप्यमानाग्ने अस्मान् सत्पथार्चिर्मार्गेण नय किमर्थं राये
मुक्तिलक्षणाय धनाय तथा भो विद्वन् ज्ञानवन् विश्वानि सर्वाणि वयुना-
नि देहोत्पत्त्याहारः अथास्मिन्नर्थे सत्यं जुहुराणमसत्त्वतिं वर्धकं एनः पा-
तकं युयोधि नाशय इतः परं ते तुभ्यं भूयिष्ठां मनोवाक्कायैः कृतां मते
निर्याणे नम उक्तिं नमस्कारोक्तिं विधेम तथा क्रमणसमये ज्योतिः प्र-
काशकं रूपं श्रुतिरपि तस्यैतस्मात् उदपस्माग्रं प्रद्योतनं तेन प्रद्योतेनै-
ष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वेति स्पष्टार्थं तथा अहरादी नाव-
याणमर्चिर्मार्गोपलक्षणं नो कालोपाधीनो अहः शुक्लपक्षोत्तराय-
णानामभिमानिन्यो देवताः सन्ति ता एवोत्तरोत्तरमर्चिर्मार्गप्रापका भ-
वन्ति तत्रार्चिर्मार्गे प्रयाता ब्रह्मविदो जीवाः त्यक्तदेहाः सन्तो ब्रह्म गच्छन्ति
अत्र शातपथी श्रुतिः ये चामी अरण्ये श्रद्धा सत्यमुपासते तेऽर्चिरभिसं-
भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मा-
सानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं दित्यलोकमा॰
नू॰ वैद्युतान् पुरुषो मानसः एत्य ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु
वतो॰ पराः परावतो वसन्ति तेषामिह न पुनरावृत्तिरस्तीति भाष्यं अरण्यवानप्रस्थ
दशाश्रमाः श्रद्धा गुरुशास्त्रविश्वासः सत्यं ब्रह्म उपासते ते अर्चिर्मार्गेयि-
कारिणो भवन्ति तमेव मार्गमाह अर्चिस्तेजः अहः दिनं आपूर्यमाण-
पक्षः शुक्लपक्षः मकरसंक्रमादितः षण्मासानादित्यः सर्पन्नुदगेति
तदुत्तरायणं तेभ्यो मासेभ्यो देवलोकं तस्मादादित्यलोकं तस्माद्वै-
द्युतं विद्युल्लोकं तस्मादपि मानसः पुरुषो लिङ्गदेहावृतो जीवः ब्रह्मलो-
कान् सत्यलोकान् गमयति प्राप्नोति ते तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः सन्त व-
त्तानवन्तः परावतोऽपरदेशादागता एव सन्ति तेषामिह संसारे न पुनरावृ-
५॰ त्तिरस्ति ब्रह्मलोकप्राप्त्यापि डस्तन्तन्त्वानि न पुनरावर्तनं इत्यर्थः
इष्टदेवयानं २४ ॥

वनमालीटीका ॥

गी॰
टी॰ अ॰

अग्निर्ज्योतिरित्यर्चिरभिमानी देवो लक्ष्यते अहरित्यहरभिमानी शुक्लःप
क्षाभिमानी षण्मासा उत्तरायणमिति तदभिमानी देवो लक्ष्यते तेऽर्चिरभिमभि
सम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः
संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमान
वः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मा
नवमावर्तं नावर्तन्त इति श्रुत्युक्ता देवा ते उपलक्षिकाः स्युरिति भावः तत्र
तस्मिन्मार्गे प्रयाता आजानाद्ब्रह्म गच्छन्ति सवंशाद्याप्रियेय मनेतानवध
गुणातीतं परमकाष्ठास्वरूपं ब्रह्म प्राप्नुवन्तीत्यर्थः कुतो यतो ब्रह्मविदः
यथाक्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुतेः देवानुदे
वयजो यान्ति मद्भक्ता यान्ति मामपीति भगवदुक्तेश्च एतेन प्रतिपद्यमाना
नावर्तन्त इत्युक्त्यापि तत्पानगतानामपुनरावृत्तिः प्रतीयते २४ ॥

ऊसमवैजयन्ती टीका ॥

प्रथमं तावदेतत्पथ्याऽनावृत्तिं यातीति भगवदुक्तं तं मार्गमाह अग्निरिति
प्रथमपदे चैवास्मिञ्छवं कुर्वन्ति यदर्चिरिचनार्चिषमेवाभिसम्भवन्त्यर्चिषोऽ
हरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्ता
न्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं
विद्युतत्पुरुषोऽमानवः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मपा
थ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इत्यादिश्रुत्युक्तो यो
ग्निर्ज्योतिरहः शुक्लः शुक्लपक्षः षण्मासा उत्तरायणं षण्मासात्मक
उत्तरायणमित्यादिभिः शब्दैरेभिः श्रुत्युक्तैः संवत्सरादित्यवायुविद्युद्व
रुणेन्द्रप्रजापत्यमानवाद्यैः शब्दैर्निर्दिष्टस्तत्तदभिमानी तत्तल्लोकपाल
को यो देवगणः स एव मार्गभूतस्तेन तस्मिन्नेव पथि प्रयाताः दसंसृतो
न्वा मर्त्यलोकाद्ये गतास्ते ब्रह्मविदो ब्रह्मज्ञाः सन्तो नाम मदनन्यभक्ताः
न्यर्थः ब्रह्म बृहत्स्वरूपगुणमहाविभूतिपतिं सर्वेश्वरं मम भगवन्तं मा
गच्छन्ति प्राप्नुवन्ति मुमुक्षवस्तु अथ्यानेकजन्मार्जितपुण्यपुञ्जैर्मा
नुषजन्मप्राप्त्यनन्तरं सत्सम्प्रदायमनुसृत्य सदाचार्याल्लब्धस्वपरस्वरू
पगुणादिज्ञानवानाजन्म भगवदाराधनचिन्तनानुस्मरणध्यानादि
नानाशितनिखिलसंचितक्रियमाणप्रारब्धकर्मा भूत्वानन्तरं यत्न

यदि तु वितर्कं च पुनरेव निश्चयेन तस्मिंश्चरमजन्मनि पुरुषेऽस्ते तेस्सति प्रज्ञा
दयः शिष्यादयो वा यदि चेन सर्वं शवसम्बन्धि दाहादिकर्म कुर्वंति उभय
थाप्यनेनो यास्ति फलासेन तदुपासका अर्चिरादिभिर्देवैस्तदुपास्यरूपं प्र
लप्रयांति पुनर्मानवावर्तं मनु ब्र लोके नावर्तंते न यांतीत्यमस्फुटम् २४

मधुसूदनी टीका ॥

तत्रोपासकानां देव यानं पंथानमाह ॥

अग्निर्ज्योतिरित्यभिमानिनी देवता लक्ष्यते अहरित्यहरभिमानिनी शुक्लःपा
क्ष इति शुक्लपक्षाभिमानिनी षण्मासा उत्तरायणमिति उत्तरायणरूपषा
ण्मासाभिमानिनी देवतैव लक्ष्यते आतिवाहिकास्तल्लिंगादिति न्यायात् प
थत्वान्यासामपि श्रुत्युक्तानां देवतानामुपलक्षणार्थं तथा च श्रुतिः तेऽर्चिर
भिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङे
ति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रम
सो विद्युतं तत् पुरुषोऽमानवः स एतान्ब्रह्म गमयत्येष देवपथो ब्रह्मप
थ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंते इति अत्र श्रुत्यंतरानुसारात्संव
त्सरानंतरं देवलोकदेवता ततो वायुदेवता ततः आदित्य इत्याकरे निर्णीत
एवं विद्युतोऽनंतरं वरुणेंद्रप्रजापतयस्तावतां मार्गपर्वाणि तत्रार्चिरहः
शुक्लपक्षोत्तरायणदेवता इहोक्ताः संवत्सरो देवलोको वायुरादित्यः
चंद्रमा विद्युद्वरुण इंद्रः प्रजापतिश्चेत्यनुक्ता अपि द्रष्टव्याः तत्र देवया
नमार्गे प्रयाता गच्छंति ब्रह्म कार्यमौपाधिकं कार्यं बादरिरस्य गत्युपपत्ते
रिति न्यायात् निरुपाधिकं ब्रह्म तत्रैव क्रममुक्तिफलत्वात् ब्रह्मवि
दः सगुणब्रह्मोपासकाः जनाः अत्रैतेन प्रतिपद्यमाना इमं मानवमा
वर्तं नावर्तंते इति श्रुताविमं विशेषणात् कल्पांतरे केचिदाव
र्तंते इति प्रतीयते अत एवात्र भगवतोदासितं अत्रैतन मार्गकथनेनैव व्याख्या २४ ॥
नात्

सदानंदी टीका ॥

अग्निर्ज्योतिरिति नीहारविरहकाकालाभिमानिनी देवता यदि वा ते द्वे देवते।
श्रुतिसंमते तथाहि देवता तद्वच्छुक्लपक्षाभिमानिनी उत्तरायणषण्मा
साभिमानिन्येव देवता अग्न्याद्या देवताः सर्वा योगिनः कालतोऽस्तान्

प्राप्नुवंति परं ब्रह्म मार्गभूताः क्रमेण ताः तस्मिन्मार्गे मृता यांति ब्रह्मोपासन
तत्पराः क्रमेण निर्गुणं ब्रह्म यत्र गत्वा न शोच्यते सम्यग्दर्शननिष्ठानां नैव स्यात
गमनागती सद्यः प्राणपरित्यागान्मोक्षभाजां महात्मनां २४ ॥

नीलकंठी टीका ॥

तत्रोपासकानां देवयानं पंथानमाह अग्निरिति अग्निर्ज्योतिरिति अर्चिरभिमा
निनी देवता लक्ष्यते एवं अहरिति अहरभिमानिनी एवं शुक्लपक्षः षण्मास
ं मिता उत्तरायणस्य चाभिमानिनो देवता एव एतद्वा मासामप्युपलक्षणं
तत्र प्रयाता उक्तानां ब्रह्मकार्यं ब्रह्म तद्द्वारा परं च गच्छंति ब्रह्मविदो ब्र
ह्मोपासका जनाः २४ ॥

आनंदीटीका

अगतिरूर्ध्वं गच्छतीमग्निः ज्योतिः अहो दिनं इहशास्त्रप्रमाणादिसमये वा रेणो
पलक्षितः कालविशेषो दिनं भवति अनयैव कलनया षोडशभिरहोरात्रैः
पक्षः द्वौ पक्षौ मासः षण्मासा उत्तरायणमिति वत्समागमे ह्नितोक्तिक्रमेण दि
न पुनरायणे च षण्णां मोक्षमो गतिः शुक्ला शुक्लसंज्ञा भवति शुक्लक्र
गतीदृश्येते इति वत्समागमासिद्धांतदर्शनात् लौलिंगः शुक्लाशब्दः क्रमाश
ब्दश्च तत्र एवं विधे संहितोपदेशक्रमविशेषदर्णायिष्यमाणो कालविशे
षः तत्रैव हादशान्तात्स्वेदशविशेषवा प्रयाताः संयमाभ्यासपक्षेण
यातो ऊर्ध्वरेव कक्रमेणात्कामिनशाणाः ब्रह्मविदो जनाः ब्रह्म गच्छंति
आगच्छे केवलमात्रवन्तिनपुनरावर्तन्ते इति पावन २४ ॥

रामकंठीटीका

इहाश्रीबोमोप्रकाशनमसीनइपलक्षिते दिनरात्री शुक्लकृष्णौ पक्षौ तेन च या
षण्मासेपरिमाणोऽमरदत्तिो रत्यनेस्यलट्षाकालविभागमावद
तेनमनुदेवपितृमर्त्यविषयत्वेन प्रकृष्टमध्यमनिकृष्टपरिमाणेनाव
स्थितेन अग्निर्ज्योतिः सूर्यप्रकाशः तदुपलक्षितनमहत्विंशत्यालिकावच्छि
न्नपरिमाणो दिवसात्यः कालांश आपूर्यमाणसोमोपलक्षितः पंचद
शाहोरात्रः शुक्लपक्षः शुक्लशब्देन निर्दिष्टः तथा मकरादिराशिषट्क
वारिविरोचनवारोपलक्षितः षण्मासा उत्तरायणमित्येते कालविशेषाः
प्रसिद्धानसंवेविधाया कालविशेषमाम आपब्रह्मविदो विज्ञानतपरमका

रणास्वरूपाः यथाप्नुवन्त्यामन्ति शरीरमुत्सृजन्ति ते ब्रह्मपरं तत्त्वं ग
च्छन्ति अग्निज्योतिरहरिति मोक्षगतिं शास्त्रवल्लीमर्थः २४ ॥

तत्र निरन्तराभ्यासपरा लाक्षिकी [illegible]टी· निनी देहत्यागसमये दृढभावितात्मनो विदेहमोक्षदायिनी
मवस्थां दर्शयति ॥

अग्न्यादयः शब्दास्तेषु तेषु रहस्यपाणस्तेषु मूर्धच्छिद्रात् ब्रह्मद्वारवाहि
निमार्गेण सातां संकेतिताः तथाहि साधनयोगाग्नौ वा हीकरतिवल
क्षणापाम्प्रत्मकाग्नि इह तु भगवता गौरयमितिवलक्षणायाच्चवसि
ताः यथा या निशा सर्वभूतानामित्यत्र निशाशब्दः तथा साधनाम
प्राणाहतिर्वामदक्षिणमार्गौ विलीभावयन्ती मध्यरूपेणोर्ध्वे नयव
हन्ती सुषुम्णः सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमा।
श्रयानेश्च सर्पिषो विदग्धानर्थं गच्छतीव तत्र्कं मध्यार्थगाम्भीर्यात्ता
खिलस्वयं योगश्च तत्सूयरति तथा विद्यातमोपहरणाज्ज्योतिः प्रकाशि
का शुक्लत्रिंशद्घटिकाप्रमाणमनुष्याणां दिनं प्रबोधहेतुः शुक्लपक्षः।
पितॄणां दिनं प्रबोधहेतुः षण्मासा उत्तरायणं देवानां प्रबोधहेतुः यथा
हि स्वस्मिन्स्वस्मिन्दिने प्रबोधाधाधिकृताः सर्वे देवपितृमनुष्याः देवादी
नामपि ब्रह्मविद्यायामधिकारोस्तीति भावेन बादरायणेनास्तिहीमत्र
प्रपंचितम् तथा तत्र देवपितृमनुष्याः प्रबोधलाभेनाधिकृता ब्रह्म
विदो निरन्तराभ्यासेनश्चानया धारयापि तु रूपाः सन्तोः स्यामवस्थायां प्रयाता
मूर्धसीमाविदारणपूर्वं देहमुत्सृजन्तो ब्रह्म यान्ति मुक्तिभाजः स्युरेषा
ब्रह्मविदो देवयानपथा तथा च श्रुतिः यस्यैष मण्डलं भित्वा माहृतो
यातिमूर्धनि यत्र यत्र म्रियेहापि न स भूयोभिजायत इति शतं चैका च
हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमे
मेति विष्वगन्या उत्क्रमणेन भवन्तीति तथा च स्मृतिः न तालोकेन प
नस्य दिने यपरे संप्रबुद्धाये वा विनोपशमरजनीयोगनिद्रामुपेताः
नेहोरात्रो परमपरमानन्दसन्ध्यासु सोरंभिन्नाज्योतिः परमपरमया
न्तिनिर्वाणमार्गमिति श्रुतयः सर्वकर्मणामेतमेव विदेहकैवल्यमा
पंचयोगिनमात्मलयोरं श्रूयते तस्य पुत्रादायमुपयन्ति सुहृदः स्वाध
कृत्याम् द्विषन्तः पापकृत्याम् इति तत्तज्जीवन्मुक्तमुद्दिश्य तस्या
हैन तानाग्निकर्मणोरग्यप्रायत्वात् तथा च सूर्यमेवोत्क्रम तानाग्निः

ना

गी. सर्वकर्माणि भस्मसात्कुरुते ज्ञानेनेति [illegible]
टी. [illegible]
प्र. [illegible] २४ ॥

127

पंचोली टीका

तत्रानावृत्तिमुत्तरमार्गमाह अग्निरिति ब्रह्मविदः सगुणब्र
ह्मोपासकाः इमं देहं त्यक्त्वा अग्निदेवतां प्राप्य ततो ज्योतिर्देवतां
प्राप्य ततोऽहर्देवतां प्राप्य ततः शुक्लपक्षदेवतां प्राप्य तत उत्त
रायणदेवतां तत [illegible]ने तं संख्यका [illegible] अवशिष्टाः षड्देवताः प्राप्य
क्रमेण प्राप्य अन्त्यायां विद्युद्देवतायां आमानवो मानवः पुरुषः
प्राप्तो नीत्वा प्रापय्य हिरण्यगर्भलोके यान्ति तत्र ते ब्रह्मणा सह
मुच्यन्ते न पुनरावर्तन्ते अयं चतुर्दशपर्वा उत्तरो मार्गः २४ ॥

रणवीरसमिद्बोधिनी

तत्रानावृत्तिहेतुकं कालविशेषमाह अग्निर्ज्योतिरिति अग्नाभि
मानी: सामान्यगार्हपत्यादौ नयत्याच गार्हपत्यावहनीयोरभिधा
यकः ज्योतिश्च तेजः तेन चाग्नेस्तेजस्त्वाव्यभिचारात्पौनरुक्त्यदोष
प्रसंगाद्दीपितसुवर्णादेर्न तत्तोलक्षणं तदतिप्रायश्चित्तेजः तेन
चाग्नेस्तेजस्त्वाव्यभिचारात्पौनरुक्त्यदोषपरिहारः प्रयोजनं ततश्च ज्योति
स्तेजोतिशयवानत्युज्ज्वलो वितिरिति [illegible]: सिद्धः एवमपि प्रतिज्ञातस्य
कालस्य ज्योतिश्चताग्निनानभिधानमित्यसंगतिप्रसक्त्यातादप्रा
णोपि अग्निशब्दः प्राशोपासनात् प्रभातमेव हि दिनावयवः सायं च ज्वल
नादरेणैवमभिधानेनाग्निरुक्तैव तस्योज्ज्वलाविस्तारादिरूपं प्रकृते
कपिलेनाभिविनादाचार्यः स्वाहावसानमध्यस्थदग्धज्वलाविः
स्निग्धः प्रदक्षिणमुत्तरोहुतभुग् पस्य गंगादिवाकरस्ताज्ज्वल

चारुहासां याजीसमुद्रयानां वयागां करोतीति अतएव रघुरपि
तस्मै सम्यग्हुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेन
हस्तेनेव जयं ददाविति तथा अहर्विषान्नालिकावच्छिन्नपरिमा
णो दिवसाख्यः कालांशः तत्र दिनमर्कायनानुलोम्येन प्रयाणं
यतः स एवाह अयनेन गतोर्कसोमयोर्द्युनिशां वा स्थितयोः पृष्ठ
कृथकृ विडथाभिवमाहूयानं विलसमवाये हि षतां विराजते इति
अस्यार्थः अर्कसोमयोरेकायनस्थयोरयनेनानुलोमेन मार्गेणे
त्यर्थः द्युनिशं दिवा रात्रौ वगतः प्राकृन्याति प्रस्थिता राज्ञादिषु समवा
ये विडत्मभार्या वैयाकरण इवातितरां शोभते इति संबंधः वा प्र
पवा पृथक्पृथक्स्थितयोरर्कसोमयोर्द्युनिशाक्रमेण दिवा रात्रौ
चानुलोमेन मार्गेण प्रस्थितस्य राजा पूर्ववद्विराजते इति कोर्थः अ
र्कायनानुलोम्ये सति दिवा यायात् सूर्यस्याहःपतित्वात् चंद्रायना
नुलोम्ये तु रात्रौ यायात् तस्य रात्रिपतित्वादिति चंद्रार्कयोर्युगपदुत्त
रायणस्थयोर्दक्षिणपश्चिमां यायात् याम्यायनस्थयोस्तु प्रागुदी
चीं तथा केवलेर्के एवोत्तरायणस्थे दिवा दक्षिणपश्चिमां रात्रौ प्रागु
दीचीं दक्षिणायनस्थे तु रात्रौ दक्षिणपश्चिमां दिवा प्रागुदीचीमित्य
यनानुलोम्यं अयनप्रातिलोम्ये च गतस्य पराजयस्तेनैवोक्तो यथा
यातोयनस्य प्रतिलोमकाष्ठाः स्यात्स्वतेजोपि जितः परेषां स के
वलं व्याकरणाभियुक्तः काव्यसरोरुहाणामिव हास्यमेतीति वहा
अहर्ज्योतिरित्येकं पदं तत्त्वादिकरणं पदद्वयं वा तथा चायम
र्थः अग्निः सूर्येणानवरतं गमनात् तस्य ज्योतिः प्रकाशो यस्य तदह
र्दिनं अनयेच्छन्नार्कवान्दिवसः एतेन वर्द्धदिने यात्रानिषेधो वः
सीयते मुलक इति मुलकपाहे ना सूर्यमाणसोमोपलक्षितः पंचद
शाहोरात्रः मुलकपदेनाभिधीयते तत्र च सोमस्य हृद्यभिमुखत्वाधा
यिनामपि हृहिवपयं भाविनीति मुलकपदं तु कलवर्जनाहः
प्रायः सर्वप्रसिद्धं तिसारंभा
तिरेहतवेनोपात्तः तथा च संग्रहकारः

128

शुक्लः शुक्ल इति षण्मासा उत्तरायणमिति मकरादिमिथुनान्तरा
शिषट्कसंचारविरोचनचारोपलक्षिताः षण्मासा उत्तरायणं
सूर्यस्योदग्गतिरित्यर्थः अत्रापि समनन्तरोक्तायतानुलोम्यं वि
वार्यं अत एव याम्यायनस्यैवोत्तरोकारो प्रतिपाद्यवीथ्या यात्रा
श्रूयते तत एव चक्षारयपि मा विधीयते तथा च योग याज्ञा याव
गदाचार्यः याज्ञ तपस्य पारदरी फलामथो चेति परं ह पा॑॑ दि
सोमाकौशनानुलोम्येन कृताया याज्ञावो रिउजयोः लोकान्तरव
स्वानि वाच्यभिचारि एवमोदन्तलक्षणा नाहति स्म पुरुषा पुष
मतिवा मवातात्पर्यो कालं प्रतीत्य देहान्तरमासाद्य वा पुनरुत्तरा
यणे उक्तलक्षणप्रकारहद्यापणदेवेति अत एव याम्यायने प्राय
तस्य पतितस्यान्यतरप्रकारकप्रयापि देवव्रतस्य माघसितादृ
म्यो देहादुत्क्रान्तिः श्रूयते इत्यलमर्थः समस्तपाठेस्तु मकारा
दि मिथुनान्तराशिषट्कसंचारविचारोपलक्षितमासषट्क
लक्षणा उत्तरायणे तदाप्यापूर्यमाणोपलक्षित एव दृष्टा हूपा
नामके शुक्लपक्षे तत्राप्यनभ्युदये दिवसे न चापि माहस्तेन वा
पि गार्हपत्यादवनीयोद्धृत्वा ततोऽग्निप्रदक्षिणोज्ज्वलार्चिस्त्वादिकं
प्राञ्जने परीत्य ये प्रयाताः संग्रामं प्रतिप्रस्थितास्ते ब्रह्म यजुर्वेदं वि
दन्ति लभन्ते येत ब्रह्मविदेऽर्चिरादिभ्यः सकाशात्स्वात्मस्वज्ञात्स्तुवित
धात्वोपदेशाद्ब्रह्म गच्छति यजुर्वेदप्रतिपाद्यं तस्यैव यावन्ति
न पुनर्भवप्रयोकमोदृष्यभिभवेन ततः पलायन्त इति अत्र च प्र
यातारणामध्ये विदुभिः समुखक्षिनावयवत्वेन तानेव वाविनि
त्यगात्मभावेन पुरुषापुषमतिवा मतातात्पर्यो काले देहादुत्क्रान्ता
ब्रह्मविदः स्वनास्तुवितवेदार्थेता ब्रह्मसमतासायुज्यं गच्छति प्राप्त
वंति संसारान्मुच्यन्त इति भावः २४॥

भाष्य अनुवाद ॥

औरजिस मार्ग से प्रयाण करिके फेरि नही संसारगति कोप्राप्त होते हैं
सोई मार्ग कहते हैं किअर्चि अभिमानिनी अर्थात् अग्नि या ज्योतिरूप
और अहकहे दिन औ शुक्लपक्ष तथा उत्तरायण जोछ मास और संवत
र इन सब की अभिमानिनी देवता इहां लेते हैं यथा प्रथम ज्योतिमे प्र
वेश करि फेरि दिनसे दिनसे पक्ष से पक्षसे उत्तरायण छमाहीमे
उससे संवत्सरसे देवलोक मे प्राप्त होय फेरि भगवतउपासक ब
लक्ष होय साक्षात् ब्रह्मस्वरूप होते हैं निष्काम कर्मकारी इस ग
ति सेजाते हैं २४ ॥

दोहा

अग्निज्योति दिन शुक्लपक्ष उत्तरायण षटमास यामे ब्रह्म
विद जातजो सो लहत ब्रह्म महवास २४ ॥

129

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५

शाङ्करभाष्यं टीका ॥

धूम इति धूमो रात्रिः धूमाभिमानिनी रात्र्यभिमानिनी च देवता तथा कृ-
ष्णः कृष्णपक्षदेवता षण्मासा दक्षिणायनमिति च पूर्ववद्देवतैव तत्र च-
न्द्रमसि भवं चान्द्रमसं ज्योतिस्तत्फलं इष्टादिकारी योगी कर्मी प्राप्य भु-
क्त्वा तत्क्षयादिह निवर्तते पुनः २५ ॥

आनन्दगिरिकृत टीका ॥

शुक्ले देवयाने पन्थाने स्तोतुं पितृयानमुपन्यस्यति धूम इति तत्रापि मार्गे
चिह्नानि भोगभूमीमव्यवच्छिद्य आतिवाहिकदेवताविषयत्वे धूमादिपदा
नां विभजते धूमेत्यादिना तत्रेति सप्तमी पूर्ववदेव सामीप्यार्था इष्टादीना
दिशब्देन पूर्तदत्ते गृह्येते कृतात्ययेऽनुशयवानिति न्याये स्वर्गपतिततत्क्षया
दिति आरोहावरोहयोरभ्यासवाचिना पुनःशब्देन संसारस्यानादित्वं सूच्यते २५

स्वामिकृतटीका ॥

धूम इति धूमाभिमानिनी देवता रात्र्यादिशब्दैरपि पूर्ववद्देवता रात्रिः कृष्णपक्षदक्षि-
णायनरूपषण्मासाभिमानिन्यस्तिस्रो देवता लक्ष्यन्ते एताभिर्देवताभिरुपल-
क्षितो यो मार्गः तत्र प्रयातः कर्मयोगी चान्द्रमसं ज्योतिः तदुपलक्षितं स्वर्गलो-
कं प्राप्य तत्रेष्टापूर्तकर्मफलं भुक्त्वा पुनरावर्तते अत्रापि श्रुतिः ते धूममभि-
संभवंति इत्यादिः तदेवं निवृत्तिकर्मसहितोपासनया क्रममुक्तिः काम्यकर्मा-
भिः स्वर्गलोकभोगानन्तरमावृत्तिः विरुद्धकर्मभिस्तु नरकभोगानन्तरमावृ-
त्तिः स्वदृक्कर्माण्यन्तरेण तन्नाममात्रेणैव पुनः पुनर्जन्मेति द्रष्टव्यं
२५ ॥

संभवंति धूमाद्रात्रिं रात्रेर
पक्षीयमानपक्षमपक्षी
यमानपक्षाद्यान् षण्मा
सान्दक्षिणादित्यापति
मासेभ्यः पितृलोकं पितृ
लोकादाकाशं ते चंद्रं प्राप्यात्र

पिशाचभाष्यं टीका

धूमो रात्रिः धूमः स्वर्गलोकाभिमुखस्य कर्मिणः स्वर्गप्रापयित्री अभिमानिनी वाहिकी देव-
तोच्यते धूमे धूमाभिमानिनी देवता रात्रिः रात्र्यभिमानिनी देवता साप्यति
वाहिकी धूमात्परमतिवहति तथा कृष्णपक्षाभिमानिनी देवता रात्रेः परम-
तिवहति षण्मासा दक्षिणायनमतिवाहिकदेवता कृष्णपक्षात्परमतिवह-

गी॰
टी॰ अ॰

130

तिनथा कृष्णपक्षा [illegible]
[illegible] यरमतिवद्दन्ति गच्छन्ति वा गच्छन्तीत्य
र्थः तत्र प्रयाताः कृष्णकर्माणः चंद्रमसं इष्टचांद्रमसं ज्योतिः कर्मणा यो
गी प्राप्य निवर्तते पुनः शरीरं तत्र मनुष्यलोके न गृह्णातीत्यर्थः २५

रामानुजभाष्यटीका

धूमइति एतच्च धूममार्गस्य पितृलोकादेः प्रदर्शनं अत्र योगिशब्दः पुण्य
कर्मसंबंधिविषयः २५ ॥

अभिनवगुप्तकृत टीका [illegible] अतोविपरीतं विपर्ययेण तत्र चंद्र
मसं भोग्यं प्राप्यानुभवे पुण्यक्षये [illegible]

परमार्थप्रपा टीका ॥

अथ पितृयाणमाह धूमइति पूर्वोक्तमार्गाद्विपरीतेन धूममार्गः रात्रिकृष्ण
पक्षदक्षिणायनाभिमानिदेवताभिः पितृलोकं प्राप्यते ततस्तत्र आरोहण
मार्गेण योगी चांद्रमसं ज्योतिः प्राप्य पुनरवरोहणमार्गेण निवर्तते पुनराव
र्तते श्रुतिरपि अथ ये यज्ञेन दानेन तपसा लोकं जयंति ते धूममभिसंभवं
ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षा[illegible]न्षण्मा
न्दक्षिणा[illegible]नि मासेभ्यः पितृलोकाद्देहे ते चंद्रं प्राप्यान्नं भवंति तांस्
त्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयंति ते
षां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यंत आकाशाद्वायुं वा
यो वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवंति ते एवमेवानुपरिवर्तं
यथ एतौ पंथानौ न विदुस्ते कीटाः पतंगा यदिदं [illegible] दंदशूकाभाष्यं तत्र चंद्र
मिति चंद्रं प्राप्यान्नं भवंति देवानामन्नं ते न परिणमंति यथा देवाः सोम
राजानमाप्यायस्वापक्षीयस्वेति संप्राप्य भक्षयंति तथा तानपि भक्ष
यंति तन्नेषां भक्षितानां यदा तत्पर्यवैति अवरोहणमार्गेण निवृ
णं भवति अथ तदा आकाशादभिनिष्पद्यंते अतः इह लोके आउ[illegible]भ
[illegible] ति आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं तदा व्रीहियवौषधीः प्राप्य तत्प
मनाश्रकारेण न वर्तते ते कीटादियोनिं प्राप्नुवंति अथ मांसमयीं योनिं ग
ति तैत्तरीयकेपि प्रजा नेतः प्रतिगच्छंति देवाः [illegible]
मृबंमेयाहि पथिभिर्देवयानैः [illegible] प्राणमेतेभ्यः परि यां वर्तं
तिनः प्रजानवंतः अंगेभ्यः शरीरेभ्यः पृथग्भूता प्रतितिष्ठा शरीरैः भा
ह्वेति स्वाधीनकर्मीति स्वस्वयादेहत्यजंति भोचेनस्वेन्तदेवयानैः प[illegible]

भिरर्चिरादिमार्गैः स्वर्गं स्वर्गं सत्यलोकं याति अथवा तत्कर्तुमशक्त
श्चेत्तर्हि कर्मणा पितृलोकं पितृयाणेन कृत्वा पुनः शरीरे विश
द्वणमार्गं प्राप्नोति षयोश्च प्रतितिष्ठ अन्तत्वेन परिणतो भव परंत्व
भयमार्गपरिभ्रष्टो मा भवेत्यर्थः अत्र श्रुतावपि द्वे सृती अशृ
णवं पितृणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति
यदन्तरा पितरं मातरं चेति भाष्यं पितृणां देवानामुतापि मनुष्याणां द्वे सृ
ती द्वौ मार्गौ देवयानपितृयाणाख्यावहमशृणवं श्रुतवानस्मि यदि सं
पितरं पालकत्वेन पितृभूतां द्यां तथा धारकत्वेन मातरं भूतां पृथि
वीं चान्तरा द्यावापृथिव्योर्मध्ये भवति तदिदं विश्वमग्निना संस्कृतं
ताभ्यां मार्गाभ्यां समेति ग
सत्पजन् देवलोकं पितृलोकं च गच्छतु
च्छति २५ ॥

वनमाली टीका ॥

देवयानमार्गं स्तुत्वार्थं पितृयानमाह धूम इति अत्रापि धूम इति धूमाभि
मानिनी देवता रात्रिरिति रात्र्यभिमानिनी कृष्ण इति कृष्णपक्षाभि
मानिनी देवता षण्मासा दक्षिणायनमिति दक्षिणायनाभिमानिनी ल
मानिनी षण्मासा दक्षिणायनात्मका उपलक्षणार्थं तथा च श्रुतिः यान्
क्षते एतदपरपक्षमपरपक्षाद्यान्षड्दक्षिणा पितृलोकं
ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षा
दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोका
त् पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्ष
यन्ति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते इति त
त्र कर्मयोगी कर्मफलं योगी प्राप्नोति अधिकारी
त्रपथि प्रयाता ... संपतन्त्यनेनेति संपातः कर्म त
त्प्राप्य यावत्संपातमुषित्वा निवर्तन्ते ... भावः २५ ॥
स्मादावृत्तिमार्गादनावृत्तिमार्गः श्रेयानिति

अथ वैजयन्ती टीका

एवमनावृत्तिपथमुक्त्वेदानीमावृत्तिमार्गमाह धूमो रात्रिरिति
अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धू
माद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्ने
तेभ्यः संवत्सरमभिप्राप्नुवन्ति संवत्सरात् पितृलोकं पितृलोका

गी·
टी· अ·

दाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भ
क्षयंति तस्मिन् यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इत्या
दिश्रुतिसिद्धो धूमो रात्रिः कृष्णः कृष्णपक्षः षण्मासा दक्षिणायन
मित्यादिशब्दैरुपलक्षितस्तत्तदभिमानी यो मार्गभूतो देवगणस्तत्र त
स्मिन्मार्गे यो याति स सकामी योगी चान्द्रमसं चंद्रसंबंधि ज्योतिस्तल्लो
कं प्राप्य तत्र यावत्कर्मभोगमुषित्वा तत्कर्मक्षये सति पुनस्तस्माका
शान्निवर्तते संसारं प्राप्नोतीत्यर्थः २५ ॥

देवयानमार्गस्तत्पर्थे पितृयानमार्गमाह ॥

मधुसूदनी टीका ॥ अ

त्रापि धूम इति धूमाभिमानिनी देवता [illegible] अभिमानिनी कृष्ण इति
कृष्णपक्षाभिमानिनी षण्मासा दक्षिणायनमिति षण्मासा दक्षिणा
यनाभिमानिनी लक्ष्यते एतच्च प्रागभ्यासंप्रकरणमनुपलक्षणं तथा
दिक्कृतिः ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्या
न्षड्दक्षिणेति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः
पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमे
ष सोमो राजा तद्देवानामन्नं तं देवा भक्षयंति तस्मिन् यावत्संपात
मुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इति तत्र धूमरात्रिकृष्णपक्षद
क्षिणायनदेवता इहोक्ताः पितृलोक आकाशश्चंद्रमा इत्यनुक्ता अ
पि द्रष्टव्याः तत्र तस्मिन्पथि प्रयाता ज्योतिः चान्द्रमसं ज्योतिः फलं योगी
कर्मयोगी इष्टापूर्तदत्तकारी प्राप्य यावत्संपातमुषित्वा निवर्तते
संपतंत्यनेनेति संपातः कर्म तस्मादेतस्मादाहुतिमार्गादनावृत्ति
मार्गः श्रेयानित्यर्थः [illegible] २५ ॥

सदानंदी टीका ॥

तथा धूमादिशब्दैरुपलक्षितेन देवतायनः मार्गभूतास्ते तत्प्रतस्तान्मा
पयेति च कर्मिणः तस्मिन्मार्गे गता योगिनः फले वा चंद्रमसं जनाः कर्मि
णः कर्मसंसिद्धिं प्राप्य भुक्त्वा पतंत्यधः पितृदेवैकभोगपत्रयस्मा
च्चंद्रमसस्ततः लोकं चंद्रमसं गत्वा कर्मिणोऽधः पतंत्यमी २५

नीलकंठी टीका ॥

एतेन च धूमो रात्रिरित्येषोपि धूमादिमार्गः कर्मिणामपकृ योगिनां
वउचितस्त्राहुतिफलस्य व्याख्यातः २५ ॥

आनन्दीटीका

उणादयो बहुलमिति सूत्रेणादीनां कर्मकर्तरि धुमसमाधूयते योगम्य
नेस्य मिति धूमः चान्द्रमसं चन्द्रमसि संज्ञातं ज्योतिः सूर्यरश्मि
रेव चन्द्रमण्डले प्रतिबिम्बिता चन्द्राकारतया प्रतिभातीति प्रसिद्धेः
तथा चाद्याध्यात्मिकाहोरात्रं बाह्यकालापेक्षया तिमेघहयात्मिका।
तिरेका भवति तत्र तस्यं दिनं तस्यं रात्रिः इत्थं पञ्चदशभिस्तैरि
भिः पक्षः त्रिंशद्भिर्मासः ताभिरेव षड्गुणिताभिरशीत्युत्तरशतैको।
त्मायनमेकम् तथा द्वितीयमिति षष्ट्यधिकात्रिशती तदयावत्सर
मेकमिति बाह्यघटिकाविचारः तथा य एवमेते विदन्ति ये वारण्य
कमाश्रिताः उपासते हितास्समस्त श्रद्धयापरयायुताः क्रमात्तेसम्भव
न्त्यर्चिरहः शुक्लं तथोत्तरम् अयनं देवलोकं च सवितारं सवैद्युतम् त
तस्मात्क्रमोन्नीयमानवो ब्रह्मलौकिकान् करोति पुनराहृत्तिलक्षा
मिह न विधेन यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः प्रकटाय
मेवार्थोख्यायस्सयमप्रस्तावान् तत्र विधेयैः क्रीडन्तो न तत्वेल
पुरतन्वाः प्रभुधियय इतीदमेव समाधाने प्रमाणम् २५

रामकंठीटीका

तथा धूमो जलात्मकत्वात्सोमः तथा चन्द्रोपलक्षिता रात्रिः प्रसिद्धा।
कृष्णः क्षीयमाणसोमोपलक्षितः पंचदशाहोरात्रः कृष्णपक्षः सव
क्रमापेक्षया यथापाठं व्याख्यातः तथा कर्कादिराशिषट्कसंचारि
सूर्योपलक्षिताः षण्मासा दक्षिणायनं तत्रैवंविधायां कालसाम।
आपुनर्जन्महेतुभूतं चान्द्रमसं ज्योतिर्लोकं प्राप्य योगी समाप्तिमात्रा
वर्तते पुनः संसारमार्गमवतरति अत्र केचिद्विचक्षणा एवं विचारम्या
रभन्ते इह तावद्ब्रह्मणो यथार्थस्य परमकारणस्य द्विविधं वेदनम्
स्वसंवेदनेन साक्षात्कारश्चासौ परिहृस्यवाक्स्वरूपावगममात्रं तत्राद्येन
प्रकारेण ये ब्रह्मविदस्ते योगाभ्यासपरीयत्वाउक्तकालसामग्रीन।

गी.
टी.
ग्र.

132

ब्रह्मप्राप्तिहेतुत्वमर्हति द्वितीयेपिपक्षे सगुणब्रह्मसमाराधनायेब्रह्मवि
दस्तेषामसमाप्ताकृतत्वात् यथोक्तकालविशेषप्राप्तिमात्रमपुनरा
वृत्तिहेतोर्ब्रह्मणः प्राप्तिकारणमितिनशक्यतेवक्तुम् एवमुभय
रूपाणामपिब्रह्मविदामन्तकालेयथोक्तकालविशेषप्राप्त्यधीनाब्र
ह्मप्राप्तिरितिनयुक्ता मेगच्छन्तेयोगिनोयोगीस्वीकृतसमाधिविशेष
लभ्यतत्त्वबलाद्धेतुयथोक्तकालविशेषप्राप्तिमात्रादेवपुनरावृत्तिम
मुक्तिमन्तः यंयंवापिस्मरन्भावंत्यजत्यन्तेकलेवरं तंतमेवैतिकौन्ते
यसदातद्भावभावितः इत्युक्तोपपत्तेर्दृढभावनाभावितस्यभाव
स्याव्यभिचारात्मयैवभावितस्यतत्कालमनुस्मरणमितिपुनरावृ
त्तिःस्यादेवकिंयुक्तःकालःकरिष्यति नहियोगीयथोक्तकालविशे
षप्राप्तेः पुनरावर्तनेहेतुरस्तिहृदयावर्जकम् यद्युच्यते यदियं
यथोक्तःकालोब्रह्मप्राप्तिहेतुर्नभवेत्तर्हिकथंब्रह्मविदोपिशान्तनव
स्तत्त्वेसमासाद्यउत्तरायणमपनीतासुनृपतेइतिसंसूच्यते किंतुब्रह्म
प्राप्तिहेतुत्वेनैनतेनासौनपनीयते यदिहिसएवब्रह्मप्राप्तिहेतुः
स्यात् तदासर्वेब्रह्मविदिहदेहान्तरेऽपवापदेशेन तत्कालोस्पृहे
दाब्रह्मसर्वेपवानाहतिभावेभजेयुः नचैवमस्तिनचैवंविधेकालेस्त्रि
यन्तेतिविधिरुपपद्यते सर्वेषांमरणेस्वातन्त्र्याभावात् भीष्मस्य
स्वतन्त्रमरणतामात्रकालप्रतीक्षणनिमित्तान्तरमनुमेयम् नचैवंद
किलस्यलक्षणायथोक्तःकालःकलेवरसंन्यासावसरेसम्पन्नतो
गतिविशेषाधानहेतुर्भवतीत्यागमवचनप्रमाणीकरणार्थंभी
ष्मस्याकालप्रतीक्षोयमस्त्यात् यथोक्तकालस्यप्रशस्तत्वेनयानाद्दि
गत्यादिरूपत्वं ननुब्रह्मविदोयोगिनोयथाक्रममेवब्रह्मप्राप्तेःपुन
राहृतेचकारणमतं यदेतत्कालगतिद्वयश्लोकेतथावर्णकस्थि
शेषावोऽत्राप्नवनिवर्तते वदन्तिवनैतेसृतीपार्थजानन्योगीमुह्यति
कश्चनेति नचैवनयोःस्मर्तव्यकालविशेषरूपयोर्देवयानपितृयाण
नसंज्ञामात्रमग्रतानेब्रह्मप्राप्तिहेतुर्भवेत् अतःकश्चिद्विशेषोवक्तव्यः
गतिहेतुत्वानुमेयः श्मावदते कालस्यदिवाद्याभ्यन्तरभेदेन

शास्त्रेषु द्विप्रकारता प्रतिपादिता तत्र प्रसिद्धसूर्येन्दुवारोपलक्षित
बाह्यप्रकारः प्राणापानलक्षणसूर्येन्दुवारोपलक्षितस्त्वाभ्यन्तरः
तत्र मुख्यस्य बाह्यस्य प्रतिपादितेन वाचकसंज्ञावाङ्ग्रोणग्राभ्यन्तरः समा
श्रीयते तेनाभ्यादय उत्तरायणपर्यन्ताः शुक्लाः प्राणगतिप्रतिपा।
दितत्वेनाभ्युपगताः पुनः प्राणगतिरेव दिवसाद्युत्तरायणान्तका
लावयवत्वेन तत्र तत्र देहस्य शास्त्रेषु तद्विशिष्टशरीरायपेतया।
प्रसिद्धा इत्थंश्चिते येषां यथोक्तज्ञाननिष्ठतया ब्रह्मविदां सन्नामन्त
कालेश्वरे सेतनसूर्यकिरणाख्ये ब्रह्मद्वारवाहिनि प्राणद्वारे नियमितं सं
विस्तोतः प्राणोपशान्तितएव सर्वतो निरवच्छेदे इति स्वरेगतिसर्गं
निर्मलसामान्यसंविन्महोदयोप्रविष्टस्समरसीभावमापद्यते तेषां
ब्रह्मप्राप्तिरयमेव पथानेनोपपन्ना सहि ब्रह्मविदां देवयानः पन्थाः एषे
कानहि विषयाशा ग्रन्थीगतिः यस्तु यथोक्तनवज्ञानव्यतिरेकेणाभ्या
सस्वीकृतकेवलयोगस्तस्य योगिनो यथोक्तप्राणगतिनियमितम
पिसंविन्स्रोतः प्राणोपशान्तितएव ब्रह्मवेदिनाभावादेहायहं प्रमय
पर्वेतप्रतिहतप्रसरं संसरावर्तते परावर्तमानं च धूमादिदक्षिणाय
नशाह्णान्तप्रतिपादिता मयानष्टत्रिमेव पितृयानलक्षणां गतिं समा
श्रित्य योगाभ्यासप्रकर्षानुसारे विते विशिष्टशरीरान्तरमाविशति
पत्र प्रवीभ्यासक्रियमाणाविनतया प्रकृष्टतरोत्तरेण यत्नमानः प
रां सिद्धिं प्राप्स्यतीमक्षे तदयमत्र संक्षेपार्थः ये तानि नाब्रह्मविदः
सन्तोन्तकाले यथोक्तक्रमेण प्राणप्राप्त्यालम्बनाविन्तह्मयलस्वरूपा
क्तितत्राप्यविलम्बपरतत्वस्वरूपादेहमुत्सृजन्ति तेनैव यथान ब्रह्म
प्राप्निव प्रावृत्तरावर्तन्ते येन केवलयोगिनस्तत्र प्राणाहतिमा
श्रित्य देहमुत्सृजन्तो तानि ताभावामरतत्वस्य भावेसत्युत्क्रामन्ति
तेदेहायत्नपरनाहं प्रमयचनात् पानहतिं संसारमार्गमाश्रित्य विशि
ष्टदेहान्तरमाप्नुवन्ति यतस्सर्वेस्यकस्यविक्षारिणस्सर्वे सं साधि
साधारणप्राणाहमाश्च प्रयाणेन वर्तमानादेहादुत्क्रान्तस्य प्राणनहमा
प्रयाणेन भविष्यद्देहसंक्रान्तिर्भवति ब्रह्मविदो योगिनां चेदं प्रकारेण

गी. विशेषः प्रतिपादितः धूमपन्श्राणा पानलन्तणा नारविशिष्टमार्गो

टी. ह्येतेनेतन्मसहानमाह २५ ॥

ग्र. अथ शङ्करं भावितात्मा लासिकी टीका नेयोगिनस्तत्कालेस्वस्वरूपस्मरणभावा

तिदायिनीमवस्थांदर्शयति॥ पूर्वंबहुमादयः शब्दाब्रह्मदाराख्यातिरिक्तमार्गवाहिनिशरणेनब्यापा

नसंतेसाधर्म्यणलक्षिताः तथाहि मेवशाणाहतिर्धूमोतानावरकता

त् तथामनुष्याणांत्रिंशद्घटिकाप्रमाणारात्रिरविद्यालन्नणस्यापदेतः

पवेकृत्स्न पतःपितृणांरात्रिः षण्मासादक्षिणायनदेवानांरात्रिः नत्रे

दशोवस्थाविशेषवाद्रमसंज्योतिर्रुलवतीवन्द्राख्यापानाहतिशाप

स्तापायाधिकतोदेहाद्वत्क्रामदेवपितृमनुष्येषुमतमोमितयोगीग्र

भ्यासेनस्वीकृतयोगविशेषोनिवर्तते भोगायजन्मप्राप्नोति पञ्चयो

गाभ्यासप्रकर्षोचितेशरीरप्राविशन्योगाद्भ्रष्टः श्रद्धाभ्यासक्रियमान

चित्ततयाप्रयतमानःपरांसिद्धिंप्राप्नोतीतिपठऽक्तम् बहूनांजन्मना

मन्तेज्ञानवान्मांप्रपद्यते इति पष्ठयोगिनःपितृयानःपन्था यतनेविष

मभिसमभवन्तीमादर्केश्रुतिमालभ्यागम्यादिलोकगमनक्रमप्रक्रिज

न्मवाभवतीत्यावर्तते नतुगुणब्रह्मोपासकविषयम् अत्रनिर्गुणो

पासनस्यप्रकालनवान्नतत्कृतोपयोगि यतःकालस्यबाह्याभ्यन्तर

भेदेनद्वैरूप्यशास्त्रेद्विप्रकारता प्रतिपादिता नत्रप्रसिद्धबाह्यस्यै

दुवारोपलक्षितायाग्न्यादिलोकगमनक्रमप्रक्रिजन्मवासगुणोपासको

चितम् अभ्यन्तरप्राणापानलक्षणस्यैवतुवारोपलक्षिताग्न्यादिग

तिक्रमप्रकारानिर्गुणोपासकोचितेतिविवेकः अतएवभीष्मेणस्वत

न्त्रस्वात्मनिर्गुणात्मावहस्थप्रतिष्ठेनपुरोवर्तिनःसगुणब्रह्मणःश्री

कृष्णस्यध्याननिष्ठेनबाह्याभ्यन्तरेदेपवगतीस्वीकृते अन्यस्यतस्या

तन्याभावात्तनस्या धूमानयोरवस्थयोरन्नाहृत्याह्निरोतानयोःसंज्ञा

ह्येतेकर्मियनसमाह २५ ॥

दक्षिणमार्गमाह धूमइति तथायोगीकर्मयोगीकेवलं
कर्मीइदं शरीरंत्यक्त्वा धूमाभिमानिनींदेवतांप्राप्यततोरात्र्य
भिमानिनींदेवतांप्राप्य ततः कृष्णपक्षदेवतां ततः षण्मासदेव
तांप्राप्य ततः क्रमसुकृत्वात्मादेवताक्रमेणप्राप्य चंद्रलोकेगता
तत्रकर्मफलभोगाननुभूयकृतात्ययकर्मणः शंतेपर्जन्यपृथिवी
पुरुषयोषितक्रमेणापुनरावर्तते २५ ॥

रणवीरसमिद्धोधिनी ॥

इत्थमनावृत्तिदेवकमपिकालविशेषमभिधायेदानीमावृत्तिदेव
कमपितमाह धूमइति धूमोधूमप्रायोगार्हपत्यादवनीयोभयलत
रणोऽग्निः यःपाकोनिकैः प्रस्थानेप्रपास्यतयाकथितः तेनवायिदोग
योग्यः पूर्वराज्ञोलक्ष्यते यद्वाधूमाउत्पाद्यमानमभ्रंधूमपाहलत्वंका
र्थेकारणोपचारात् धूमज्योतिःसलिलमरुतां निपातस्येवचमेव
माहार्थत्वात् अथचधूमःसाहचर्यलक्षणयातमः तथाचमेवक्ष
ज्ञातामसीचरात्रिरिति पर्यवसितं तथालीयमानसोमोपलक्षितः
पंचदशाहोरात्रःकृष्णःपक्षः तथाकर्कटादिषट्चरेतरांशिषट्कसं
वारिरविचारोपलक्षिताः षण्मासादक्षिणायनं तत्रतस्मिन्काले
योगीयोगःसन्त्वहनोपायध्यानसंगतिमुक्तिक्षितिकोशालतसं
न्त्वहनःसत्प्रतिप्रस्थितइतियावत् चान्द्रमसंज्योतिः चंद्रमामन
सोज्ञानइति श्रुतेरात्मारविमतश्चंद्रइत्यादिस्तदेषवंद्रमसोमनन
समद्वंज्योतिः स्फोरणंनिवृत्तिदेवभूतंपूर्वप्रतिपादितस्वरूपंसंकल्प
जालेप्राप्यनिवर्तते संग्राममहालेवततःसकामात्मतयावर्तते अथ
मोकमोहादिभिरभिभूतःसन्पलायतइतिभावः अथचतत्रतस्मि
न्नेवकालेऽत्रप्रकारायनानुलोम्येनतिप्रस्थितःसन्दग्गोदिग्भिः
नंमुखंदहनश्चंद्राग्निनानुलोम्यानुसारेणप्रस्थानेनेववंदेवनातानेववा
विजित्यरान्यसहवेनत्र्कषाद्युपमतिबाधदेहाउक्तंतोयोगीपार

134

संधानादिलक्षणकर्मकुशलः क्षत्रियश्चांडमसंन्योतिस्स उपलक्षि
तं स्वर्गलोकं प्राप्य यथाकालं च तद्भोगान्भुक्त्वा निवर्तते विशिष्टतर
भोगाधिकरणयोग्यशरीरादिसंबंधं लभते तथैव च जन्मनि पुनरु
नरायणादिकाले उक्तप्रकारद्वयान्यतरप्रकारकप्रयाणादेव च म
मसाधुत्वं गच्छति न पुनर्नरकमितिभावः एतएव च पूर्वमपि गी
तं पार्थ नैवेह नामुत्रेत्यारभ्य ततोयाति परां गतिमित्यंतेन ग्रंथेन
यः पुनरस्य स्वभावः प्राग्जन्मार्जितपापराशुदयेनायनप्रात्य
लोभ्येन गतः समयो भयशोकाद्यभिभूतः सन्विमुखीभूय पलाय
मानो तत एव रिपुभिः पश्चादागत्य निहतो निरयगतिमेव व्रजति
नकदाचिस्वपतंस्तिभावः तथा च मनुः यस्तु भीतः पराहृतः स
ग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते यच्चा
स्य सुकृतं किंचित्परागुत्यहन्तस्य चेति याज्ञवल्क्योपि राजा सुकृ
तमादत्ते हतानां विपलायिनामिति पापाचारस्य निरयगति
रव्यभिचारिणीति सर्वं सिद्धांतः २५॥

मधुभाष्य

२५॥

भाष्य अनुवाद टीका ॥

और जिस राह से गमन करि फेरि संसार मे आवते सो कहते है कि प्रथम धूम मे प्राप्त होयफेरि धूमसे रात्रि मे रात्रिसे कृष्णपक्ष मे कृष्णपक्षसे दक्षिणायन छमासमे तबपितृलोक मे उस से फेरि चन्द्रज्योति मे प्राप्त होय योगी फेरि निवृत्तहोते हैं इहां भी धूमादि शब्दों से तदभिमानिनी देवतालेते हैं कामनाकरि कर्मकारियों की यह गति है कि कर्मफल भोग करि फेरि संसार होता है २५ ॥

दोहा

धूम तमी औ कृष्णपक्ष दक्षिणायन षट माहि प्रापत चंद्र की।
ज्योति को योगी तहां हूट जाहि २५॥

135

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः २६ ॥

शाङ्करभाष्यं टीका ॥

शुक्लेति शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे ज्ञानप्रकाशकत्वात् शुक्ला तदभावात् कृष्णा एते शुक्लकृष्णे हि गती जगतः इत्यधिकृतानां ज्ञान कर्म्मणोरेवैते गती सम्भवतः शाश्वते नित्ये संसारस्य नित्यत्वान्नित्ये मते अभिप्रेते तत्रैकया शुक्लया यात्यनावृत्तिमन्ययेतरया वर्त्तते पुनः भूयः २६ ॥ [माद्यत्ति]

आनन्दगिरिकृत टीका

अर्चिरादौ मृतानां ब्रह्मविदामब्रह्मप्राप्तिशङ्कां निरस्यार्थमभिमानिनी देवताग्रह णाय मार्गयोर्नित्यत्वमाह शुक्लेति ज्ञानप्रकाशकत्वाद्विद्याप्राप्यत्वाद् अर्चिरादि प्रकाशोपलक्षितत्वाच्च शुक्ला देवयानाख्या गतिस्तदभावाज्ज्ञानप्रकाशक त्वाभावात् धूमाद्यप्रकाशोपलक्षितत्वादविद्याप्राप्यत्वाच्च कृष्णा पितृयान लक्षणा गतिः तयोर्गत्योः श्रुतिस्मृतिप्रसिद्धार्थो हिशब्दः जगच्छब्दस्य ज्ञानक र्माधिकृतविषयत्वेन सङ्कोचे हेतुमाह तज्जगत इति अन्यथा ज्ञानकर्मोपदे शानर्थक्यादित्यर्थः तयोर्नित्यत्वे हेतुमाह संसारस्येति मार्गयोर्वत् संसा रभावित्वे फलितमाह तत्रेति क्रमसमुक्तिरनावृत्तिः भूयो भोक्तृत्वकर्म्मवतये शेषकर्म्मवशादित्यर्थः २६ ॥

स्वामिकृत टीका ॥

[शुक्लौ मार्गाबुपसंहरति] शुक्लाअर्चिरादिगतिः प्रकाशमयत्वात् कृष्णाधूमादिगतिः तमोमयत्वात् [संमते] एते गती मार्गौ ज्ञानकर्माधिकारिणो जगतः शाश्वती अनादी संसारस्याना दित्वात् तयोरेकया शुक्लया अनावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरा वर्त्तते [illegible] २६ ॥

पिशाचभाष्यम् टीका

शुक्लाचकृष्णा च शुक्लकृष्णे गती मार्गौ ज्ञानप्रकाशयुक्तस्य योगिनः शुक्लपक्षो गतिः ज्ञानप्रकाशरहितस्य कर्म्मिणः कृष्णपक्षो गतिः जगतः अस्य योगिनः कर्म्मिणश्चोक्ते एते शाश्वते नित्ये प्रवाहनित्यत्वात् एकया यात्यनावृत्तिमपुन रावृत्तिवत् ब्रह्मलोकस्थितिं अन्यया आवर्त्तते पुनरागच्छति मनुष्यलोके नत्वपरमस्मिन्ब्रह्मलोके प्रयाणे तत्र प्रयाता गच्छति परमेव कथं न गच्छते

गी॰ टी॰ अ॰ निषेधात् अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः तदेतन्नपश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति २९ ॥

130

रामानुजभाष्य टीका

शुक्लकृष्णे इति शुक्लागतिरर्चिरादिका कृष्णा च धूमादिका शुक्लया याति अनावृत्तिं याति कृष्णया तु पुनरावर्तते एते शुक्लकृष्णे गती शाश्वते अनादी विद्यानामुपासकर्मणां कृतां श्रुतेषु तेन तेन पञ्चाग्निविद्यायां च य एवमेतद्विदुः ये चामी अरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्ति अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीति २९ ॥

अभिनवगुप्तकृत टीका [illegible] २९ ॥ परमार्थप्रपा

अनयोर्गत्योर्मध्यादाद्यया नावृत्तिर्मीतः अन्यया भोगः एते सतीयो वेत्ति आभ्यन्तरेण क्रमेण योगाभ्यास स्वीकृतेनेत्यर्थः एतत्त्वविनत्य प्रकाशमानं ग्रन्थं विस्तारयतीत्यलम् २८

तदेवं निवृत्तिकर्मोपासनया क्रममुक्तिं तथा काम्यस्वर्गभोगानन्तरं आवृत्तिमुक्तेदानीमुपसंहरन्स्पष्टमाचष्टे शुक्लकृष्णे इति प्रा॰ शुक्ला आर्चिरादिगतिः प्रकाशरूपिणी कृष्णा धूमादिगतिस्तमोरूपिणी एते गती मार्गौ ज्ञानकर्माधिकारिणोर्जगतः शाश्वते अनादिसम्मते संसारस्यानादित्वात् तयोरेकया शुक्लया अनावृत्तिं मोक्षं गच्छति अन्यया कृष्णया पुनरावर्तते मा॰ अकुलागमेतु ईश्वरः पार्वतीं प्रति गीतार्थस्य भावार्थं न जानन्ति यथार्थतः प्रलपन्त्यन्यथा गुरुया आमिना विसृज्यया अग्निष्टमात्मको मार्गो वामतः प्राणोऽपानः पिङ्गलास्थितः प्राणोऽग्निः समुद्दिष्टः पानोऽष्टमः प्रकीर्तितः वृत्तेनैतेसहयोगेन परस्परविलक्षणे तत्रैकस्याश्रयो ब्रह्मा द्वितीयस्याश्रयो भवः गमागमप्रयोगेन सोमस्य दक्षिणतः स्थितो अग्न्योर्न्यगतिसंचारात् संक्रान्तिः साभिधीयते उत्तरायणे प्राणस्यापानो दक्षिणायने सोऽयं द्वाऽश्मसंज्ञे त्यान्तिः क्रमेणाग्नावस्थिते उक्तानेन यदा जीवः सोऽमित्तिप्रविश्य वनवरानन्तु मेरोयाइमयोस्तक्रमशुष्मायायदा [illegible] सं ग [illegible] स्थितः जीवन्मुक्तत्वमायाति कालस्यागोचरस्तदेति २९ ॥

वनमाली टीका ॥

उक्तौ मार्गावुपसंहरति शुक्लेति शुक्लार्चिरादिगतिः ज्ञानप्रकाशमय
त्वात् कृष्णा धूमादिगतिः ज्ञानहीनत्वेन तमोमयत्वात् एते गते हि प्रसिद्धे
ज्ञानकर्मिणोर्जगतः सर्वस्यापि शाश्वते अनादौ मते संसारस्या
नादित्वात् तयोरेकया शुक्लया नावृत्तिं याति अन्यया कृष्णया पुन
रावर्तते सर्वोपि यत्त्वर्चिरादिमार्गेण सगुणोपासकाः क्रममुक्तिभाजो ग
च्छन्ति सद्यो मुक्तिभाजस्तु न एवमुच्यते तेन त्वर्चिरादिमार्गं गच्छन्तीति तत्र अ
र्चिरादिधूमाद्यतिरिक्तप्रकारस्याकाम्यकृतत्वात् निर्विशेषवादिनः स्व
रूपमात्रस्य सदोपलब्धत्वात् नहि तत्स्वरूपस्य दुःखाभावस्य च लोके पु
रुषार्थतया प्रसिद्धस्याभावात् नच विस्मृतकण्ठस्थमणिलाभवल्लाभोपय
त्तिः तत्र मणिज्ञानजन्यसुखस्य दुःखाभावस्य च पुरुषार्थत्वात् अज्ञाना
परिज्ञानतया सुखादिसाहित्याभावात् स्वरूपमात्रस्य सदाभानेन विस्मरणा
संभवाच्च स्वरूपमात्राद् धिकस्य मोक्षस्याभावाच्च अनेकजीववादे एको
पाधिनिर्मुक्तस्यापि चैतन्यस्योपाध्यन्तरेणावच्छिन्नत्वेन मुक्त्यसंभवा
न एकजीववादे त्वेकोपि न मुक्त इति बहूनां मुक्तिर्बाधिकाः अतः
स्य तयश्चासंगता एव २६ ॥

अथ वैजयन्ती टीका

उक्तौ मार्गावुपसंहरन्नाह शुक्लकृष्णे इति जगतो ज्ञानकर्माधिकारिणः
एते पूर्वोक्ते शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे अनादौ मतेन
इति निश्चयेन गती पद्धती शाश्वते अनादौ संसारे संभवतीत्यादि
अर्चिरादिकालस्याः प्रकाशरूपत्वात् गती पद्धतौ शाश्वते ... अभिसंभवतीत्यादि
धूमादिकाले तस्याः ... एकया शुक्लया गत्या अनावृत्तिं मुक्तिं याति ज्ञानयोगी म
यद्यस्य विरुद्धे विमेऽरपोपसृष्टानयदुपासते तेषु ... पुनरा
श्रुतिसंमते भवतः एकया शुक्लया गत्या अनावृत्तिं मुक्तिं याति स पुनरा
वर्तते संसारं प्राप्नोति अन्यया कृष्णया गत्या यः कर्मयोगी मन्दः सोयाति
... प्राप्नोति २६ ॥

अथ मधुसूदनी टीका ॥

उक्तौ मार्गावुपसंहरति ॥ शुक्लार्चिरादिगतिः ज्ञानप्रकाशमयत्वात् कृष्णा धूमादिगतिः ज्ञान
हीनत्वेन तमोमयत्वात् ते एते शुक्लकृष्णे गती मार्गौ हि प्रसिद्धे जगतो वि
द्याकर्माधिकारिणो जगतः सर्वस्यापि शाश्वते अनादौ मते संसारस्याना
प्रात्वात्तस्य

गी· दित्वात् तयोरेकयाशुक्लयायात्यनावृत्तिंकश्चित् अन्ययाकृष्णयापुना
टी·ग्र· रावर्ततेसर्वेपि [illegible] २९ ॥

सदानंदी टीका ॥

अर्चिरादिगतिःशुक्लाधीप्रकाशमयत्वतः धूमादिकगतिः कृष्णाज्ञानहे
ततयातमः शास्त्रज्ञस्यापिसर्वस्यविद्याकर्मादिकारिणः एतेगतीप्रसि
137 द्धेह्यनादीजगतोमते संसारस्याप्यनादित्वादनादित्वंतयोर्मते शुक्ल
यायात्यनावृत्तिंकृष्णयावर्ततेपुनः २९ ॥

नीलकंठी टीका ॥

उक्तौमार्गावुपसंहरति शुक्लेति शुक्लाज्ञानहेतुत्वादर्चिरादिगतिः
तदभावात्कृष्णाधूमादिगतिः एकयाशुक्लया अन्ययाकृष्णया २

एतदुपसंहरति ॥ आनंदी टीका

शुक्लाप्राणगतिःकृष्णाअपानगतिःअनावृत्तिःमोक्षःआवृत्तिर्भोगः
२६

अतएवप्राणापानलक्षणांतर रामकंठीटीका

विशिष्टमार्गद्वयेत्वेनैतत्संगृह्णीतुमाह ॥
एतेयथोक्तेद्वेगतीप्राणापानवृत्तिरूपेदेवयानपितृयानसंज्ञेहिमा
र्गौजगतःसर्वस्यलोकस्यशाश्वतइतिस्यादसःपाठः तेननित्येनसर्वः
कश्चिज्जनस्तिर्यग्वाहिअपानमार्गाश्रयेणनदेहाद्उत्क्रामति अपान
मार्गाश्रयणेनदेहान्तरेसंक्रामति ब्रह्मविदोयोगिनश्चायंतुविशे
षोयदनयोर्गत्योर्मध्यादेकयोर्धिवाहप्राणरूपयाशुक्लगत्याययो
क्तप्रकारेणान्तकालेसमाश्रितयाब्रह्मविदनावृत्तिंयातिब्रह्मप्राप्नो
ति योगीतुतयैवोत्क्राम्यान्ययापानरूपयाकृष्णयोक्तेनहेतुनाव
र्ततेविशिष्टदेहांतरेसंक्रामतियतः २६

अथानयोरवश्ययोरनावृत्त्या ल्लासिकी [illegible]टीका
दिप्रसिद्धेएतेअनंतरोक्तेशुक्लकृष्णगतीमार्गौशुक्लाज्ञानप्रका
वृत्तिदायिन्योःसंज्ञापूर्वकनियततत्वमाह ॥
शमयत्वात् कृष्णाज्ञानतमोवृतत्वात् जगतोयोगाधिकारिणो
लोकस्यशाश्वतेनित्येप्रवाहरूपमाविस्योमतेनिश्चितेतत्रैकयाशु

क्रयाग्निर्ज्योतिरित्यादिलक्षितया सततयोगाभ्यासलब्धप्रक
र्षो योगी अनावृत्तिं मोक्षं याति प्राप्नोति अन्यया कृष्णया धूमरा
त्र्यादिलक्षितया कदाचित्कयोगपरो योगी पुनर्देहत्यागानंतर
मावर्तते देहांतरे संक्रामति यत्र पुनर्योगपरिशीलनेन शुक्ला
गतिमासाद्य मुच्यते अत्र स्यात्कृष्णाया गतेरेव निश्चितविषय:
मानतया न तत्र संशयावकाश: अत्र शास्त्रे इत्युक्तेरेतदभिव्य
ज्यते य: कश्चित्तत्त्वतो योगपरस्स स्यादप्यत्र जन्मनि परत्र ज
न्मनि वा विदेहमुक्ति: स्यादेव जीवन्मुक्तिस्तु योगी सहस्रेषु म
ध्ये कस्यचिदेव परिपक्वभक्तेरीश्वरानुग्रहेण संप्राप्नोति यतस्त
त्राप्युक्तं स महात्मा सुदुर्लभ इति [illegible]

[illegible] २६

पंचोलेटीका:

उक्तावुत्तरदक्षिणमार्गावुपसंहरति शुक्लेति हि निश्चितमेते शु
क्लकृष्णे ज्ञानप्रकाशाच्छुक्लत्वादेवैका शुक्ला उत्तरा कृष्णा दक्षिणा
पते उभे जगदिति ज्ञानकर्मणोरधिकृतानां सर्वस्य जगत: गती
मार्गौ शाश्वते नित्ये ब्रह्मज्ञानपर्यंतं जगतो नित्यत्वाविनाशिमो
मते अभिप्रेते अनयोर्गत्योरेकया शुक्लया अनावृत्तिं याति अन्य
या कृष्णया पुनरावर्तते २६

गावीरमित्रोदयिनी॥

उक्तमेवार्थं संगृह्णाति शुक्लकृष्णेति शुक्लकृष्णमार्गावुपलक्ष्या
भिधायिनौ प्रकाशांधकारमयत्वसाम्याद्दिनरात्रिशब्दोपलक्षयत: देवा
नां च दिनरात्री सूर्यस्योदग्दक्षिणगती तथा च एते पूर्वं प्रतिपादि
तस्वरूपे शुक्लपक्षादिनकृष्णपक्षरात्रिसहिते गती विशेषवत्यो
ईदृग्दक्षिणायने अथवा गत्यर्थयोरधिष्ठानदेवताधिकरणोक्तिना
गमनानुकूलप्रतिकूलकालविशेषलक्षणे शुक्लकृष्णसंज्ञके गुहा

ष्टुदेवमुहूर्तेनगतः गच्छतीति कुत्यस्याहि प्रकारं प्रयाणं कुर्वतः
तस्मादि लोकस्य प्राप्यते नित्यमेतदुक्तकालयोर्मध्ये यियासोरप्र
तमेव स्वपं प्रयाणादिति भावः तयोर्मध्ये एकयोक्तलक्षणयापूर्व
याप्युक्तसंज्ञयागत्या प्रयातो जनउक्तलक्षणमनावृत्तिं यातिप्रा
प्नोति अन्यथा परतो निर्दिष्टया कृष्णसंज्ञयागत्या तु नरावर्तनेउक्त
लक्षणां पुनरावृत्तिं प्राप्नोति २६॥

मधुभाष्य

२६॥

भाष्य अनुवाद टीका

येई शुक्ल कृष्ण दो गती जगत मे सनातन से चली आवती हैं इन मे मुक्त निःकाम कर्म्मकारी ज्ञानी शुक्लके वे प्रकाश मार्ग से गमन करके मुक्त होते और नाना मनोरथ करके यज्ञादि कर्म्मकारी मनुष्य कृष्ण कहे अन्धेरी धूममार्गसे गमन कर कर्म्मफल भोगके अनन्तर फेरि संसार मे आय जन्मग्रहण करते हैं २९ ॥

दोहा

शुक्ल कृष्ण जो मार्ग यह नित्य जगत के मान मोक्ष हि देवे एक

सें एक हि जन्म प्रमान २६॥

139

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन त
स्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन २७

शाङ्करभाष्यं टीका ॥

नैते इति नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसारायैकान्या मोक्षाय
चेति योगी न मुह्यति न कश्चन कश्चिदपि तस्मात् सर्वेषु कालेषु योग
युक्तः समाहितो भवार्जुन २७ ॥

आनन्दगिरिकृत टीका ॥

गते कथमस्य न्याय तद्विज्ञानं सेति नैतइति योगस्य मोहापोहकत्वे फ
लितमाह तस्मादिति ज्ञानप्रकारमनुवदति संसारायेति मोक्षाय क्र
ममुक्त्यर्थमित्यर्थः योगी ध्याननिष्ठो गतिमपि ध्यायन्नेव मुह्यति केवल
कर्मसदक्षिणमार्गप्रापकं कर्तव्यत्वेन न प्रत्येतीत्यर्थः योगस्यापुनरा
वृत्तिफलत्वे नित्यकर्तव्यत्वं सिद्धमित्युपसंहरति तस्मादिति २७ ॥

मार्गज्ञानफलं दर्शयन् ॥ स्वामिकृत टीका ॥ भक्तियोगमुपसंहरति एते सृती जानन् कर्ममार्गो मोक्षः संसारप्रापको मो
क्षप्रापकश्चेति [illegible] न कश्चिदपि योगी न मुह्यति स्वर्गादिफलं न कामयते किं
[illegible] निष्ठ एव भवतीत्यर्थः स्पष्टमन्यत् २७ ॥
[illegible]

पिशाचभाष्यम् टीका ॥

नैते सृती मार्गौ जानन् तत्त्वतो गच्छन् योगी उपासकः कश्चन कोपि मुह्यति कृ
मादर्चिरादिमार्गेण ब्रह्मलोकं उत धूमादिमार्गेण पितृलोकमिति २७

रामानुजभाष्यं टीका ॥

नैतइति एतौ मार्गौ जानन् योगी प्रयाणकाले कश्चन न मुह्यति अपि तु स्वे
नैव देवयानेन यथा याति तस्मादहरहरर्चिरादिगतिचिंतनाख्ययोगयुक्तो भव २७

अभिनवगुप्ताचार्यकृत टीका [illegible] सर्वेष्वेव कालान्तरभावेष्वपि योग
अभ्यसेत् अस्मद्गुरवस्त्वाहुः सर्वानुग्राहकत्वाद्
कृतयामध्ये आभ्यन्तरकालकृतनुत्क्रान्ति
भेदमभिधाय प्रकृतमेव मुख्यं प्रसंगपतितं
संहरति तस्मात्सर्वेषु कालेष्वित्यादिना २७

परमार्थप्रपा टीका ॥

गी
टी-ग्र·

140

अथ मार्गज्ञानफलमाह नैत इति भो पार्थ योगी मनुष्य एते सृती मार्गौ जा
नन् कश्चिदपि न मुह्यति स स्वर्गादिसुखं न कामयते [illegible]
किंत्वात्मनिष्ठ एव भवति तस्मात्सर्वेषु कालेषु भोजनासनादिसमयेष्वपि
योगयुक्तः जीवब्रह्मणोरैक्यपरिनिष्ठितो भव २७ ॥

वनमालीटीका ॥

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति नैते इति योगो ब्रह्मसा
क्षात्कारवान् महायोगी एते सृती मार्गौ ब्रह्मचापोह्नं जानन् न मुह्यति वै चिरं
न श्रमोति सृतीः तत्त्वातः इयायेचानुष्टाय एवगतिं प्राप्य ब्रह्मश्रमोतीत्य
र्थः यतो भक्तियोगस्य पुनरावृत्तिरूपं फलं तस्मात्सर्वेषु कालेषु भक्तियु
क्तो भव समाहितचित्तो मय्यासक्तप्रेमयुक्तो भवेत्यर्थः २७ ॥

ॐसमैवजयन्ती टीका ॥

एतयोर्ज्ञानस्य ज्ञानकारणत्वं वदन्नेव स्तौति नैते सृतीति हे पार्थ एवं
प्रकारेण एते द्वे सृती अर्चिरादिधूमादिपन्थानौ जानन् अर्चिरादिमार्गो
मोक्षहेतुः धूमादिः संसारहेतुर्भवतीति विदन् सन् योगी ज्ञाननिष्ठश्चेत
नाचेतनब्रह्मस्वरूपज्ञ इत्यर्थः कश्चन कश्चिदपि मन्दो न मुह्यति धूमा
दिप्राप्तिसाधनं न करोति किंतु अर्चिरादिप्रापकमेव निश्चिनोतीत्यर्थः
[illegible]
[illegible] यस्मादेवं तस्मात् हे अर्जुन सर्वेषु काले
षु प्रतिदिनं योगयुक्तोऽर्चिरादिगतिप्रापकस्मरणलक्षणो योगस्तद्युक्त
स्त्वं भव धूमादिमार्गप्रापकं कर्म माकुरु इत्यर्थः २७ ॥

गतेरुपास्यत्वायतद्विज्ञानं स्तौति ॥

मधुसूदनी टीका ॥

एते सृती मार्गौ हे पार्थ जानन् क्रममोक्षायैका पुनः संसारायापरेति नि
श्चिन्वन् योगी ध्याननिष्ठो न मुह्यति केवलं कर्म धूमादिमार्गप्रापकं क
र्तव्यत्वेन न प्रत्येति कश्चित्कश्चिदपि तस्माद्योगस्यापुनरावृत्तिफलत्वात्
सर्वेषु कालेषु योगयुक्तः समाहितचित्तो भव अपुनरावृत्तये हे अर्जुन
[illegible] २७ ॥

सदानन्दी टीका ॥

तवैका क्रममोक्षाय संसारायापरा सृता इत्येवं ध्याननिष्ठो हि निश्चिन्व
न्नैव मुह्यति योगस्यापुनरावृत्तिफलत्वादेव सर्वदा निरन्तरं समाधाने

विनंकृतविमुक्तये २१ ॥

नीलकंठी टीका ॥

एतेसृतीमार्गौआवृत्त्यनावृत्तिफलेजानन्योगीनमुह्यतियोगयुक्ता
प्तोऽयतिरल्पप्रयत्नस्य योगीनभवति कश्चनकोपि यस्मादेवंत
स्मात्सर्वेष्वित्यादिस्पष्टं २१

आनंदी टीका

एतेउक्तयुक्त्याआभ्यंतरेणक्रमेणयोगाभ्यासस्वीकृतेनउत्तरदक्षि
णेपदव्यौजानन् कश्चनयोगीनमुह्यति लब्धभूमिस्सन्नैवाधःपत
तीत्यर्थः तस्मादर्जुनसर्वेषुकालेषुसर्वेकालायेवाह्याआभ्यंतराश्च
तेषुयोगयुक्तोभवेतिसर्वानुग्राहकतयामध्येकालकृतमुत्क्रांति
भेदमभिधायप्रकृतमेववाह्यकालविषयमेवमुपसंहृतमित्यभि
युक्ताः

रामकंठी टीका

एतेयथोक्तेसृतीप्राणापानरूपेगतीजानन्यथोक्तयामहत्तया
प्रतिपाद्यमानोयोगीप्राक्तनप्रतिपादितस्वीकृतमुख्ययोगोनकश्चि
न्मुह्यति सर्वएवतत्कृतिज्ञःसन्ब्रह्मप्राप्तिहेतुगतिसमाश्रयणेन
ब्रह्मैवप्राप्नोतिनतुसंसारमितरगतिपरिहारात् एतयोश्चगत्योरेवं
विधांमहतांब्रह्मविदांज्ञेयत्वेनस्थितांतत्वविदोवदंति सर्वदेहेषुम
नःप्रसरसहचरोयंप्राणप्रसरोयतउदेतियत्रचास्तमेतितत्कालक
लनादिसकलप्रपंचविरहितब्रह्मतत्वोपलब्धिपदं ततश्चयथोक्त
प्राणप्रसरनिबद्धःसकलःकालादिप्रपंचःतदुदयास्तमयदशा
विमर्शत्वमसंविदांब्रह्मविदांप्रलीयते तादृशीवदशामासाद्ययो
ब्रह्मवित्परमयोगीदेहमुत्सृजतिसब्रह्मएवपरिणतोनपुनरावर्ती
ते यस्तुकेवलयोगीतांदशांतथाप्राप्तवमहुनकुशलःसर्वांइमसं
ज्योतिरपानप्रसररूपमाश्रित्योत्क्रामन्देहान्तरेसंक्रामति यत्रक्र
मेणसिद्धिमाप्स्यतीत्येवमनयोर्गत्योःसिद्धिहेतुविभागविज्ञानम
नएवोक्तं नैतेसृतीजानन्योगीमुह्यतीति यतएवंतस्मात्सर्वेषुका

गीं॰ लेषु वा सर्वेष्वेतेनरायणादक्षिणायनादिवक्रमभेदोक्तेषु योगयुक्तो
टीं॰ भव यथोक्तप्रकारेण प्राणापानगतिज्ञानात्मके योगे समाधौ यु
अं॰ क्तो वहितो भव । यतोस्य योगस्यायं प्रभावः २३

अथैतेनयोर्गत्योःपरिज्ञानस्यफलमाह ॥—

लाक्षिकी [illegible]टीका

हे पार्थ कश्चन योगी उक्तविधेषु योगभेदेष्वन्यतमयोगभेदयुक्तो
योगी एते यथोक्ते सृती गती जानन् शास्त्राभ्यंतरेण क्रमेण योगाभ्यासस्वीकृते
२५१ न जानन् अभिजानन् न मुह्यति देहादिष्वात्मप्रत्ययं न भजते यत एवं ता
स्मात्सर्वेषु कालेषु कालविशेषभूतास्ववस्थासु योगयुक्तो योगी जीवन्मु
क्तिविदेहमुक्त्योः प्रथमोपायभूते आत्मसमाधाने युक्तः सावधानो भव हे
अर्जुन यतो नित्यसमाधानेनैव परमार्थसिद्धिः न तु परिमितकाला
नुष्ठितेन योगेनेत्यस्य सहकारी भगवतोपदिष्टं तथा च कुलार्णवे तस्मात्स
र्वप्रयत्नेन सर्वावस्थासु सर्वदा तत्त्वनिष्ठो भवेद्देवि यदीच्छेन्मोक्षमात्म
न इति यथोक्तस्याध्यायार्थस्य प्रभावमाह २२

पंचोली टीका

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति नैते इति हे पार्थ एते य
थोक्ते सृती मार्गौ एका शुक्ला मोक्षाय अपरा कृष्णा संसाराय इति जा
नन् कश्चिदपि योगी न मुह्यति हे अर्जुन तस्मात्सर्वेषु कालेषु सर्वदा
योगयुक्तः आत्मनि समाहितो भव २७

रणावीरसमिद्धोयिनी ॥

अथैतावद्याकालसमययोगज्ञानस्य मोहनिवर्तनरूपफलकथनेन नार्थं
नेतावद्याकालएवसंज्ञीकर्तुमाह नैते इति सृती इति एते उक्तलक्षणे
स्ती शुक्लादि श्रुते अर्कस्योदगदक्षिणे अयने तल्लक्षणो शुभाशुभमु
हूर्ते जानन् अनुलोमतया प्रतिलोमतया चानुहत्याहतिद्रष्टके इति
पापः अन्यथाकालयोगज्ञानमात्रेण मोहं निहत्य नुपपन्नः कश्चन
पि योगी योगः शुक्लादिकालसमागमो विद्यते यस्य वेद्यत्वेनेति योगी
शुभाशुभमुहूर्तं ततः अथ चेतावद्यापवकालयोगे कृतसमन्वहनम्

नमुह्यति भवानिव कम्पमलं न गच्छति तस्माद्धेतोस्त्वमपि सर्वेषु
कालेषु योगयुक्त उक्तलक्षणमुहूर्तज्ञाने समाहितः तादृशो मु
हूर्ते मुहूर्ते एवमनुतिष्ठस्व भवेति ननु सर्वेष्विति कोऽर्थः न तावत्
शुक्लादिशुक्लमासादिषु चेति उभयोर्विधयोः शुभाशुभमुहूर्तकथन
स्य व्यर्थत्वात् नापि भूतवर्तमानभविष्यत्सु त्रिष्वपीति भूते प्रय
त्नस्यासंभवाद्व्यतीतत्वात् वर्तमानेपि सन्ध्यावन्दनादियोगस्य सं
पन्नत्वात् भविष्यति च तत्सार्थकत्वेपि सर्वेष्विति पदानर्थ
क्यात् इति चेन्न अथ येपि च यानेका एवंविधाः समयश्च या विधेया
स्तत्रापि शुक्लादिकालसमागम एव विधार्थ इत्यनेकवाराभिप्रा
यकत्वात्सर्वपदस्य सार्थकत्वात् अत एव प्रेरणमपि सार्थकमि
ति यद्वा ननु यद्येवं शुक्लगतेरनाहतिः कृष्णगतेस्त्वाहतिर्निय
ता तत् किमिति दक्षिणायनेप्यस्माद्युक्तिकामान्यस्याप्यसमवे
नियोजयसीत्यत्रेनाभिप्रायमाप्रांकायनानुलोम्येन हेत्वपि ग
ती मुक्तिदायिन्यावेव किंतु क्रमेणैतज्जन्मभावितं जन्मान्तरभा
विलंब मोक्षस्य परस्परमेतयोर्विशेष इत्यभिप्रायवानाह नैते
सृती इति एते उक्तलक्षणे सृती शुक्लादिगतेश्चर्केस्यादरदक्षिण
प्रयने जानन् अनुलोमतया प्रतिलोमतया वा नाहत्याहतिर्येन
के विदन् कश्चनापि योगः सन्ध्यावन्दनोपायध्यानसंगतिमुक्तिर्विति
कोपाद्रिसूत्याति कृतः सन्नहनः प्रयात इति यावत् न वसति मो
हकम्पमलं नाप्नोति किंच निश्चयलाभेन समारब्धं कर्म पारयत्येव
सर्वस्य तावन्मात्रप्रपन्नस्य मोहोऽप्राप्तो विशेषतस्त्वदृष्टघायत्य
वेनास्मदीयस्य तवसोऽनुपपन्न इति मोहस्य कोऽसौ विकम्पयोगमा
तिष्ठेत्यभिप्रायवान् संबोधयति पार्थेति तस्मात् प्रातिलोम्यं वि
वार्थ सर्वेषु कालेषु शुक्लादिषु कृष्णादिषु वा योगयुक्तः योगे सा
न्नहने कर्मकौपातललक्षणे सर्वत्र शुद्धभिन्नसपत्नादिषु हत्यदृष्टि
नलमेव युक्तः सन्नः सावधानो वा भव शुक्लाभिधानस्य विशुद्ध

स्ववतनवस्तुक्तगतिरेवमयंभाविनीतिमावंतन्वामैौविविकिंतव
मूर्तित्यभिप्रायवान्संबोधयति हेअग्नेनेति २७॥

मधुभाष्य

२७॥

152

भाषा अनुवाद टीका

उक्त मार्ग दोनोंके [illegible] ज्ञानसे जो फल सो दिखावते हुये भक्तियो
ग करते हैं कि हे पार्थ मोक्ष औ संसार की देनेवाली इन दोनो मार्ग
को जानि कर कोई योगी पुरुष संसारिक मोह नही पावता अर्थात्
सब सम [illegible] स्वर्ग आदि फल की कामना नही करता बल कि परमेश्वर
ही मे निष्ठा करता है इस से हे अर्जुन तुम मेरी भक्तियोग मे युक्त
होयरहो २७ ॥

दोहा

तातें सर्व हिकालमें
पार्थयह मगजानके योगीमोहेन कोउ
योगयुक्त तुं होउ २७॥

143

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं
प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्था
नमुपैति चाद्यं २८ इति श्रीभगवद्गीतासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसंवादे तारकब्रह्मयोगो नाम अष्टमोध्याय ॥८

शाङ्करभाष्य टीका

स्पष्टे योगस्य माहात्म्यं वेदेष्विति वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानु
ष्ठितेषु तपस्सु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु एतेषु पुण्यफलं प्रदिष्टं
शास्त्रेणात्येत्यतीत्य गच्छति तत् सर्वं फलजातमिदं विदित्वा सप्तप्रश्ननि
र्णयद्वारेणोक्तं सम्यगवधार्यानुष्ठाय इह योगी परं उत्कृष्टमैश्वरं स्थान
मुपैति प्रतिपद्यते आद्यमादौ भवं कारणं ब्रह्मेत्यर्थः २८ इति शाङ्करभाष्य
टीकायां अष्टमोध्यायः ८ ॥

आनन्दगिरिकृत टीका

अष्टाध्यायार्थं योगं स्तौति वेदेष्विति पवित्रपाणित्वप्राङ्मुखत्वादिसाहित्यमध्य
यनस्य सम्यक्त्वमङ्गोपाङ्गोपेतमनुष्ठानस्य साद्गुण्यं तपसां शास्त्रोक्तानां सुत
प्तत्वं मनोबुद्ध्यैकाग्र्यपूर्वकत्वं दानस्य च सम्यक्त्वं देशकालपात्रानुगुण
त्वमिदं विदित्वेत्यत्रेदं शब्दार्थमेव स्फुटयति सप्तेति यद्यपि किं तद्ब्रह्मेत्या
दावपि यत्तः कथं कोऽत्रेत्यत्र सप्तप्रश्नप्रतिभासानुसारेण कैश्चिदुक्ते तथा
पि प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात् प्रकारभेदविवक्षया च शह
द्वयस्य प्रतिनियतत्वान्न सप्तेति विरुध्यते न वेदं वेद न मायान्तिकं किंतु स
नुष्ठानपर्यन्तमित्याह सम्यगिति प्रकृतो ध्याननिष्ठो योगी सूच्यते ऐश्वरं
विष्णोः परमं पदं तदेव तिष्ठत्यस्मिन्नशेषमिति स्थानं योगानुष्ठानादशेष
फलातिशायि मोक्षलक्षणं फलं क्रमेण लब्धुं शक्यमिति भावः तदनेन
समाप्तिवचनेन योगमार्गं दर्शयता ध्येयत्वेन तत् पदार्थो व्याख्यातः २८ ८ ॥
इति आनन्दगिरिकृतटीकायां अष्टमोध्यायः ॥

स्वामिकृत टीका ॥

अध्यायार्थं सप्तप्रश्नार्थनिर्णयं सफलमुपसंहरति ॥

गी
टी·अ·
144

वेदेष्वध्ययनादिभिः यज्ञेष्वनुष्ठानादिभिः तपःसु कायशोषणादिभिः दानेषु
च सत्पात्रार्पणादिभिः यत्पुण्यफलं चोपदिष्टं शास्त्रेषु तत्सर्वमत्येति तेभ्योऽप्यधि
कं योगैश्वर्यं प्राप्नोति किं कृत्वा इदं सप्तप्रश्नार्थनिर्णयेन उक्तं तत्त्वं विदित्वा तत
स्य योगी ज्ञानी भूत्वा परं उत्कृष्टं आद्यं जगतः मूलभूतं स्थानं विष्णोः पदं प्राप्नोति
अष्टमेऽस्मिन् विशिष्टं सप्तप्रश्नार्थनिर्णयैः अक्लिष्टमिष्ट्या मातिः स्पष्टमेव [illegible]
वर्त्मना २८ इति श्रीसुबोधिन्यां टीकायामष्टमोऽध्यायः ८ ॥

[illegible]शावभाष्यम् टीका

एतद्योगस्य माहात्म्यं वेदेषु सम्यगधीतेषु यज्ञेषु यथावदनुष्ठितेषु तपःसु स्वा-
ध्यायणादिषु तेषु दानेषु हिरण्यादिषु च यत्पुण्याख्यफलमुपदिष्टं अत्येति अति-
वर्तते तत्सर्वमिदं विदित्वा सप्तप्रश्ननिर्णयद्वारेणोक्तमर्थं ज्ञात्वा योगी परं उत्कृष्ट-
स्थानमुपैति प्राप्नोति आद्यं सादिमेव परं ब्रह्म लभत इत्यर्थः २८ इति पैशाचभाष्ये अष्ट-
मोऽध्यायः ८ ॥ ॥

[illegible]नुजभाष्यं टीका ॥

अध्यायद्वयोदितशास्त्रार्थवेदनफलमाह वेदेष्विति ऋग्यजुःसामाथर्वरू-
पवेदाभ्यासयज्ञतपोदानप्रभृतिषु पुण्येषु यत्फलं निर्दिष्टं इदमध्यायद्वयो-
दितं माहात्म्यं विदित्वा तत्सर्वमत्येति एतद्वेदनसुखातिरेकेण तत्सर्वं तृ-
णवन्मन्यते योगी ज्ञानी च भूत्वा ज्ञानिनः प्राप्यं परमाद्यं स्थानमुपैति २८
इति श्रीरामानुजभाष्यटीकायामष्टमोऽध्यायः ८ ॥

[illegible]नवगुप्तकृतटीका

अनावृत्तिमार्गः आवृत्तिमार्गश्च । उक्तौ येनायनेनाभ्यासिकं तत्स्वरूपं
[illegible] शास्त्रेतयवर्धने अनेकविधत्वेन विचार्यं येन तत्त्व
[illegible]
[illegible] एतत्सर्वं योगो वेत्ति [illegible] योगाभ्यासेन [illegible]
[illegible] एतद्विदित्वा [illegible] योगेन [illegible]
[illegible]
[illegible] सर्वं [illegible]
[illegible]
राणां भगवतस्तत्त्वाविफलीकरणात् [illegible] इति अभिभवति सर्वकर्मसंस्का
दति यदंशशिवम् सर्वं सतत गततत्त्वतो विज्ञात सर्वकर्मपरिहृत्य यो ब्रह्मसंस्वे नैव वि
यसंध्याभासते विभुः इति संग्रहश्लोकः । [illegible] परमेश्वरे अनन्तं वहिनं सावस्थान
ध्यायः ८ ॥
इति संग्रहश्लोकः २८ इति अभिनवगुप्तकृतटीकायामष्टमो

अथाध्यायनातत्पर्यम् ॥ क्लान्त्यान्तमप्रकाशान्निजविषयमतोध्यात्ममत्रेन्द्रियं स्यात्पर्याय:
तत्प्रवृत्तिं जनयति च ततस्त्वाधिदैवोधिभूतम् तद्यायं त्रिभुवैवं यदनुगतमनुध्येयमा
त्मस्वरूपं ततत्र ततस्स तिष्ठाम्यहमभिमुखत्वमूर्मे प्राप्तमेतत् ॥

परमार्थप्रपा टीका ॥

अथ सर्वोपायापेक्षयाज्ञानयोगिन एवोत्तमपदप्राप्तिर्नान्यस्येत्याह । वेदे
ष्विति वेदेष्वध्ययनादिना यागेषु ज्योतिष्टोमादिषु तपस्सु कृच्छ्रचान्द्रायणादि
नू० षु दानेषु भारादिषु यत्पुण्यमागेशापकं फलं प्रदिष्टं तद्योगी विदित्वा ज्ञानी भू
त्वा सर्वमप्यतिक्रम्य आद्यं परमुत्कृष्टं स्थानं प्राप्नोति विष्णोः पदं प्राप्नोति २८ प्रा०
इति श्री परमार्थप्रपा टीका अष्टमोध्याय: ८ ॥

वनमाली टीका ॥

पुन: अक्षरब्रह्मार्थयोगस्तोतियोगीव ब्रह्मादिकसमप्रवृत्ति रूपेण द्वारे
णेत्यनुष्ठानपर्यन्तेविदित्वा वेदेष्वध्ययनादिना यत्तेषु अनुष्ठानादिना त
प:सु कायक्लेशादिना दानेषु सत्पात्रत्यागादिना अतिक्रामति न केव
यत् पुण्यफलं शास्त्रेण प्रदिष्टम् तत्सर्वमत्येति अतिक्रामति न केव
लं तदतिक्रामति परं सर्वोत्कृष्टमप्राकृतं दिव्यं भगवदेकसाधारणं
लं तदतिक्रामति परं सर्वोत्कृष्टमप्राकृतं स्थानं सर्वजगदाधारं
श्रीवैकुण्ठाख्यं स्थानं लोकमुपैति यद्वा शाश्वतं स्थानं निहतनिशेषाविद्य:
मां सर्वेश्वरमाद्यं सर्वकारणं प्रसन्नं संतमपरोक्षतया निहतं लोकं वैकुण्ठनामधे
सन् प्राप्नोतीत्यर्थ: यद्वा परं सर्वोत्कृष्टं स्थानं वैकुण्ठाख्यं लोकं चतुर्भुजस्वरूपा
सर्वकारणं मां च प्राप्नोतीत्यर्थ: लोकविशेषस्थं मां प्राप्याविर्भूतस्वरूप
नेद: सन् विदेहकैवल्यं प्राप्यच्छिकविग्रहयुक्तस्सयथाकामं विहर
तीतिभाव: २८ इति गीतावनमालीटीकायां अष्टमोध्याय: ८ ॥

तत्त्वमवैजयन्ती टीका ॥

एवं मार्गद्वयं निरूप्याथेदानीं सप्तमाष्टमाध्यायद्वयोक्तं यज्ज्ञानं तत्फल
माह वेदेष्विति वेदेषु साङ्गोपाङ्गाध्ययनादिद्विजत्वसंस्कारपूर्वकगुरुमटमा
दिसाधनसदाचरणाब्रह्मचर्यश्रावियव्रतब्रह्मनिष्ठत्वादिगुणगुरुकुलवर
सेवादिविधिनापठनक्रमजटाघनक्रमेणच सम्यक्परिपठितेषु तपस्सु काय
शोषणेन्द्रियदमनसत्यभाषणशीतातपादिदु:खसहनादिनाश्रा
धीतेषु यज्ञेषु सर्वाङ्गोपक्रमोपसंहारेण सम्यगनुष्ठितेषु दानेषु देशकालपात्रादिविचारेणाश्र
स्त्रोक्तविधिना सम्यक्कृतेषु दानेषु देशकालपात्रादिविचारेण श्रद्धया सम्पादितेषु चशब्दः पुनरर्थक: सर्वेषां वेदादीनां पृथक्पृथक्त्वं ज्ञापयति
एवकारेणावर्णाश्रमाचारव्रतादीनां समुच्चय: सूचित: यत्पुण्यफलमेति

गी.
टी. अ.

टीका मुष्मिकसुखभोगलक्षणं प्रदिष्टमुक्तं तत्सर्वं स्वल्पं वमत्वा ऽत्येत्य
तिक्रमति किं कृत्वा इदमध्यायद्वयोक्तं मन्त्रस्यास्य मद्भक्तस्य माहात्म्यं विदि
त्वा ज्ञात्वा योगी मत्स्वरूपादित्ता नीमद्भक्तस्सम्भूत्वा परमं मायिकं च पुनः आ
घसर्वेषां कारणानामपि वीजभूतं जरामरणादिजन्यदुःखशून्यं भगवतो म
मस्थानं वैकुंठाख्यमुपैति प्राप्नोति २८ इति ऊसमवैजयन्तीटीकाष्टमोध्यायः

हृत्सभक्ताः हृत्समन्त्रयाहृत्स नाहात्म्यवेदिनः हृत्सेया नीतरेतेवेत्युहृमेवहृनोमितनम्

मधुसूदनी टीका ॥

पुनः श्रद्धाहृदयार्थयोगं

145

लोति — वेदेषु दर्भपवित्रपाणित्वप्राङ्मुखत्वगुर्वधीनत्वादिभिः सम्यगधीतेषु यज्ञे
षु सांगोपांगसाद्गुण्येन श्रद्धया सम्यगनुष्ठितेषु तपस्सु शास्त्रोक्तेषु मनोबुद्ध्याद्यै ६
काग्र्येण श्रद्धया सुतप्तेषु दानेषु तुलापुरुषादिषु देशकालपात्रेषु श्रद्धया
सम्यग्दत्तेषु यत्पुण्यफलं पुण्यस्य फलं स्वर्गस्वाराज्यादि प्रदिष्टं शा
स्त्रेण अत्येत्यतिक्रामति तत्सर्वमिदं सप्तप्रश्ननिरूपणद्वारेणोक्तं
विदित्वा सम्यगनुष्ठानपर्यन्तमवधार्यानुष्ठायच योगी ध्याननिष्ठः न के
१ तद वलं तिक्रामति परं सर्वोत्कृष्टमैश्वरं स्थानमाद्यं सर्वकारणं उपैति च
प्रतिपद्यते च सर्वकारणं ब्रह्म प्राप्नोतीत्यर्थः तदनेनाध्यायेन ध्येयत्वे
न तत्पदार्थो व्याख्यातः २८ इति मधुसूदनीटीका अष्टमोध्यायः ८ ॥

सदानंदी टीका ॥

पुनः श्रद्धाविशुद्ध्यर्थं योगं स्तौति रमापतिः वेदोक्तव्रतसंदोहैरधीतेष्वाग
मेषु च सांगोपांगेषु यज्ञेषु श्रद्धयानुष्ठितेषु च शास्त्रोक्तेषु सुतप्तेषु तपःस्वे
काग्रया धिया देशे काले च पात्रे च तुलापुरुषकादिषु सम्यग्दत्तेषु यत्पुण्य
फलं स्वर्गादिकं स्मृतं फलं तस्मात्तेषु राज्यावाप्त्यर्थं मतिगच्छति योगी सप्तप्र
श्नद्वारेण कीर्तितं ज्ञात्वा सम्यगनुष्ठानपर्यन्तमवधार्य च ध्यान
निष्ठः सन्नुत्तमप्रकृष्टमैश्वरं पदं सर्वाधिष्ठानमानंदस्वरूपेण प्रतिपद्यते ध्ये
येत्वेनात्र व्याख्यातस्तत्पदार्थो यथातथं यो वेदान्तेषु गीतात्मा वक्तृश्रुतहृदनवतां
ध्येय आनंदकौस्तुभमालाभ्यां वक्त्रा चराचरमचरमिदं कल्पितं यत्र यत्प्रा
२४ क्रियं प्राप्याहतिमूर्त्याववर्तते परमे स्वमहिम्न्यात्मनि तिष्ठन्तं श्रीकृष्णमुकुंदं
स्मितमधुरमुखं सर्वदा संश्रयेहं २८ इति सदानंदीटीकायामष्टमो
ध्यायः ॥

नीलकंठी टीका ॥

पुनः श्रद्धाभियुक्तइयेयोगं स्तौति वेदेष्विति वेदेषु सम्यगधीतेषु
यज्ञेषु तपःसु च सम्यगनुष्ठितेषु दानेषु च सम्यग्दत्तेषु यत्पुण्यं तत्
फलं चेति पुण्यफलं सर्वेषु समुच्चितेषु यत्प्रदिष्टं शास्त्रेषु तत्सर्वं
योगी अत्येति अतिक्रामति कार्यं ब्रह्मलोकं प्राप्नोतीत्यर्थः किं
कृत्वा इदं पूर्वोक्तमुपासनं विदित्वा ज्ञात्वानुष्ठाय च ततश्च किमि
त्यत आह यत्स्थानं निर्विशेषं ब्रह्म उपैति प्राप्नोति च क्रमेणेत्यर्थः
आद्येन तत्केनचिन्निर्मितं तदनेनाद्यो येन स्थेयत्वं त्वपदार्थो व्या
ख्यातः अग्रिमेध्याये ज्ञेयं ब्रह्म व्याख्यास्यति २८

आनंदी टीका

अत्र फलातिशयदर्शनेन श्रद्धां
नयति— एतद्धि दित्वा तत्सर्वमत्येति अभिभवति सर्वेषां शुभाशुभानां कर्म
णां तत्फलानां वा भगवत्स्मरणेनैव परित्यागात् तत्पारे तत्ये चासौ
निरायासमेव विन्दति परमानन्दमिति २८ इति श्रीभगवद्गीता
अष्टमोध्यायः ८

रामकंठीटीका

इदं प्रश्नसप्तकव्याकरणरूपं वस्तु विदित्वा ज्ञात्वा यथोक्तसमा
धिस्तत्सर्वं वेदाध्ययनयज्ञतपोदानाद्यनन्तवस्तु पुण्यक्रियाफलम
त्येत्यभिक्रामति यतश्चाद्यमनुत्तरमत एव परमनन्तानन्दमयत्
त्वादसत्कृष्टं स्थानं धामोपैति प्राप्नोति परमात्मनि स्वाभाविकीं
प्रतिष्ठां लभत इति यद्यप्येवं केश्चिदयमर्थो व्याख्यातः यथा
मुष्यैव हि त्योत्तरायणकालसामर्थ्यात्प्रयाता ब्रह्मविदोर्चिरादिसं
ज्ञाल्लोकान्तराक्रमणक्रमेण ब्रह्म प्राप्नुवन्ति योगिनश्चात एव
योगिशब्देनोक्ताः दक्षिणायनकालसामर्थ्यात्प्रयाताः सन्तश्चाद्
मसं ज्योतिः प्राप्य धूमादिसंज्ञलोकान्तराक्रमणक्रमेण संसार
आवर्तत इति पूर्वोक्तयुक्त्या चैतदपि व्याख्यानं संगच्छेत यथोक्त २१
युक्त्या चायमपि क्रमोनयोरेव गत्योरन्त भगवतीति केचिन्मन्यते
तदत्र परमार्थवेदिनः प्रमाणं गंभीरैर्विपुलैः स्वभावविमलैः श्री
मत्पदार्थोज्ज्वलैः स्फीतोसमभिरं तु राशिभिरिव ब्रह्मादिभिर्वस्तु
भिः अध्यायस्यन रोहमस्य विहृतिं दृष्टीमिमामंजसायः स्वीक

गी॰
टी॰
अ॰

र्नुमलं स्वपदं विदुषां साम्राज्यमेकोऽर्हति २८ इति श्रीराजान
करामविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगव
द्गीताविवरणेऽष्टमोऽध्यायः ८

यद्योक्तस्याध्यायार्थस्य प्रभावमाह ॥ ...सिकी [illegible] टीका

146

वेदेष्वध्ययनादिना यज्ञेष्वनुष्ठानादिना तपःसु स्वकायशोषणा
दिना दानेषु सत्पात्रार्पणादिना यत्पुण्यफलं तदज्ञानेदायिष्ठाना
भूतस्वर्गादिप्राप्तिरूपं शास्त्रेषूपदिष्टं इदमध्यायोक्तमर्थं विदित्वा
नुभूय योगी नित्यावहितस्तत्सर्वमत्येति अलौकिकमानंदमश्नुते
जीवद्दशायां ततो देहत्यागानन्तरं परं श्रेष्ठं आद्यं जगन्मूलभूतं स्था
नं धामैश्वरं रूपमुपैत्यात्मत्वेन प्रतिपद्यते च स्थाम् जीवन्मुक्ते इत्यभ
त्व मालक्ष्म्याह योहरिः विदेहमुक्तिं मुक्तिं तत्क्षणान्नेत प्राप्नुयामह
२८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे [illegible] मक्षरनिर्देशो नामाष्टमोऽध्या
यः ८

तत्त्वप्रकाशिकाख्यायां राजानकलक्ष्मीरामविरचितायां

बालटीका

मामध्यायार्थमस्य प्रस्तार्थो निर्णीय च योगफलमुपसंहरति वेदे
ष्विति वेदेषु सम्यगधीतेषु यज्ञेषु यथावदनुष्ठितेषु तपःसु तप्तेषु दा
नेषु सम्यग्दत्तेषु यत्पुण्यफलं प्रदिष्टं भवति योगी तदिदं सर्वं वेदा
तिलोत्तरमार्गस्वरूपं समग्रमनिर्णयद्वारेण विदित्वाऽनुष्ठीय
अत्येति अतिक्रम्य गच्छति च ततः परमं तत्कृष्टमैश्वरं स्थानं आद्यं
आसैभवे कारणं ब्रह्मस्वरूपेति प्रपद्यते २८ ॥ इति श्रीभगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पंचो
लेटीकायां अष्टमोऽध्यायः ८ ॥

मगावीरसमिद्धायिनी ॥

अथोक्तलक्षणस्य हि प्रकारस्य योगस्य प्रभावं कथयन्नध्यायार्थमु

पसंहरति वेदेष्विति यदिदमध्यायप्रतिपादितं प्रश्नसप्तकव्याक
रणरूपं वस्तु विदित्वा गुर्वादिभ्यः सकाशाद्विज्ञाय योगी यथोक्त
कालानतिक्रमेण विहितस्मृतिकृतयागः कर्मकर्मफलैः प्रोक्तं लवण
साम्ययोगारूढस्य तत्सर्वं फलमंतवत्तल्लोकसर्वं प्राप्नोति किंच
परं सर्वोपरिवर्तमानत्वादतिहृद्यं श्रेष्ठं च अथ मुक्त्यति विनाशरहि
तं चेन नित्यं स्थानमथो मम संबंधि धाम उपैति प्राप्नोति किं तत्फ
लं योगी अतिक्रामति वेदेषु ऋगादिषु चतुर्षु अधीतेषु यज्ञेषु सम
याहिष्टेषु तपस्सु कृच्छ्रादिषु तप्तेषु दानेषु सुवर्णभूम्यादिषुद
त्तेषु वेदविद्भिर्यत्पुण्यफलं ज्योतिष्टोमक्रियाफलं प्रदिष्टं कथितमस्ति
एवं चैतद्ब्रह्मज्ञानस्य फलमीदृशमस्ति किमु वक्तव्यं तदनुष्ठान
स्येति भद्रं २८ ॥ इति श्रीरत्नावीरसमिद्धाबोधिन्यां श्रीगीताव्या
ख्यायामष्टमोऽध्यायः ८ ॥

[illegible]

२८ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीम
द्गीताभाष्येऽष्टमोऽध्यायः ८ ॥

147

भाषा अनुवाद ॥

अध्याय का अर्थ स्वरूप आठ प्रश्न का अर्थ निर्णय फलके सहित क
हते हैं कि वेदों मे अध्ययन केद्वारा और यज्ञों मे अनुष्ठान द्वारा औ
तपस्यों मे शरीर शोषण के द्वारा औ सर्व दान मे सत्पात्र के अर्पण
मे जो उत्तम पुण्यफल सब शास्त्रों नेकहा है इस फल को उल्लंघन
करि योगी श्रेष्ठ योगरूप ऐश्वर्य को प्राप्त होताहै अर्थात् परमपद
पावतेहैं २८ इतिश्रीभाषा अनुवादअष्टमोध्यायः ८ ॥

दोहा

निगम यज्ञ तपदान मे कहापुण्यफल जोय तासम योगी
लखिलहैं आदिपरम गति सोय २८ इतिश्री ॥

148